# ।। लघुग्रंथसंग्रह - २ ।।

**प्रकाशक :** श्रीवल्लभविद्यापीठ-श्रीविठ्ठलेशप्रभुचरणाश्रम ट्रस्ट,
वैभव को-ओपरेटिव्ह सोसायटी,
पूना-बेंगलोर रोड, कोल्हापुर,
महाराष्ट्र.

**संकलनकार :** गोस्वामी श्याम मनोहर

**प्रथमसंस्करण :** वि.सं.२०७२, शरत्पूर्णिमा.

**प्रति :** ५००

**निःशुल्कवितरणार्थ**

**मुद्रक :**
रमा आर्ट्स,
४, चुनावाला इन्डस्ट्रिअल् एस्टेट्,
कोंडिविटा, अंधेरी (पूर्व),
मुंबई : ४०० ०५९.

# विषयानुक्रमणिका


| ग्रंथक्रम | पृष्ठक्रम |
|---|---|
| **गीताध्यायप्रतिपाद्यसंक्षेपः** | **०१ - ८१** |
| प्रथमाध्यायः | ०१ - ०८ |
| द्वितीयाध्यायः | ०९ - १४ |
| तृतीयाध्यायः | १५ - १८ |
| चतुर्थाध्यायः | १९ - २६ |
| पञ्चमाध्यायः | २७ - २९ |
| षष्ठाध्यायः | ३० - ३३ |
| सप्तमाध्यायः | ३४ - ३८ |
| अष्टमाध्यायः | ३९ - ४० |
| नवमाध्यायः | ४१ - ४२ |
| दशमाध्यायः | ४३ - ४६ |
| एकादशाध्यायः | ४७ - ५० |
| द्वादशाध्यायः | ५१ - ५४ |
| त्रयोदशाध्यायः | ५५ - ५८ |
| चतुर्दशाध्यायः | ५९ - ६२ |
| पञ्चादशाध्यायः | ६३ - ६८ |
| षोडशाध्यायः | ६९ - ७३ |
| सप्तादशाध्यायः | ७४ - ७७ |
| अष्टादशाध्यायः | ७८ - ८१ |
| **परिशिष्टम्** | |
| १. उपनिषदुक्तरसस्य नाट्यशास्त्रोक्तरसेन ऐक्यमनैक्यम् वेति रसमीमांसा | ८२ - ९० |





| ग्रंथक्रम | पृष्ठक्रम |
|---|---|
| २. वेदस्तुतिव्याख्या | ९१ - १०३ |
| ३. 'कथाइमास्ते' पद्यव्याख्या | १०४ - ११५ |
| ४. भक्तिसर्गभक्तिमार्गाविरोधनिरूपणम् | ११६ - १२० |
| ५. श्रीसर्वोत्तमस्तोत्रप्रवचनान्तर्गतनामव्याख्या | ११६ - १३३ |
| पूर्णानन्दपूर्णकामनामनिरूपणम् २०१५ | १२१ - १२६ |
| वाक्पतिविबुधेश्वरनामनिरूपणम् २०१५ | १२७ - १३२ |
| कृष्णनामसहस्रस्येत्यादिनामनिरूपणम् २०१६ | १३३ - १३८ |
| ६. सप्तविंशतिनामानि श्रीगोपीनाथप्रभुचरणानाम् | १३९ - १४० |
| ७. पुरुषोत्तमजोशीवार्तास्थवचनामृतव्याख्या | १४१ - १४८ |
| उद्धृतवचनानुक्रमणिका | १४९ - १५६ |

॥ श्रीकृष्णाय नमः ॥

॥ श्रीमदाचार्यचरणकमलेभ्यो नमः ॥

## ॥ प्रथमाध्यायप्रतिपाद्यसंक्षेपः ॥

### ( मंगलाचरणेनोपक्रमः )

ब्रह्मात्मकक्षरातीतो ह्यक्षरादपि चोत्तमः ॥
स्वमहिम्न्यक्षरे धाम्नि श्रीकृष्णो राजते सदा ॥१॥
एकं शास्त्रं देवकीपुत्रगीतं
देवं चैकं देवकीपुत्रमेनम् ॥
नत्वा वाणीं वाक्पतेरीदृशीञ्च
मद्वाक्शुद्धिमत्र सम्भावयामि ॥२॥

### ( प्रतिपाद्यविषयविमर्शः )

शास्त्रेऽस्मिन् वक्तृश्लोकानां संख्याभेदो यथोदितः ॥
उत्तमुरवीरराघवार्यैस्तल्लिख्यते ह्यधः ॥३॥
**''पञ्चसप्ततियुक्तानि श्लोकानां प्राह केशवः ॥**
**शतानि पञ्च, पार्थस्तु चतुरोशीतिमेव च ॥४॥**
**चत्वारिंशत्सञ्जयोक्ताः राज्ञैकः इति तन्मितिः''** [१] ॥
सर्वोपनिषदां सारभूतं शास्त्रमिदं खलु ॥५॥
नारायणेन हि नरायोपदिष्टं विशेषतः ॥
चतुर्विधो हि भेदोऽत्र शास्त्रे समुपलभ्यते ॥६॥
आद्यस्तु धृतराष्ट्रेणान्धेन साकं हि सञ्जयः ॥
तत्सुतानां पाण्डवानां युद्धवार्तां जगाद यत् ॥७॥
संवादे चैतयोः द्वाविंशश्लोकयोजना ॥
व्यासप्रसादतः श्रोतुं दूरस्थोऽपि क्षमोऽभवत् ॥८॥
द्वितीयोऽन्तर्गतश्चास्मिन् श्रीकृष्णार्जुनयोः पुनः ॥

---

१.भग.गीता भा.व्या.भू.पृ.१४



युद्धौचित्यानौचित्ये यद् मित्रभावेन जल्पनम् ॥९॥
लौकिकीं रीतिमाश्रित्य सारथिरथिनोः मिथः ॥
जीवान्तर्यामिणोः ह्यत्र पार्थश्रीकृष्णरूपयोः ॥१०॥
विषादमोहग्रस्तोद्धारकर्त्रोरिति स्थितिः ॥
तृतीयस्त्वौपनिषदब्रह्मविद्यानिवेशानात् ॥११॥
सख्युश्चार्जुनस्येह शिष्यभावोपसत्तितः ॥
गुरुशिष्योपनिषद्रूपा वागीश्वररूपिणी ॥१२॥
सर्वाध्यायपुष्पिकासु चेत्थमेवोदिता हि सा ॥
मुखोद्गततया गीता ब्रह्मविद्याशिरोपमा ॥१३॥
योगशास्त्रतयाख्याताध्यायानां योगता ततः ॥
**''आत्मप्रयत्नसापेक्षा विशिष्टा या मनोगतिः ॥१४॥**
**तस्य चेश्वरसंयोगो 'योग'इत्यभिधीयते''** [२] ॥
वचनादर्जुनस्यापि विषादेन प्रपन्नता ॥१५॥
'विषादयोग'इत्याख्योऽध्यायस्तस्मादुदीरितः ॥
श्रीमद्भागवते तस्माद् अपि कामदिवृत्तीनाम् ॥१६॥
नित्यं भगवता साकं योजनेन विमुक्तता ॥
**''नृणां निःश्रेयसार्थाय व्यक्तिर्भगवतो नृप! ॥१७॥**
**अव्ययस्याप्रमेयस्य निगुर्णस्य गुणात्मनः ॥**
**कामं क्रोधं भयं स्नेहमैक्यं सौहृदमेव वा ॥१८॥**
**नित्यं हरौ विदधतो यान्ति तन्मयतां हि ते ॥**
**न चैवं विस्मयः कार्यो भवता भगवत्यजे ॥१९॥**
**योगेश्वरेश्वरे कृष्णे यत एतद् विमुच्यते''** [३] ॥
योगेश्वरेश्वरोक्तं वै योगशास्त्रमिदं नवम् ॥२०॥
तस्मात् सञ्जयसंवादस्यापि शास्त्रत्वमक्षतम् ॥

---

२.विष्णुपुरा.६।७।३१
३.भाग.पुरा.१०।२९।१४-१६

अग्रिमा योगशास्त्रीयाश्चाध्याया योजका मताः ॥२१॥
ईशेन सह जीवस्य ईशेन कथिता मुदा॥
जीवप्रयत्नद्वारेण जीवेश्वरसुयोजका॥२२॥
गीता चाष्टादशाध्याय-षट्क-त्रयविभागशः॥
कर्मभक्तिज्ञानभेदैः क्रमशश्चान्तरंगत॥२३॥
मुक्तिरूपफलप्राप्तौ त्रयाणामुत्तरोत्तरा॥
कल्पिता कैश्चिदत्रैवं वक्तुं नैवोचिता तु सा॥२४॥
भक्तेस्तु त्रिषु षट्केषु श्रैष्ठ्यं कण्ठोक्तमेव हि॥
तथाहि प्रथमे षट्के भगवता प्रतिपादितम्॥२५॥
**''सर्वभूतस्थितं यो मां भजत्येकत्वमास्थितः॥**
**सर्वथा वर्तमानोऽपि स योगी मयि वर्तते''**[४]॥२६॥
तथा द्वितीयषट्केऽपि कृष्णेन ब्रह्मणा मुखात्॥
**''अन्तवत्तु फलं तेषां तद् भवत्यल्पमेधसाम्॥२७॥**
**देवान् देवयजो यान्ति मद्भक्ता यान्ति मामपि''**[५]॥
एवं तृतीयषट्केऽपि गुणातीत-स्तुतावपि॥२८॥
**''मां च योऽव्यभिचारेण भक्तियोगेन सेवते॥**
**स गुणान् समतीत्यैतान् ब्रह्मभूयाय कल्पते''**[६]॥२९॥
केवले मध्यषट्केऽतो भक्तियोगप्रधानता॥
न गीतावचनात् सिद्धा षट्कत्रयमतिर्मुधा॥३०॥
अन्यैस्तु गीताशास्त्रस्य युद्धकर्मोपदेशिता॥
प्रधाना चानिराकार्या बहुशो वै विधानतः॥३१॥
सत्यं तद् रथिसारथ्योः वादे नोपनिषत्स्वपि॥
ब्रह्मविद्यासु युद्धादिकर्मणां ह्यप्रसक्तता॥३२॥

४.भग.गीता ६।३१
५.भग.गीता ७।२३
६.भग.गीता १४।२६



तथाहि -
**''श्रेयान् द्रव्यमयाद् यज्ञाद् ज्ञानयज्ञः परन्तप॥**
**सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते''**[७]॥३३॥
**''अपि चेत्सुदुराचारो भजते मामनन्यभाक्॥**
**साधुरेव स मन्तव्यः सम्यग्व्यवसितो हि सः॥३४॥**
**क्षिप्रं भवति धर्मात्मा शश्वच्छान्तिं निगच्छति॥**
**कौन्तेय प्रतिजानीहि न मे भक्तः प्रणश्यति''**[८]॥३५॥
युद्धादिकर्मत्यागात्तु स्वकर्मपरिभ्रष्टता॥
दुराचाररतो भक्तो ह्युद्धार्यो यदि कल्पते॥३६॥
गतं तत् कर्मप्राधान्यं भक्तिप्रमुखतोक्तितः॥
सुस्पष्टं कर्मतः श्रैष्ठ्यं ज्ञानभक्त्योस्तु स्वीकृतम्॥३७॥
ज्ञाने परिसमाप्तिश्च कर्मणश्चोदिता यतः॥
कर्माभावेऽपि भक्तस्याविनाशोऽङ्गीकृतेः पुनः॥३८॥
पार्थाय युद्धकर्माज्ञा सत्त्वेऽपि गौणता न वै॥
ज्ञानभक्त्योर्हि वक्तुं चास्मिञ्छास्त्रे कदाचन॥३९॥
त्रिषु षट्केषु कर्मादिस्त्रयाणामुपलम्भतः॥
ज्ञानभक्तिकर्माणां च प्रतिपाद्यः समुच्चयः॥४०॥
नैतदप्युपपन्नं वै मान्यं मतिमता क्वचित्॥
**''श्रेयो हि ज्ञानमभ्यासाद् ज्ञानाद् ध्यानं विशिष्यते॥४१॥**
**ध्यानात्कर्मफलत्याग''**[९]रित्युक्तेन विरोधतः॥
**''सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज॥४२॥**
**अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः''**[१०]॥

७.भग.गीता ४।३३
८.भग.गीता ९।३० - ३१
९.भग.गीता १२।१२
१०.भग.गीता १८।६६

समुच्चयो विरुद्धो वै सर्वत्यागोपदेशतः ॥४३॥
ननु त्रिषु विकल्पोऽतः प्रतिपाद्यः कुतो नहि ? ॥
विकल्पपक्षे "**कर्माणि संगं त्यक्त्वा करोति यः ॥४४॥**
**ब्रह्मण्याधाय तान्येवं न स पापेन लिप्यते**"[११] ॥
वैकल्पिकत्वे कर्मणां ब्रह्माधानं निरर्थकम् ॥४५॥
विनापीह कर्मणैव पापापाकृतिसम्भवात् ॥
अतः समुच्चयोऽप्यत्र वैकल्पिक उदीर्यते ॥४६॥
त्रयाणामपि योगानां समुच्चयविकल्पते ॥
अनुकल्पता मिथश्चात्र गीतोक्ता ह्युपलभ्यते ॥४७॥
शास्त्रस्य भक्तौ मुख्यं हि तात्पर्यं नो कुतस्तदा ॥
एवन्तु युद्धकर्मणोऽत्राप्रधान्ये विचारय ॥४८॥
तत्त्यागेनार्जुनोऽप्यत्र कुतो भक्तौ न सज्जितः ॥
"**नष्टो मोहः स्मृतिर्लब्धा त्वत्प्रसादात् मयाच्युत ॥४९॥**
**स्थितोऽस्मि गतसन्देहः करिष्ये वचनं तव**"[१२] ॥
युद्धायैवोद्यतः पार्थः नतु भक्त्यै कथावशात् ॥५०॥
तस्मात्पार्थाय युद्धोपदेशस्यात्र प्रधानता ॥
ब्रह्मविद्यासु भक्तेर्हि प्राधान्यमपि कण्ठतः ॥५१॥
बहुधैवोपदिष्टं हि योगशास्त्रे कथान्यथा ॥
"**ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम् ॥५२॥**
**मम वर्त्मानुवर्तन्ते मनुष्याः पार्थ सर्वशः**"[१३] ॥
इत्युक्तत्वेन विविधैः योगैर्गम्यो स एव हि ॥५३॥
योगेश्वर इति प्राप्ते चोपदेशस्त्रिधा मतः ॥
श्रीकृष्णपार्थसंवादे युद्धाज्ञायाः प्रधानता ॥५४॥

११. भग. गीता ५।१०
१२. भग. गीता १८।७३
१३. भग. गीता ४।११



ब्रह्मविद्योपनिषदि भक्तेरेव प्रधानता ॥
योगशास्त्रे तु सर्वैर्हि योगैरेको हि गम्यते ॥५५॥
एतदर्थं ह्याद्यषट्कं सूत्ररूपमुदाहृतम् ॥
द्वितीयं वृत्तिरूपन्तु भाष्यरूपं ततः परम् ॥५६॥
प्रागपि निजकर्तव्योपदेशस्येह प्रार्थनात् ॥
पार्थे प्रपत्तिः सिद्धैव सिद्धार्थे न विधिः क्वचित् ॥५७॥
अतस्तु ह्यन्तिमेऽध्याये प्रपत्त्यादेशमुख्यता ॥
समग्रशास्त्रप्रतिपाद्यप्रामुख्ये न कल्पते ॥५८॥
"**शरणं व्रजे**"[१४] ति वचनं विधौ नेव हि युज्यते ॥
अर्थवत्तातु शास्त्रस्याप्राप्तार्थे सर्वदा मता ॥५९॥
वचनं भगवतश्चैतद् आमन्त्रणपरं तथा ॥
आशिषि वेति मन्तव्यमतः शास्त्रे हि मुख्यता ॥६०॥
पार्थस्तु सर्वथैवेष्टसखा भगवतो मतः ॥
तथाहि -
"**सर्वगुह्यतमं भूयः शृणु मे परमं वचः ॥६१॥**
**इष्टोसि मे दृढमिति ततो वक्ष्यामि ते हितम् ॥**
**मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु ॥६२॥**
**मामैवैष्यसि सत्यं ते प्रतिजाने प्रियोऽसि मे ॥**
**सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज ॥६३॥**
**अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः**"[१५] ॥
अत्र वर्णाश्रमाचारधर्माणां त्यागदेशना ॥६४॥
उत यज्ञतपोध्यानभक्त्यादेरपि त्याज्यता ? ॥
अत्याज्यानां मयि त्यागो कृष्णेनैवात्र वर्णितः ॥६५॥
प्रपत्तौ साधनफलत्यागेनेशबलाश्रयः ॥

१४. भग. गीता १८।६६
१५. भग. गीता १८।६४ - ६६

उपायालम्बनं त्यक्त्वोपेयस्यैवात्र चाश्रय:॥६६॥
सर्वगुह्यतमं चैतत् पार्थाय कथनं पुन:॥
इत: पूर्वन्तु गुह्याद्धि यद्वै गुह्यतरं मतम्॥६७॥
ज्ञेयं तदेव सर्वाधिकारिकं नान्तिमं पुन:॥
उपायालम्बनाशक्तावुपेयस्यावलम्बनम्॥६८॥
प्रपत्तेस्तु प्रकारोऽयं सर्वयोगानुकल्पता॥
मार्जारमर्कटन्यायभेदाभ्यां द्विविधं मतम्॥७०॥
नि:साधनानां जीवानां साधनं भगवान् यत:॥
मार्जारशावकन्यायादाश्रयस्तस्य कीर्तित:॥७१॥
मर्कटस्य शावकस्यासमर्थस्यात्मरक्षणे॥
मातेवाश्रयणीयः स स्वप्रयत्नेन सर्वथा॥७२॥
भगवानेकएवात्र प्रभेदोऽत्र सुबोधितः॥
गुह्याद् गुह्यतरस्यात्र सर्वगुह्यतमस्य च॥७३॥
'गच्छ' 'व्रज' द्विधा तस्य भेदेनैव वर्णनात्॥
नायं शास्त्रार्थसंक्षेप: नापि सर्वाधिकारक:॥७४॥
स्वेष्टायैव सखायैवोपदेशोऽत्र नान्यथा॥
गीतोक्तानाम् अशेषाणाम् उद्धारोपायवर्त्मनाम्॥७५॥
सर्वेष्वपि भरश्चात्र स्वभक्तौ च विशेषत:॥
मार्जारिन्यायत: पार्थसमाश्वासनम् उच्यते॥७६॥
पापचिन्तार्जुनस्यात्र कृष्णेनैवं निवारिता॥
आत्मोद्धारचिन्तातु दैवजीवस्वभावजा॥७७॥
अन्यसाधारणी तस्यां मर्कटन्यायमान्यता॥
सूत्रवृत्तिभाष्यरूपैस्त्रिभि: षट्कैर्निरूपिता॥७८॥

**( उपसंहार: )**

अध्याये चान्तिमे चैवं वार्तिकत्वविचारत:॥



गीताशास्त्रे त्वयं चात्र प्रतिपाद्यविषयो मत:॥७९॥
यथामति मयाख्यातोऽयुक्तश्चेद् बुद्धिदोषतः॥
उपेक्षणीय: सुधिभि: स्खलनं गच्छतो यथा॥८०॥
सञ्जयोक्त: पार्थमोह: स्वसम्बन्धात्तु योगताम्॥
आविष्करोति य: कृष्ण: सएव शरणं मम॥८१॥

इति श्रीमद्भगवद्गीताप्रथमाध्यायप्रतिपाद्यसंक्षेप:
गोस्वामिश्रीदीक्षितात्मजेन श्याममनोहरेण कृत:
सम्पूर्ण:

॥ श्रीकृष्णाय नमः ॥

॥ श्रीमदाचार्यचरणकमलेभ्यो नमः ॥

## ॥ द्वितीयाध्यायप्रतिपाद्यसंक्षेपः ॥

### ( मंगलाचरणेनोपक्रमः )

नत्वा वाक्पतिमाचार्यं श्रीकृष्णं चार्जुनं तथा ॥
व्याख्यासमाहतिप्रश्नैः दिव्यगीतार्थबोधकान् ॥१॥
द्वितीयाध्यायसंक्षिप्तविषयार्थविवेचनम् ॥
करोमीह समासोक्तिविधिना बुद्धिशुद्धये ॥२॥

### ( श्लोकसंख्याविभागोक्तिः )

सञ्जयस्याद्यपद्ये तु सदयं साश्रुलोचनम् ॥
पार्थं यद् भगवानाह तेनैवोपक्रमः कृतः ॥३॥
श्लोकद्वयेन श्रीकृष्णः सखायमर्जुनं तु यत् ॥
हृद्दौर्बल्यपरित्यागं कर्तुं प्रेम्णोपदिष्टवान् ॥४॥
चतुर्थाद् दशमं यावद् धर्मसंमोहहेतवः ॥
स्वस्य कार्पण्यदोषश्च कृष्णस्य शरणागतिः ॥५॥
पार्थेन वर्णिताः षट्सु श्लोकेषु मोहशान्तये ॥
सञ्जयोक्ते च पद्ये द्वे ततस्त्वग्रिमवर्णने ॥६॥
ततः श्रीकृष्णगीतायाश्चारम्भो मोहनाशकः ॥
एकदशात्तु पद्याद्धि चिदात्मारूपवर्णनम् ॥७॥
कर्तव्यस्योपदेशश्च तथाच स्थितप्रज्ञता ॥
अर्जुनेन च पृष्टस्य समाधानं तथैव च ॥८॥
ब्राह्मी स्थितिस्तदुत्कर्षः श्लोकसंख्याविभाजनम् ॥

### ( अध्यायाधिकरणांगविमर्शः )

विषयोऽत्र सांख्यमत्या जीवतत्त्वस्य वर्णनम् ॥९॥



संशयस्तत्र घोरेण युद्धरूपेण कर्मणा ॥
श्रेयः कथं स्याद् आत्मनो वै युद्धक्षेत्रविडम्बना ॥१०॥
तत्र पार्थकृतः पूर्वपक्षो युद्धमनिष्टकृत् ॥
योद्धव्यानां हि ज्येष्ठानां पूज्यानां च विचारतः ॥११॥
तदुत्तरतया पार्थपूर्वपक्षनिवारणम् ॥
कृष्णेन यत् कृतं तत्त्वदीपिकाकृद्भिर्वर्णितम् ॥१२॥
पूर्वोत्तराध्याययोर्वै संगतिश्च निरूपिता ॥

### ( तत्त्वदीपिकाकृद्विषयसंक्षेपः )

**''वैराग्यं प्रथमेऽध्याये पार्थदुःखमुदीरितम् ॥१३॥**
**पार्थाधिकारसिद्धौ च सांख्ययोगनिरूपणे ॥**
**तौ विद्यापर्वरूपत्वात् हरिवेशानुकारिणौ ॥१४॥**
**आत्मस्वरूपविज्ञानस्थिरबुद्धिप्रयोजनौ ॥**
**ततोऽशत्वपरिस्फूर्त्या भवेदाश्रयणादरः ॥१५॥**
**तदाश्रयवतः कार्यं तदाज्ञाधर्मपालनम् ॥**
**अतस्तदाज्ञारूपेण युद्धादिकरणं मतम् ॥१६॥**
**न पुष्टिमिश्रभक्तो हि सांख्यमात्ररुचिर्भवेत् ॥**
**मध्ये स्वधर्मवचनं यदुक्तं सांख्ययोगयोः ॥१७॥**
**तेन तद्हृदि पुष्टिस्थः प्रकारः सम्भविष्यति ॥**
**विषादः पूर्वमध्याये द्वितीये सांख्यमुच्यते ॥१८॥**
**तत्र स्वधर्मो योगान्ते स्थिरबुद्धिप्रयोजनः''** [१]॥
विषादयोगः प्रथमे सांख्ययोगस्ततोऽत्र हि ॥१९॥
एतयोः 'योग'शब्दार्थः विद्यापर्वात्मकोऽथवा ॥
भिन्नो वा ? तत्र कर्तव्या 'योगा'र्थस्य विवेचना ॥२०॥
बालबोधोक्तरीत्या हि **''सांख्ययोगौ प्रकीर्तितौ ॥**

---

१.भग.गीता तत्त्वदीपिका २।१।१-६

**त्यागात्यागविभागेन सांख्ये त्यागः प्रकीर्तितः॥२१॥**
**अत्यागे योगमार्गो हि त्यागोऽपि मनसैव हि॥**
**यमादयस्तु कर्तव्या सिद्धे योगे कृतार्थता''[२] ॥२२॥**
इत्येवं हि तयोः रूपम् आचार्योक्तरीतिकम्॥
'सांख्ययोग'पदे तस्माद् योगो भिन्नार्थको मतः॥२३॥
**''आत्मप्रयत्नसापेक्षा विशिष्टा या मनोगतिः॥**
**तस्याः ईश्वरसंयोग 'योग'इत्यभिधीयते''[३] ॥२४॥**
सचैष 'योग'शब्दार्थः सर्वाध्यायैर्विवक्षितः॥
ततोऽर्जुनः श्रीकृष्णेन साकं युक्तो विषादतः॥२५॥
विषादयोगताह्वस्य तस्माद् युक्ता न संशयः॥
चित्तवृत्तिनिरोधाख्ये योगेत्वन्यथा कथा॥२६॥
विषादक्लिष्टचित्तस्य युक्तता सा कथं भवेत्॥
उभौ भिन्नार्थकौ 'योग'शब्दौ तस्मादिहोदितौ॥२७॥
सांख्यन्तु पुनरन्योन्यमिश्रणादेकरूपताम्॥
गतयोः भेदसंख्यानं 'सांख्य'शब्देन द्योत्यते॥२८॥
देहात्मनोः विवेकेन मिथो बोधेन सिद्ध्यति॥
तस्माद् विषादजातस्य वैराग्यस्य तु मोहता॥२९॥
पृथगात्मस्वरूपोपदेशेन विनिवार्यते॥
युद्धक्रियायाः दुष्टत्वं क्रियाकारकदोषतः॥३०॥
शस्त्रास्त्राभ्यां प्रहारेण हिंसा युद्धक्रिया मता॥
सा चतुर्धा भवेद् दुष्टा युधिकर्मस्वरूपतः॥३१॥
वधवध्यस्वरूपस्य विचारेणापि दुष्टता॥
युद्धे निषिद्धरीत्यातु धर्म्ये युद्धेऽप्यधर्मता॥३२॥
अतोहि युद्धकर्तुश्च बोधो सांख्ये विवक्षितः॥

२.बालबोध ६,९
३.विष्णुपुरा.६।७।३१



तथैव कर्मभूतानां योद्धव्यानां स्वरूपतः॥३३॥
युद्धस्य रीतिफलयोः योगस्यास्त्युपदेश्यता॥
तत्सिद्धौ च स्थिता प्रज्ञा सैषा ब्राह्मी स्थितिर्मता॥३४॥
प्रतिपाद्यार्थस्य चेत्थं क्रमोऽत्र विनिरूपितः॥
श्लोकसंख्यानुसारेण पूर्वोक्तार्थोपनेयता॥३५॥
उपनिषदां गवां दुग्धं यच्चेहास्त्यमृतोपमम्॥
दोग्धुः कृष्णस्य हि मुखान्निसृतम् इतएव हि॥३६॥
तत्रादौ ये हि योद्धव्याः ते देहा देहिनोऽथवा॥
श्लोकैकादशादग्रे पञ्चश्लोकेषु चोक्तवान्॥३७॥
देहानां देहिनां वापि मर्त्यत्वमविवेककृत्॥
मृत्युः प्राणवियोगात्मा संयोगः कृत्रिमस्तु सः॥३८॥
सच्चिदंशौ तु भिन्नौ वै मृत्युर्नैकतरस्य हि॥
तयोरेकत्वबुद्धिस्तु मिथ्यैवाभिमतिस्तदा॥३९॥
ब्रह्मण्यंशिनि पार्थक्येनैवमुद्गमएतयोः॥
संयोगस्त्वेतयोः नित्यो न वै स्रष्ट्रा कृतो मतः॥४०॥
मिथ्याभिमतिभातोऽतोऽनित्ये का परिदेवना?॥
देहिनो यदि योद्धव्याः शस्त्रास्त्राभ्यां न तत्क्षयः॥४१॥
**सतस्त्वात्मनः तावद् अभावो नैव सम्भवः॥**
**अन्तवन्त इमे देहा नित्यस्योक्ताः शरीरिणः[४] ॥४२॥**
इत्यादि भेदसंख्यानं श्लोकात् पञ्चदशात्तु वै॥
आरभ्य विंशतिं यावद् मोहाभावाय वर्णितम्॥४३॥
योद्धरूपविचारेऽपि सैष न्यायः प्रवर्तते॥
श्लोकैकविंशादाराभ्य यावत्पञ्चविंशति॥४४॥
तस्माद् युद्धक्रियाकर्मकर्तृचिन्तनतो मुधा॥
विषादो वाथ वैराग्यं, युद्धे पार्थाय देशितम्॥४५॥

४.द्रष्ट.भग.गीता २।१६-१८

योद्धव्यमृत्युरूपं हि फलं युद्धस्य यद्यपि॥
तत्तु युद्धाद् विरत्यापि कोत्र वारयितुं क्षमः॥४६॥
इति षड्विशमारमारभ्य श्लोकद्वयनिरूपितम्॥
योद्धव्यरूपमीमांसोपसंहृतिरतो द्वयात्॥४७॥
युद्धस्य धर्म्याधर्म्यत्वदोषादोषविचिन्तने॥
कर्मनैयत्यसाफल्ये ऐहिकं पारलौकिकम्॥४८॥
विचार्य वर्णिता सार्धश्लोके त्वितिकर्तव्यता॥
ततश्चैकोनचत्त्वारिंशादारभ्य ह्युपक्रमः॥४९॥
कर्मकौशलरूपस्य योगस्याथोपपादनम्॥
अत्यागे योगमार्गो हि त्यागस्तु मनसैव हि॥५०॥
कर्तृत्वाहंकृतेस्त्यागः फलत्यागोऽपि कर्मणः॥
इतिकर्तव्यता सैषा युद्धे पापनिवर्तिका॥५१॥
चतुःपञ्चाशततमे जिज्ञासा पूर्वद्योतिता॥
योगिनः स्तिथप्रज्ञस्य विषये हृद्गता शुभा॥५२॥
भगवान् नवभिः श्लोकैः वर्णयित्वा तु मानसः॥
वाचिकं कायिकञ्चापि व्यवहारं हि योगिनः॥५३॥
द्वाषष्ठिश्लोकमारभ्य तथा श्लोकद्वयेन हि॥
अयोगिनोऽपि स्वरूपं योगिनश्च तथा पुनः॥५४॥
उपसंहारश्लोके हि स्थितिं ब्राह्मीं हि जीवताम्॥
अन्ते ब्रह्मनिर्वाणसमवाप्तिफलां सदा॥५५॥
उक्त्वा चिदंशजीवात्मा सच्चिदानन्दब्रह्मणः॥
आनन्दस्य हि क्षुद्रायाः मात्रायाश्चोपजीवनात्॥५६॥
स्वरूपस्थतया सोऽपि कृतार्थत्वेन चोदितः॥
स्वात्मसौख्यं हि सर्गान्तं यावद् भुक्त्वा प्रलीयते॥५७॥
सृष्टेः सच्चिदंशानां लयश्चांशिनि जायते॥



**( उपसंहारः )**

द्वितीयाध्यायसंक्षेपः व्याख्येयविषयक्रमात्॥५८॥
वर्णितोऽत्र मयाचार्यकृपया बालबुद्धिना॥
यद्यदुष्टोऽथवादुष्टो वाञ्जलिः कृष्णपादयोः॥५९॥

इति श्रीमद्भगवद्गीताद्वितीयाध्यायप्रतिपाद्यसंक्षेपः
गोस्वामिश्रीदीक्षितात्मजेन श्याममनोहरेण कृतः
सम्पूर्णः

॥ श्रीकृष्णाय नमः ॥

॥ श्रीमदाचार्यचरणकमलेभ्यो नमः ॥

## ॥ तृतीयाध्यायप्रतिपाद्यसंक्षेपः ॥

### ( मंगलाचरणेनोपक्रमः )

कर्मकृपे दक्षिणवामदृष्टी
स्वांशान् विभागेन हि दृष्टुकामः॥
जीवेषु दैवेषु तु मार्गयुग्मं
मोक्षाय बन्धाय तृतीयमसृजत्॥१॥
स एकएवात्र द्वितीयवर्जितः
स्वकर्तृभावात्तु विषादग्रस्तं॥
त्रातुं सखायं किल कर्मयोगं
जगाद् सर्वात्मकसर्वबन्धुः॥२॥
सएव कृष्णः शरणं मदीयः
सदा हि सर्वत्र च सर्वकर्मसु॥
तेनोपदिष्टस्य विचिन्तनेऽपि
तमेकमेवं शरणं व्रजामि॥३॥

### ( श्लोकवक्तृसंख्याविभागः )

अध्यायोपक्रमः पार्थपद्ययुग्मेन वर्णितः॥
ततउर्ध्वं पञ्चत्रिंशं यावत् प्रत्युत्तरं मतम्॥४॥
भगवद्वचनैस्तत्र पार्थशंकैकपद्यगा॥
सप्तत्रिंशाद् आसमाप्तिं भगवद्वचनानि हि॥५॥
एवं हि त्रिचत्वारिंशच्छ्लोकैरध्यायवर्णने॥
कर्मयोगोपदेशाय तृतीयाध्यायसम्मतः॥६॥



### ( अध्यायप्रतिपाद्यअधिकरणांगविमर्शः )

कालः कर्मस्वभावश्च प्रधानपुरुषौ तथा॥
पञ्चात्मकेऽक्षरे धाम्नि पुरुषोत्तम राजते॥७॥
कालश्चेष्टा तस्य कर्म ह्यनाकस्मिकवारकम्॥
तेन जाता क्रिया जीवे शुभाशुभफलप्रदा॥८॥
तत्सामर्थ्यप्रपन्नाभ्यां जीवानामीशयोजनम्॥
कर्मयोग इति ख्यातस्तृतीये विषयो मतः॥९॥
संशयः पार्थबुद्धौ वै बुद्धिश्चेद् ज्यायसी यदि॥
कुतः कर्मणि घोरे हि नियोजयति केशवः॥१०॥
पूर्वपक्षस्तु वचनानि व्यामोहैकपराणि हि॥
सिद्धान्तं भगवानाह व्यामोहननिवारकम्॥११॥

### ( श्लोकप्रतिपाद्यविषयविभागः )

भगवद्वचने तावद् व्यामोहविनिवारके॥
निष्ठाद्वयविधानेन सांख्ययोगविचारतः॥१२॥
ज्ञानयोगः कर्मयोगः इति द्वेधा द्वयोरपि॥
उभयोः कर्मणां त्यागस्त्वश्रेयस्करएव हि॥१३॥
सृष्टिः कर्तुः कर्मजाता ह्यंशिनो हि यदा तदा॥
अंशानां कर्मराहित्यं नेह सम्भवति क्वचित्॥१४॥
प्रकृतिस्तु क्रियारूपा ज्ञानात्मा पुरुषो मतः॥
संयोगादुभयोः सृष्टिः कालकर्मप्रचोदिता॥१५॥
कर्मकर्तृत्वमेवं हि जीवे सांयोगिकं मतम्॥
द्विविधं कायिकं चापि तथा मानसिकं पुनः॥१६॥
कर्मेन्द्रियैः कायिकं वै मनसा मानसिकं तथा॥
कर्मेन्द्रियाणां संयमेन मनो नो संयतं भवेत्॥१७॥
तेनैतत् मिथ्याचरणं कर्मत्यागात्मकं मतम्॥

मनसो नियमेनैव कर्म यद् बहिरिन्द्रियैः ॥१८॥
क्रियमाणं न मिथ्या स्याद् कर्मयोगस्त्वयं मतः ॥
तदत्र कर्मनिर्वाहो नियतानान्तु कर्मणः ॥१९॥
मनोनिरोधतो ज्ञेयो यज्ञभावनया पुनः ॥
लोकसंग्रहभावेन लीलाऽनुकरणेन च ॥२०॥
अज्ञेष्वितरजीवेषु बुद्धिभेदाकरेण च ॥
इन्द्रियाणीन्द्रियार्थेषु नियतं संगतानि हि ॥२१॥
मनश्चाञ्चल्यतो विद्वान न तत्रानुगतो भवेद् ॥
यस्यैवं कर्मजा सृष्टिः लीलारूपेह सम्मता ॥२२॥
तस्मै स्वकर्मसंन्यासात् कर्मत्यागो हि श्रेयसे ॥
इत्येवमत्र श्लोकानां पञ्चविंशतिभिः पुनः ॥२३॥
त्रिंशच्छ्लोकपर्यन्तं कर्मानुष्ठेयतां जगाद् ॥
एतस्मादन्यथाबुद्धिः सर्वज्ञानविमूढता ॥२४॥
भगवन्मतस्यानुष्ठात् स्वधर्मपरिनिष्ठता ॥
अन्यथा परधर्म स्याद् सर्वथैव भयावहः ॥२५॥
इत्येवं पञ्चभिश्श्लोकैः फलश्रुतिरुदीरिता ॥
तत्र पार्थस्य शंकेयं सृष्टौ ये तु समुद्गताः ॥२६॥
कथं ते सृष्टिनियमातिक्रमे सक्षमाः पुनः ॥
षट्त्रिंशच्छ्लोकशंकाया समाधानमुवाच ह ॥२७॥
पद्यैश्चर्तुभिः भगवान् श्लोकेष्वग्रिमेषु वै ॥
सृष्टौ हि कामक्रोधादि जीवे प्रकृतियोगतः ॥२८॥
रजोगुणोपप्लवेन कामक्रोधसमुद्भवः ॥
प्रकृतेर्गुणसंयोगात् कर्तृत्वं त्रिगुणात्मकम् ॥२९॥
रजोगुणोपप्लवेन कामस्तेन गुणाः पुनः ॥
विवर्धन्ते हि लीलेयं प्राकृता सांख्यबुद्धिना ॥३०॥
एतञ्चात्मगतं मत्वा ध्यानेनैवं वियुज्यते ॥



विषयेन्द्रियमनोबुद्धिगतं कामं जयेत् पुनः ॥३१॥
यत्नेन मत्वा चात्मानं परमेवं हि मुच्यते ॥
अन्यथा कामबद्धो हि न च श्रेयोऽनुपश्यति ॥३२॥

**( उपसंहारः )**

इत्येवं तृतीयाध्याये कर्मयोगस्य साधनम् ॥
कृतं सखायै कृष्णेन युद्धकर्मणि प्रेरणम् ॥३३॥

इति श्रीमद्भगवद्गीतातृतीयाध्यायप्रतिपाद्यसंक्षेपः
गोस्वामिश्रीदीक्षितात्मजेन श्याममनोहरेण कृतः
सम्पूर्णः

॥ श्रीकृष्णाय नमः ॥

॥ श्रीमदाचार्यचरणकमलेभ्यो नमः ॥

## ॥ चतुर्थाध्यायप्रतिपाद्यसंक्षेपः ॥

### ( मंगलाचरणेनोपक्रमः )

ज्ञानेन कर्मसंन्यासाद् ब्रह्मार्पणधियैव तु ॥
ब्रह्मतादात्म्यानुभूतेरुपदेष्टॄन् नमाम्यहम् ॥१॥

### ( श्लोकवक्तृसंख्यानिरूपणम् )

तुर्येऽध्याये त्रिभिश्लोकैरेतस्यैव ह्युपक्रमः ॥
विवस्वान्मन्विक्ष्वाकुपारम्पर्यागतस्य वै ॥२॥
कृष्णेन भगवता चोक्तः सख्ये भक्ताय सर्वतः ॥
उपक्रमे तु ज्ञानस्य स्तुतिरेवमुदीरिता ॥३॥
सख्यभावात्तु सन्देहः सख्यौ समभवत् तदा ॥
अवतीर्णस्य कृष्णस्य कथमाद्योपदेष्टृता ? ॥४॥
अर्जुनेन कृतः प्रश्नः श्लोकेनैकेन चात्रहि ॥
शिष्टैस्तु सर्वश्लोकैर्हि अध्यायार्थोपदेशना ॥५॥

### ( अध्यायाधिकरणांगविमर्शः )

पूर्वाध्याये मिथो ज्ञानकामयोः नित्यवैरिता ॥
“**आवृतं ज्ञानमेतेन ज्ञानिनो नित्यवैरिणा ॥६॥**
**कामरूपेण कौन्तेय दुष्पूरेणानलेन च**”[१] ॥
इत्येवं ज्ञाननाशो हि यथा कामेन नो भवेत् ॥७॥
तादृज्ज्ञानोपदेशाय चतुर्थाध्याय उद्यमः ॥
विषयोऽयं संशयोऽत्र सिद्ध्येद् ज्ञानं कथं पुनः ॥८॥

१.भग.गीता ३।३९



इन्द्रियग्राह्यजगति ह्यनित्ये कामवर्धके ॥
नित्यज्ञानेन बोध्यस्य बोधः शक्यः कथं भवेत् ? ॥९॥
दुःशकः कामघातो हि उपायाभावतः सदा ॥
इति प्राप्ते पूर्वपक्षे पारम्पर्यागतं तु यद् ॥१०॥
ज्ञानं तत् चेतरं तावद् इन्द्रियैर्जातमित्यपि ॥
अनित्यं प्राकृतं तद् वै जायते प्रकृतेर्वशात् ॥११॥
अवतीर्णस्वरूपस्य प्राकृतानुकृतिः परम् ॥
प्रकृतिं तां वशीकृत्य न जातु प्रकृतेर्वशात् ॥१२॥
प्रकृतावप्राकृतस्य निदर्शनविनिश्चयः ॥
प्रकृत्यतीतसत्ताचेतनोपादानकं जगत् ॥१३॥
यथाऽविकृतस्वर्णाद् वै कुण्डलविकृतिः पुनः ॥
स्वर्णजाकृति सौवर्णी स्वर्णे चान्ते लयक्षमा ॥१४॥
रूपनामकर्मभेदभिन्ना सृष्टिरियं तथा ॥
सच्चिदानन्दतो जाता तस्मिन् तत्र लयक्षमा ॥१५॥
तद्ब्रह्मणोऽद्वितीयत्वाद् ज्ञानं कामोऽथवा पुनः ॥
स्वतोऽन्यविषयाभावादात्मरत्यानुभावकौ ॥१६॥
सैवात्मरति जीवेषु स्वभिन्नविषयोद्भवा ॥
कामरूपा दुःखरूपा सच्चिदाच्छादिका मता ॥१७॥
तत्त्वाज्ञानन्तु तद् ह्येतज्ज्ञानेन विनिवार्यते ॥
कामानां ग्रन्थिशैथिल्याद् आत्मरत्या प्रसीदति ॥१८॥
अयमुत्तरपक्षस्तु यः कृष्णेनार्जुनं प्रति ॥
कथितो ज्ञानयज्ञात्मा सर्वशुद्धिविधायकः ॥१९॥
ब्रह्मैक्याग्नौ द्वैतबुद्धेराहुत्यात्मरतिः सदा ॥
प्रादुर्भवति संसारे लीलया द्वैतदर्शके ॥२०॥
ब्रह्मात्मरतिप्राकट्यात् ब्रह्मैक्यज्ञानतः सदा ॥

**“तत्र को मोहः कश्शोकः एकत्वमनुपश्यतः”** [२] ॥२१॥
श्रुत्युक्तैक्यस्य विज्ञानाद् सर्वविज्ञानसंभवः ॥
एतेन कामाहंकृत्योः तदात्मरतिज्ञानयोः ॥२२॥
उपलब्ध्योभयोः वैरं नित्यमेवोपशाम्यति ॥
एवमध्यायपञ्चांगोपेतबोधोऽयमीरितः ॥२३॥
तत्रोदाहरणायेह वर्णातीतपरः पुमान् ॥
उक्तः पुरुषसूक्ते यः चतुर्वर्णांगकोपि सः ॥२४॥
**“ब्राह्मणोऽस्य मुखमासीद् बाहू राजन्यः कृतः ॥**
**ऊरू तदस्य यद् वैश्यः पद्भ्यां शूद्रो अजायत”** [३] ॥२५॥
श्रुत्युक्तचातुर्वर्ण्यस्य नियन्तृदेवतांगवान् ॥
नृषु तज्जन्मसंस्कारकर्मवृत्त्यादिभिस्तथा ॥२६॥
निर्वाहे देवतावेशे वर्णधर्माधिकारिता ॥
न चिन्मात्रात्मनो वर्णः कोऽपि वक्तुं हि शक्यते ॥२७॥
वर्णधर्मे नियोज्याः ये ते च मिथ्याभिमानतः ॥
सोप्यत्र शुद्धचैतन्ये तस्यैवाहन्तया स्थितेः ॥२८॥
**“भूमिरापोनलो वायुः खं मनो बुद्धिरेव च ॥**
**अहंकार ईतीयं मे”** [४] गीतावाक्यप्रमाणतः ॥२९॥
मिथ्याहंममताभ्रान्तिः चिदंशे तस्य लीलया ॥
भगवानेवात्र जीवेष्वहंकारतया स्थितः ॥३०॥
**“भूतैर्भूतानि भूतेशः सृजत्यवति ह्यन्त्यजः ॥**
**आत्मसृष्टौ स स्वतन्त्रैः अनपेक्षोऽपि बालवत्”** [५] ॥३१॥
भासते जीवगो यस्माद् धर्मकर्तुरकृतृता ॥

२.ईशा.उप.७
३.पु.सू.३
४.भग.गीता ७।४
५.भाग.पुरा.६।१५।६



न वर्णाहंकृत्यभावे वर्णधर्माधिकारिता ॥३२॥
**“न कर्तृत्वं न कर्माणि लोकस्य सृजति प्रभुः ॥**
**न कर्मफलसंयोगं स्वभावस्तु प्रवर्तते”** [६] ॥३३॥
भगवतोऽनेकरूपाणां संघातादैक्यधी भ्रमः ॥
जीवस्याल्पज्ञानवशात् ऐक्यधीभ्रान्तिवर्णता ॥३४॥
एवं भगवति वर्णहेतुत्वेऽपि ह्यकर्तृता ॥
जीवेऽपि भ्रान्त्या कर्तृत्वं वस्तुतो नहि कर्तृता ॥३५॥
ब्राह्मणाद्याः जातयो न, ब्राह्मैक्येन विरोधतः ॥
**“जाति-व्यक्ति-विभागोऽयं यथा वस्तुनि कल्पितः”** [७] ॥३६॥
इति भागवतोक्तत्वाद् जातिवादो न सम्मतः ॥
समानवर्णस्त्रिपुंसोः जातस्तज्जातिमान् शिशुः ॥३७॥
इति चेद् नियतव्यञ्जकाभावाद् नोपपद्यते ॥
तस्माद् यथोक्ताचरणाद् वर्णदेवस्य संनिधिः ॥३८॥
अनाचारात् तिरोधानाद् न वर्णी देहदेहिनौ ॥
ततश्चाहमतिर्मिथ्या तत्कृता वर्णधर्मिता ॥३९॥
तद्धर्मफलकामोऽपि वस्तुतो जीवगो नहि ॥
परस्यात्मरतेरेवोद्गमाद् जीवेन्द्रियादिषु ॥४०॥
अल्पज्ञत्वेनेन्द्रियार्थे कामभावोद्भवो मतः ॥
सकामजीवबुद्धौ हि जन्यज्ञानविघातकः ॥४१॥
कामस्य संयमे बुद्धौ स्थैर्ये हि स्थितप्रज्ञता ॥
भगवल्लीलया ज्ञानकामौ तौ सगुणौ मतौ ॥४२॥
तन्मात्राभिः प्राकृताभिः ज्ञानकामौ हि रञ्जितौ ॥
न तज्जीवस्य शुद्धस्य स्वप्रकाशचितः क्वचित् ॥४३॥
तथापि मतिस्थैर्ये तु नष्टप्राया हि वैरिता ॥

६.भग.गीता ५।१४
७.भाग.पुरा.६।१५।८

ज्ञानकामगता नूनमुपायोयमुदीरितः ॥४४॥
ज्ञानेन कर्मसंन्यासो ब्रह्मार्पणधिया कृतः ॥
जीवस्येश्वरेणैवं योगाय चोपपद्यते ॥४५॥
एतज्ज्ञानेन सहितः कर्मन्यासोऽथ कर्म वा ॥
आत्मानोहंकृतेः कामाद् मोक्षदानाक्षमः सदा ॥४६॥
"**कर्ता शास्त्रार्थवत्वाच्च**"[८] सूत्रप्रामाण्यनाशनम् ॥
इति चेत् श्रुणु कर्तृत्वमूलोऽहंकारएव हि ॥४७॥
भगवद्रूपो ह्यमिथ्या तत्संकल्पात्तु जीवगः ॥
तेनैक्यरूपाद् भासमाना स्वीयता भ्रान्तिरेव हि ॥४८॥
तस्य ब्रह्मात्मतादृष्टिः न मिथ्या पारमार्थिकी ॥
स्वकीयत्वमतिर्भ्रान्ता तस्यैवाहंकृतेरतः ॥४९॥
ततश्च जन्मकर्मादि भूमौ भगवतोऽपि वै ॥
मायिकं मनुते जीवो कृतकर्मविकर्मता ॥५०॥
तेन कर्मादियोगानां परप्रापकवर्त्मनाम् ॥
स्वाहंकारकृताभासाद् अब्रह्मत्वान्यथामतिः ॥५१॥
वस्तुतस्त्ववतीर्णस्य सर्वशक्तिमतो यथा ॥
तदुद्धारकशक्तीनामाविर्भावः चिदात्मनि ॥५२॥
अंशे चेत्यहंकारफलकामकृते यदा ॥
स्वकृतत्वमोहमुक्तौ तल्लीलास्फूर्तिसम्भवः ॥५३॥
कर्मण्यकर्मदर्शनं यत् कर्ता कारयिता प्रभुः ॥
तत्कारितक्रियाकर्तुः मोहोऽयुक्तो ह्यहंकृतौ ॥५४॥
कर्मबुद्धिनिवृत्तेर्हि ज्ञानेप्येवं हि कल्पना ॥
गीतायामतएवोक्ता कृष्णेन ब्रह्मभावना ॥५५॥
"**ब्रह्मार्पणं ब्रह्म हविः ब्रह्माग्नौ ब्रह्मणा हुतम् ॥**

८.ब्र.सू.२।३।३३



**ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्मसमाधिना**"[९] ॥५६॥
कर्मणि ब्रह्मतादृष्टिः ज्ञानभक्त्युपलक्षणम् ॥
ब्रह्मज्ञाता ब्रह्मज्ञानं ज्ञानोपकरणं तथा ॥५७॥
ज्ञेयं ब्रह्म ज्ञानफलं सर्वं ब्रह्मात्मकं मतम् ॥
भजनीयो भक्तिभावो ब्रह्म भक्तस्तदंशकः ॥५८॥
भक्तिस्तस्यैवात्मरतिः माहात्म्यज्ञानपूर्विका ॥
स्रग्गन्धवासोऽलंकारनैवेद्यादि निवेदितम् ॥५९॥
परस्मै ब्रह्मणे सर्वब्रह्मतासाधकं मतम् ॥
तदुक्तं श्रीमदाचार्यचरणेन हि समर्पणात् ॥६०॥
सर्वेषां ब्रह्मता सिद्धान्तरहस्यतया मुखात् ॥
एतदाप्यायनं प्रोक्तमंगानां सर्वतस्ततः ॥६१॥
वाक्प्राणचक्षुश्रोत्राणाम् इन्द्रियाणां बलस्य च ॥
सर्वस्य ब्रह्मता यद्वद् ऐतदात्म्यमिदं समम् ॥६२॥
"**सर्वं ब्रह्मोपनिषदमनिराकार्यमेव हि ॥**
**निरते चात्मनि ह्येवं प्रोक्ता य उपनिषत्सु वै ॥६३॥**
**धर्माः**"[१०] प्रादुर्भवन्त्येव जीवे तत्र समर्पणात् ॥
न्यासवद् यज्ञकर्माणां ब्रह्माग्नावाहुतिः सदा ॥६४॥
एवं बहुविधा यज्ञाः वितताः ब्रह्मणो मुखे ॥
कर्मजानपि तावेवं ज्ञात्वा ब्रह्मणि मुच्यते ॥६५॥
अयं हि ज्ञानयज्ञो वै श्रेयानन्यैस्तथा पुनः ॥
ज्ञानिभिश्चोपदेश्योऽयं ब्रह्मतादात्म्यधीर्यथा ॥६६॥
तदुक्तं भगवतैवात्र ज्ञानयज्ञप्रशंसया ॥
"**येन भूतान्यशेषेण द्रक्ष्यस्यात्मन्यथो मयि**"[११] ॥६७॥

९.भग.गीता ४।२४
१०.केनोप.१।१
११.भग.गीता ४।३५

एवं ज्ञानेन जातो यः कर्मसंन्यासएव वा॥
भगवत्यर्पणाद् योगो अंशांशियोजनात्मकः॥६८॥
न विभक्तांशता पूर्वमज्ञानेन विभाजनम्॥
लीलयातु नामरूपकर्मणां हि विभाजनम्॥६९॥
तदज्ञानन्तु ज्ञानेन प्राप्या यैवाविभक्तता॥
तादात्म्यरूपा सा चात्रवतारोऽत्र निदर्शनम्॥७०॥
अवतीर्णजन्मकर्माणि दिव्यानि कथमित्यपि॥
**"अजोऽपि सन्नव्ययात्मा भूतानामीश्वरोऽपि सन्॥**
**प्रकृतिं स्वामधिष्ठाय सम्भवाम्यात्ममायया"**[१२]॥७१॥

### ( प्रतिपाद्यविषयश्लोकसंख्या )

एवमस्मिन् पार्थशंकानिरासवचने क्रमः॥
आदौ चतुर्भिश्श्लोकैस्तु दिव्यता जन्मकर्मणोः॥७२॥
जगाद यस्य ज्ञानेन जीवो मुच्येत मोहतः॥
ततश्चैकेन श्लोकेन ह्येतज्ज्ञानेन ज्ञानिनः॥७३॥
भगवद्भावमुपगताः स्तुतिरेवं निरूपिता॥
ततः श्लोकद्वयेनात्र बहुधात्तस्वरूपतः॥७४॥
येषु यस्य यथा बुद्धिः तथा तस्य तथागतिः॥
कर्मसंन्यासयोगाय ह्यकर्तृत्वं हि कर्तरि॥७५॥
अकामे फलवत्कर्मकृतौ स्वस्य निदर्शनम्॥
तथांशिनोऽभिज्ञानेन तदीयांशेऽपि सन्मतिः॥७६॥
ज्ञानयोगेन तद्बुद्धौ कुतो नो सम्भवेदिह!॥
ततः श्लोकेन चैकेन पूर्वेषामपि साक्षिता॥७७॥
वर्णिताश्वासनायैव येन मोहो निवर्तते॥
सख्युः पार्थस्य पश्चात्तु कर्माकर्मविकल्पना॥७८॥

---

१२.भग.गीता ४।६



श्लोकैरष्टभिश्चान्ते ब्रह्मणेऽर्पणयोगतः॥
उत्कृष्टतास्य योगस्य चोक्त्वा वैविध्यमेव च॥७९॥
यज्ञानां षड्विधानान्तु वर्णना तेषु श्रेष्ठता॥
द्रव्ययज्ञस्तपोयज्ञयोगयज्ञास्तथापरे॥८०॥
स्वाध्यायज्ञानयज्ञाश्च प्राणापानदियाजनम्॥
कर्मजान् निखिलानेतान् दशभिः प्रभुरुक्तवान्॥८१॥
ज्ञानयज्ञस्य श्रैष्ठ्यं हि ततः पुनरभाषत॥
तज्ज्ञानप्राप्त्युपायश्च फलञ्चापि चतुष्टयात्॥८२॥
तस्य तादात्म्यज्ञानेन सर्वं ब्रह्मात्मकं भवेत्॥
बोधयित्वार्धश्लोकैस्तु चतुर्भिश्चैव शंसना॥८३॥
श्रद्धाज्ञानयोरुक्त्वाऽश्रद्धाज्ञानसंशयाः॥
हेया इत्युपसंहारे पुनर्ज्ञानप्रशंसनम्॥८५॥

### ( उपसंहारः )

चतुर्थाध्यायप्रतिपाद्यविषयोऽयं यथामतिः॥
वर्णितोऽत्र मया स्वस्य बुद्धिसंशोधनाय हि॥८६॥
दुष्टो वा यदि वादुष्टो भक्तिभावेन भूरिशः॥
महाप्रभुप्रभोरंघ्रावञ्जलिरर्पितो मुदा॥८७॥

इति श्रीमद्भगवद्गीताचतुर्थाध्यायप्रतिपाद्यसंक्षेपः
गोस्वामिश्रीदीक्षितात्मजेन श्याममनोहरेण कृतः
सम्पूर्णः

॥ श्रीकृष्णाय नमः ॥

॥ श्रीमदाचार्यचरणकमलेभ्यो नमः ॥

## ॥ पञ्चमाध्यायप्रतिपाद्यसंक्षेपः ॥

### ( मंगलाचरणेनोपक्रमः )

सर्वातीतः सर्वसमः नाम्ना रूपेण कर्मणा ॥
दोषैः सर्वैरसंस्पृष्टो यश्चाध्यायोपदेशकः ॥१॥
सखायमर्जुनं कर्मसंन्यासं चोपदिष्टवान् ॥
कर्मयोगञ्च प्रेम्णा तं नौमि स्वमतिशोधकम् ॥२॥

### ( श्लोकसंख्याकर्तृविभागः )

कर्मणां करणत्यागौ योगेनैवोदितावुभौ ॥
श्रेयः कतरयोरेकपद्येनार्जुनसंशयः ॥३॥
शिष्टैरष्टाविंशतिभिः श्लोकैरध्यायगैः पुनः ॥
भगवद्वचनान्यत्र चाध्यायेऽस्मिन् मतानि हि ॥४॥

### ( प्रतिपाद्यविषयाधिकरणांगविमर्शः )

श्रेयस्करावुभौ नोभौ सन्दिग्धविषयो मतः ॥
पूर्वपक्षः कथमुभौ ? सिद्धान्ते तु मतावुभौ ॥५॥
तथापि कर्मसंन्यासात् कर्मयोगो विशिष्यते ॥
**''ज्ञेयः स नित्यसंन्यासी यो न द्वेष्टि न कांक्षति** ॥६॥
**निर्द्वन्द्वो''**[१] ब्रह्मसदृशः सर्वबन्धात्प्रमुच्यते ॥
पूर्वाध्याये भगवता चोक्तं तेनात्र संगतिः ॥७॥
**''योगसंन्यस्तकर्माणं ज्ञानसंछिन्नसंशयम्** ॥
**आत्मवन्तं न कर्माणि निबध्नन्ति धनञ्जयः''**[२] ॥८॥

---

१. भग. गीता ५।३
२. भग. गीता ४।४१



जिज्ञासायाः बीजमिदं समाधानन्तु तस्य वै ॥
उभयोर्हि समत्वेपि योगानुष्ठितयोः परम् ॥९॥
सांख्ये निजात्मरूपस्य ज्ञानेन कर्मन्यासिता ॥
अभोक्तृत्वादात्मनो वै विषयाणामभोग्यतः ॥१०॥
भोक्तृत्वाभावतः कर्मत्यागाच्चेत् कृतकृत्यता ॥
तथापि योगतो लीलेन्द्रियाणां विषयार्थिता ॥११॥
नात्मन इति युक्ता धीर्योगिनां सुखदा शुभा ॥
कर्मकर्तृत्वभोक्तृत्वे चिदंशे लीलया मते ॥१२॥
ब्रह्मस्वरूपाज्ञानात्तु स्वीयमत्या हि बन्धनम् ॥
भगवदीयत्वमत्या तु न्यस्तं तस्मिन् भवेत् पुनः ॥१३॥
न्यासो ब्रह्मार्पणधिया कर्तुर्भोक्तुश्च सिध्यति ॥
तत्रोदाहरणं भगवान् लीलायां बृहति पुनः ॥१४॥
कालकर्मस्वभावैश्च सृष्टौ स्वांशे तिरोहितः ॥
तेनात्मसु स्वकर्तृत्वभोक्तृत्वस्फुरणं मतम् ॥१५॥
एवं तयोरकर्तापि सर्वकर्ता सएव हि ॥
स्वांशैरेवं समोऽपि सन् विषमोपि मतः सदा ॥१६॥
लीलयाभिन्नभूतस्यैक्यं स्वाभाविकं मतम् ॥
लीलाभेदे तदात्यन्तभेदभानं भ्रमो यतः ॥१७॥
ब्रह्मस्वरूपज्ञानेन भ्रमः सर्वो निवर्तते ॥
कार्येषु कर्मसु चैवं भोग्येषु विषयेषु वा ॥१८॥
भेदधीवर्जितः साम्यं सर्वत्रैवानुभूयते ॥
कार्याकार्ये तथा भोग्याभोग्ये स्यात् समा मतिः ॥१९॥
करणत्यागयोश्चापि कर्मणां साम्यधीर्भवेत् ॥
प्रियाप्रियौ हर्षशोकौ तल्लीलादर्शकस्य वै ॥२०॥
समत्वयोगसम्प्राप्त्या ब्रह्मसाम्यं समश्नुते ॥
तेनैव ब्रह्मनिर्वाणं ब्रह्मभावेन सिध्यति ॥२१॥

अध्यायस्योपसंहारे चोक्तं भगवतैव हि॥
**''कामक्रोधवियुक्तानां यतीनां यतचेतसाम्॥२२॥**
**अभितो ब्रह्मनिर्वाणं वर्तते विदितात्मनाम्॥**
**स्पर्शान्कृत्वा बहिर्बाह्यान् चक्षुश्चैवान्तरे भ्रुवो॥२३॥**
**प्रणापानौ समौ कृत्वा नासाभ्यन्तरचारिणौ॥**
**यतेन्द्रियमनोबुद्धिः मुनिर्मोक्षपरायणः॥२४॥**
**विगतेच्छाभयक्रोधो यः सदा मुक्तएव सः''**[३]॥
सखायमर्जुनं युद्धाद् भीतं रुष्टं च शत्रुषु॥२५॥
युद्धाय विगतेच्छं च श्रेयप्राह महेश्वरः॥
अशक्तो यदि चेह स्याद् भोक्तारं परमेश्वरम्॥२६॥
कर्मतत्त्यागयोः यज्ञतपसोः हि महेश्वरम्॥
सुहृदं सर्वभूतानां ज्ञात्वा कृष्णं शमं व्रजेत्॥२७॥

## ( उपसंहारः )

पञ्चमाध्यायविषयसंक्षेपोऽयमुदीरितः॥
ब्रह्मसाम्येऽपि नौ कृष्ण! त्वद्वैलक्षण्यकाम्यया[४]॥२८॥

इति श्रीमद्भगवद्गीतापञ्चमाध्यायप्रतिपाद्यसंक्षेपः
गोस्वामिश्रीदीक्षितात्मजेन श्याममनोहरेण कृतः
सम्पूर्णः

३.भग.गीता ५।२६ - २८
४.चित्रं तवेहितम् अहोऽभितयोग -
मायालीलाविसृष्टभुवनस्य विशारदस्य।
सर्वात्मनः समदृशो विषमः स्वभावो
भक्तप्रियो यदसि कल्पतरुस्वभावः॥ ( भाग.पुरा.८।२३।८ )

॥ श्रीकृष्णाय नमः ॥

॥ श्रीमदाचार्यचरणकमलेभ्यो नमः ॥

## ॥ षष्ठाध्यायप्रतिपाद्यसंक्षेपः ॥

### ( मंगलाचरणेनोपक्रमः )

ध्येयः श्रीकृष्णएकः श्रद्धाभक्त्यन्तरात्मना॥
ज्ञेयः सएकएवात्र सर्वगः सर्वरूपधृक्॥१॥

### ( श्लोकवक्तृसंख्याविभागः )

अध्याये सप्तचत्वारिंशच्छ्लोकात्मके पुनः॥
द्वात्रिंशं यावदारम्भाद् भगवद्वचनेन वै॥२॥
ध्यानयोगोपक्रमोऽत्र तदुपायश्च वर्णितः॥
ततोहि पार्थजिज्ञासा मनश्चांञ्चल्यहेतुका॥३॥
मनसो निग्रहाभावात् साम्यबुद्धेर्ह्यशक्यता॥
वैराग्याभ्यासतः शक्या इत्थं शंकानिवारणे॥४॥
श्लोकैश्चतुर्भिरुक्त्वात्र जिज्ञासार्जुनस्य हि॥
योगाच्चलितस्यायतेः का गतिः स्यादिति पुनः॥५॥
चतुर्भिस्तत्समाधानं शेषैः श्लोकैरुदीरितम्॥
अध्यायसमाप्तिं यावत् श्रीकृष्णोक्तमिहोदितम्॥६॥

### ( प्रतिपाद्यार्थविमर्शः )

पद्यादौ कर्मसंन्यासः कर्मयोगस्य द्वावपि॥
फलाकाक्षां परित्यज्य कर्तव्ये कर्मणि भवेत्॥७॥
अतोहि योगसंन्यासौ रूपभेदेऽपि तत्त्वतः॥
काम्यसंकल्पराहित्ये ह्यभेदे पर्यवस्यतः॥८॥
द्वाभ्यामेवं तृतीये तु शमकारणकर्मणोः॥



आरूढतारुरुक्षातो विभागेनोदितं पुनः॥९॥
सर्वसंकल्पसंन्यासात् सिद्ध्येदारूढता तदा॥
कर्मस्विन्द्रियार्थेषु ह्यनासक्तो यदा भवेत्॥१०॥
पञ्चमे ह्यात्मनो ह्यस्मिन् आत्मनः शत्रुमित्रता॥
न ह्यात्मा स्वात्मनो द्वेषे ग्रस्तो भवितुमर्हति॥११॥
जितात्मा ह्यात्मनो बन्धुः स्वात्मशत्रुस्तु चान्यथा॥
सप्तमे ह्यात्मजयिनि परमात्मसमाहतिः॥१२॥
कथितौ यमनियमौ हि योगस्यांगतयात्र वै॥
प्रत्याहारस्तु तृप्तिर्हि ज्ञानविज्ञानतृप्तता॥१३॥
एकञ्च सप्तमाद् यावन्नवमं समतोदिता॥
जडाजडाभ्यां साकन्तु व्यवहारे युक्ततोक्तितः॥१४॥
दशमात्पञ्चदशं यावद् योगांगानां निरूपणम्॥
देशासनादेर्द्योतनेन शान्तिर्निर्वाणदायिनी॥१५॥
युक्ताहारविहृतौ च स्वप्नजागरणे तथा॥
दुःखहानौ चित्तस्थैर्ये निजात्मरमताफलम्॥१६॥
विंशत्युत्तरपद्येषु ह्यसम्प्रज्ञातरूपता॥
समाधिसाधिका यस्माद् भगवद्धामरूपता॥१७॥
त्रिभिश्लोकैर्वर्णितात्र ब्रह्मसंस्पर्शयोग्यता॥
ततः श्लोकद्वयेनेह ब्रह्मतादात्म्यबुद्धितः॥१८॥
मुक्तमोचकतादात्म्याद् द्वैते चैक्यानुदर्शनम्॥
तेन सर्वात्मभावेन नात्महान्या विमुक्तता॥१९॥
सदेहे वा विदेहे वा मोक्षेऽप्येका स्थितिर्मता॥
श्लोकद्वयेन कृष्णेन स्वसख्यै चोपदेशिता॥२०॥
अत्र पार्थस्य शंकैका स्थैर्ये मनसि चास्थिरे॥
निग्रहं दुष्करं तस्य द्वाभ्यां शंकानिवारणौ॥२१॥
वैराग्याभ्यासतः शक्यो ह्यन्यथा दुष्करः खलु॥

योगाच्चलितमनसोऽयते: स्यात् कीदृशी गति: ॥२२॥
पार्थप्रश्नश्चतुर्भिस्तु शिष्टैस्तस्य समाहति: ॥
अध्यायान्ते श्लोकयुग्मे चोदिता योगिश्रेष्ठता ॥२३॥
तत्रापि श्रद्धाभक्तिमत: तद्गतेनारात्मना ॥
भगवत्सम्मता युक्ततमता समुदीरिता ॥२४॥

**( अध्यायाधिकरणांगविमर्श: )**

ज्ञानयोगांगभूतस्य योगस्योपायवर्णने ॥
मुख्योऽत: प्रतिपाद्योऽत्र विषयो ध्यानयोगक: ॥२५॥
संशयोऽत्राधर्म्यवधोऽनुष्ठेयो ध्यानमेव वा ॥
पूर्वपक्षोऽर्जुनकृतोऽधर्म्यं गुर्वादिमारणम् ॥२६॥
सिद्धान्ते सांख्ययोगस्य भक्त्यंगस्य विचारणात् ॥
युद्धं धर्म्यं सर्वथैव भवितव्यं भविष्यति ॥२७॥
सर्वदुष्टादुष्टसमं मर्त्यामृतसमं पुन: ॥
व्यक्ताव्यक्तसमं ह्येकं निर्दोषं ब्रह्म [१] सर्वथा ॥२८॥
तद्ध्यानात् पुण्यपापानां नरकस्वर्गदायिनाम् ॥
बन्धनान्मुक्तजीवस्य [२] ब्रह्मसाम्योपलम्भिता [३] ॥२९॥
एतस्य ब्रह्मध्यानस्य योगस्यात्र निरूपणम् ॥
अध्यायारम्भतो द्वात्रिंशश्लोकेषु लभ्यते ॥३०॥
एवं ब्रह्मसाम्योपयोगियोगनिरूपणम् ॥
कृतं षष्ठे ध्यानयोगाध्याये चास्मिन् मनोरमे ॥३१॥

---

१.द्रष्ट.भग.गीता ५।१९ , द्रष्ट.बृह.उप.१।३।२२
२.द्रष्ट.श्वेता.उप.१।१०
३.द्रष्ट.मुण्ड.उप.३।१



**( उपसंहार: )**

षष्ठाध्यायप्रतिपाद्यसंक्षेपोऽयं निरूपित: ॥
ध्येयस्य कृष्णरूपस्य ध्यानैकार्थफलस्य वै ॥३२॥

इति श्रीमद्भगवद्गीताषष्ठाध्यायप्रतिपाद्यसंक्षेप:
गोस्वामिश्रीदीक्षितात्मजेन श्याममनोहरेण कृत:
सम्पूर्ण:

॥ श्रीकृष्णाय नमः ॥

॥ श्रीमदाचार्यचरणकमलेभ्यो नमः ॥

## ॥ सप्तमाध्यायप्रतिपाद्यसंक्षेपः ॥

### ( मंगलाचरणेनोपक्रमः )

भक्त्येकगम्यो भगवान् भक्तिश्च तदनुग्रहात् ॥
भगवान्भक्तिभक्ताश्च त्रयो भजनहेतुकाः ॥१॥
भक्तियोगस्य वक्तारं श्रीकृष्णं पुरुषोत्तमम् ॥
भक्त्यानम्य वृत्तिरूपषट्कव्याख्यां करोम्यहम् ॥२॥
श्रीकृष्णस्य ब्राह्मिकं यद् माहात्म्यं सप्तमोदितम् ॥
अधिभूतं तथाध्यात्मं ह्याधिदैविकमेव च ॥३॥
अधियज्ञात्मकं रूपं चतुर्विधमिहाष्टमे ॥
नवमे ज्ञानविज्ञाने राजगुह्येऽर्जुनाय वै ॥४॥
उपदिष्टे तद्विभूतीनां च वर्णनमत्र हि ॥
दशमे चैकादशे प्रत्यायनं श्रोतुः विराडिति ॥५॥
द्वादशे फलितार्थस्य भक्तिरूपस्य वर्णनम् ॥
वृत्तिरूपस्य षट्कस्य चैकवाक्यत्वसंगतिः ॥६॥

### ( श्लोकवक्तृसंख्याविमर्शः )

श्लोकानां त्रिंशतिरूपेऽध्याये चैतस्य वर्णनम् ॥
आद्यश्लोकद्वये कृष्णकृतश्चोपक्रमो मतः ॥७॥
सविज्ञानं हि यज्ज्ञानं तद्बोधेऽन्यस्पृहाक्षतिः ॥
श्लोके तृतीये दौर्लभ्यं तत्त्वज्ञानस्य चास्य वै ॥८॥
तुर्ये च पञ्चमे श्लोके द्वैविध्यं प्रकृतेस्तु यत् ॥
जडजीवात्मकं स्वस्य रूपद्वयमुदीरितम् ॥९॥
योनिरूपे तु प्रकृती अखिलप्राणिनामिह ॥



तस्य संकल्पसामर्थ्यं कर्तृवीर्यमुदाहृतम् ॥१०॥
षष्ठादारभ्य द्वादशं यावदत्र निरूपितम् ॥
कार्यभूतेषु सर्वेषु स्वस्यावस्थितिः बीजवत् ॥११॥
जडप्रकृतिभावेषु सात्त्विकादिषु द्योतिताः ॥
तथाभावो भगवतो भगवत्येव नान्यथा ॥१२॥
स्वानन्दात्स्वीयानन्दे तत्प्राकट्यं न तेषु हि ॥
स्वानन्दस्य तिरोधानात् सात्त्विके राजसे तथा ॥१३॥
तामसे चापि भावे हि मोहकत्वमुदीरितम् ॥
ततो भगवतोऽज्ञानात् भगवत्येवाप्रपन्नता ॥१४॥
गुणाधीन्येन सर्वेषां तन्मायेयं मतेदृशी ॥
त्रयोदशादितो निन्दाऽज्ञानां त्रिषु निरूपिता ॥१५॥
ततश्चतुष्षुश्लोकेषु चातुर्विध्यस्य वर्णनम् ॥
भगवन्तं हि भजतां ज्ञानी तेषूत्तमः परः ॥१६॥
यस्तत्सर्वात्मतां ज्ञात्वा तमेव भजते सदा ॥
अत्रान्यदेवताभक्ताः स्वप्रकृत्या हि कामतः ॥१७॥
तेभ्यश्च तत्फलानां तु प्रदाता भगवान् स्वयम् ॥
श्रद्धानिर्वाहकत्वेऽपि सान्तं तत्फलमेवहि ॥१८॥
इत्येवं विंशतेरूर्ध्वं पञ्चश्लोकेषु वर्णनम् ॥
योगमायावृतत्वोक्त्या स्वस्याज्ञातत्वमेव हि ॥१९॥
स्वस्य ज्ञानन्तु सर्वस्य वस्तुजातस्य कीर्तितम् ॥
सप्तविंशतिश्लोके तु सर्गे मोहो निरूपितः ॥२०॥
इच्छाद्वेषद्वन्द्वेन भूतानां सर्गवर्तिनाम् ॥
पुण्येन कर्मणा येषां पापनाशस्तु द्वन्द्वतः ॥२१॥
निर्मुक्त्या भजने दार्ढ्यम् अष्टाविंशतिपद्यगम् ॥
अन्ते तु स्वस्य आध्यात्ममधिदैवं तथा पुनः ॥२२॥
अधियज्ञं ब्रह्म चेति रूपाण्युद्देशकीर्तनम् ॥

प्रयाणकालेपि च तज्ज्ञाने हि युक्तता मता॥२३॥
द्वयोर्हि श्लोकयोश्चैवमुपसंहारवर्णनम्॥
षट्कादिमस्याध्यायस्य भगवता कृष्णेन हि॥२४॥

### ( अधिकरणांगविमर्श: )

भगवन्मुखैकगम्येऽस्मिन् संशयादेरभावत:॥
अधिकरणांगभूतानां पञ्चानां नात्र वर्णना॥२५॥

### ( प्रतिपाद्यविषय: )

संग्रामानुत्सुके पार्थे पूर्वे मोहनिवारणम्॥
कृतं हि सांख्ययोगाभ्यां वेदोक्तकर्मबोधनात्॥२६॥
कर्तृबाह्ये सांख्यमत्या: कर्तुश्चान्तर्हि योगत:॥
वेदोक्तवर्णधर्मेण स्वाश्रमानुगतेन हि॥२७॥
पार्थस्य कर्मफलयो: कर्तृभोक्तृत्वशोधनम्॥
शोधिते तस्य तद्भक्तौ संभवेदधिकारता॥२८॥
न संग्रामो हि भक्त्यर्थ: भक्तिर्नो संगराय हि॥
किन्तु कृष्णस्य लीलेयं बोधनार्थं समुद्यम:॥२९॥
लीलाबोधो वृथैव स्यात् तत्स्वरूपमजानत:॥
शुष्कं स्वरूपज्ञानं स्याल्लीलाबोधेन वर्जितम्॥३०॥
अतोऽत्र षट्के उभयज्ञानं तद् व्यपदिश्यते॥
तत्रैतद् अवगन्तव्यं सावधानेन चेतसा॥३१॥
एकस्याद्वितीयस्य श्रौतस्य ब्रह्मण: पुन:॥
श्रौतं बहुविधं चात्र त्रैविध्यमुपलभ्यते॥३२॥
धर्मिणि सच्चिदानंदे सत्ताचेतनारती -॥
रूपास्तु त्रिविधा धर्मा: लीलयाविर्भवन्ति हि॥३३॥
एकस्मिन् ब्रह्मणि रूपनामकर्मत्रिकं श्रुतम्॥



**''त्रयं सदेकमात्मायमात्मा चैक: त्रयं मत:''**[१]॥३४॥
सदंशे रूपप्राकट्यं चिदंशे नामसम्भव:॥
आनन्दांशे कर्मणो वै मौलिकश्चोद्गमो मत:॥३५॥
समष्टिव्यष्टिभेदेन कार्यद्वैविध्यमिष्यते॥
व्यष्टीभूतानि नामादिन्यक्ष्यादिगोचराणि हि॥३६॥
देशकालस्वरूपाणां परिच्छेदाच्च मोहनम्॥
समष्टिज्ञानमेतेषां नहि प्रत्यक्षगोचरम्॥३७॥
वैदैश्चयोगसांख्याभ्यां सर्वं ज्ञानं हि जायते॥
नामादिव्यष्टिज्ञानेषु जीवार्थं भासते जगत्॥३८॥
स्वक्रीडार्थं कृते त्वस्मिन् जीवाहंममताकृताद्॥
जगतीशविरोधात्तु कुतो बन्धोऽस्य नो भवेत्?[२]॥३९॥
सांसारिकी फलाशा तु यथाहि ममताकृता॥
तथैवापवर्गिकी चाहन्ताहैतुकी मता॥४०॥
ज्ञानं बाह्यार्थकं जीवे ममतोपाधिकं मृषा॥
अहन्तोपाधिकं स्वस्मिन् ज्ञानं नैव तात्त्विकम्॥४१॥
फलाशोपाधिकं कर्मज्ञानं चापि न तात्त्विकम्॥
अतस्त्रयाणां शास्त्राणामुपदेशो ह्यपेक्षित:॥४२॥
पूर्वषट्के कृते तस्मात् सिद्धा भक्त्यधिकारिता॥
तत्र सर्वेषु तल्लीलाबोधाद् भक्तिर्हि जायते॥४३॥
भक्त्यैव तस्य लीलाया: सम्यग्बोधोपि शक्यते॥
जडजीवेशभेदेषु प्राकृतेषु गुणेषु च॥४४॥
अव्यक्तगुणवैषम्याद् रजस्सत्त्वतमोगुणा:॥
ब्रह्मस्वरूपत्रैविध्यं पूर्वं यच्चोदितं हि तद्॥४५॥
बहुधा लीलया तत्र स्वात्मन्याविर्भवत्यपि॥

---

१.बृह.उप.१।६।३
२.द्रष्ट.सुबो.१।८।४०

कर्मस्वभावकालात्मा ब्रह्माविष्णुमहेश्वरा: ॥४६॥
तेष्वमिश्रितरूपेषु क्षुब्धेषु मिश्रितेषु ॥
जीवानां गतयस्तिस्र: पापपुण्योभयेतरा: ॥४७॥
चर्षण्यासुरदैवात्मा जीवभेदास्तथाऽपरे ॥
दैवानां श्रेयसे कर्मज्ञानभक्तिविभेदगा: ॥४८॥
इत्याद्या: निखिला जीवे तस्य लीलात्मका मता: ॥
भेदश्चैषामैच्छिकं हि ब्रहम्णोऽद्वितीयस्य हि ॥४९॥
भक्त्यैतेषु सर्वेषु लीलाकृतविभेदधी: ॥
तया तु भगवति मन:प्रणिधानेन सिद्ध्यति ॥५०॥
तस्मिन्वै भक्तिभावस्य ब्रह्मात्मैक्यविबोधत: ॥
सप्तमाध्यायप्रतिपाद्य संक्षेपोयं निरूपित: ॥५१॥

**( उपसंहार: )**

त्वां स्मरेयं न वाहं वा प्रयाणसमये मम ॥
जीवता तु मया स्वामिन्! मा भूस्त्वं विस्मृतो भुवि ॥५२॥

इति श्रीमद्भगवद्गीतासप्तमाध्यायप्रतिपाद्यसंक्षेप:
गोस्वामिश्रीदीक्षितात्मजेन श्याममनोहरेण कृत:
सम्पूर्ण:

॥ श्रीकृष्णाय नमः॥

॥ श्रीमदाचार्यचरणकमलेभ्यो नमः॥

## ॥ अष्टमाध्यायप्रतिपाद्यसंक्षेपः॥

### ( मंगलाचरणेनोपक्रमः )

मानसीनात्मनस्तस्य प्रादुर्भावकाराय हि॥
सत्यप्यगणितानन्दे गणितानन्दकाय च॥१॥
निजानन्दघनीभूतराधामूर्तिधराय वै॥
कृष्णमाहात्म्यज्ञानेन ज्ञेयरूपाय सर्वथा॥२॥
लीलाक्षीराब्धिलहरीचन्द्रे स्नेहोपलब्धये॥
अक्षरब्रह्मयोगेन ध्येयाय हि नमोनमः॥३॥

### ( श्लोकवक्तृसंख्याविमर्शः )

अष्टाविंशतिपद्यानामध्यायोपक्रमेऽत्र वै॥
आद्यौ श्लोकावर्जुनस्य स्फुटबोधार्थिनस्त्विह॥४॥
षड्विंशतिभिः पद्यैस्तु ह्यग्रे तत्त्वविवेचना॥
अक्षरं ब्रह्म चाध्यात्ममधिदैवाधिभौतिकम्॥५॥
कर्माधियज्ञौ कृष्णेन विचित्य प्रतिपादितम्॥
पार्थजिज्ञासोपशमः तावता सम्भविष्यति॥६॥

### ( अधिकरणांगविमर्शः )

भगवन्मुखैकगम्येऽस्मिन् संशयादेरभावतः॥
अधिकरणांगभूतानां पञ्चानां नात्र वर्णना॥७॥

### ( प्रतिपाद्यविषयः )

तृतीयात्पञ्चमं यावत् पार्थजिज्ञासितस्य वै॥
प्रतिपादनन्तु कृष्णेनात्र पद्ये तु सप्तमे॥८॥
मृत्युकाले भगवतः स्मरणे भगवद्गतिः॥
अतोहि सर्वकालेषु स्मृत्युपेता युधिक्रिया॥९॥



सार्धैकादशं यावत् ततः स्वस्य च धामिनः॥
**''यं यं वापि स्मरन्भावं त्यजत्यन्ते कलेवरम्॥१०॥**
**तं तमेवैति जीवोऽयं सदा तद्भावभावितः''** [१]॥
नियमात्संस्मरन् कृष्णं मृतोऽपि कृष्णमाप्नुयात्॥११॥
आब्रह्मभुवनालोकाः पुनरावृत्तिशालिनः॥
श्रीकृष्णाक्षरलोकस्तु पुनरावृत्तिवर्जितः॥१२॥
प्रभेदमेतमुक्त्वा तु ह्यक्षरात्प्रभवाप्ययौ॥
श्लोकैकविंशतिं यावत् तदक्षरनिरूपणम्॥१३॥
श्लोके द्वाविंशतितमे भक्तिलभ्यः परः पुमान्॥
विराट्स्वरूपं सर्वत्र सर्वदा व्यापकन्तु यत्॥१४॥
तस्मिन्काले प्रयातॄणां योगिनां ब्रह्मज्ञानिनाम्॥
शुक्लकृष्णगती ज्ञात्वा न मोहः सम्भवेत् क्वचित्॥१५॥
आषड्विंशतिश्लोकं निरूप्यान्तेऽर्जुनाय वै॥
अष्टाविंशतिश्लोके तु योगतद्गतिप्रेरणा॥
भक्तार्थं भगवता चोक्ता ह्यनुकल्पतया पुनः॥१६॥

### ( उपसंहारः )

अक्षरब्रह्मयोगाख्याध्यायानुक्तस्य वर्णनम्॥
अध्यायोपक्रमे प्रोक्तमाचार्योक्तदिशा मया॥१७॥
अक्षरब्रह्मयाथात्म्यप्रतिपादनपरायणम्॥
वन्दे वाक्पतिमाचार्यं वल्लभं देशिकं मुदा॥१८॥

इति श्रीमद्भगवद्गीताअष्टमाध्यायप्रतिपाद्यसंक्षेपः
गोस्वामिश्रीदीक्षितात्मजेन श्याममनोहरेण कृतः
सम्पूर्णः

---

१.भग.गीता ८।६

॥ श्रीकृष्णाय नमः ॥

॥ श्रीमदाचार्यचरणकमलेभ्यो नमः ॥

## ॥ नवमाध्यायप्रतिपाद्यसंक्षेपः ॥

### ( मंगलाचरणेनोपक्रमः )

यस्यात्मरतिशीलस्य जडजीवेशरूपता ॥
तदानन्दतिरोधानात् तस्मिन्स्यात्सानुसूयता ॥१॥
जीवेषु तदभावे तु राजविद्याधिकारिता ॥
भक्तेर्हि राजविद्यात्वं स्वीकर्त्रे नौमि भक्तिमान् ॥२॥

### ( अधिकरणांगविमर्शः )

आत्मरत्यंशरूपायां भक्तौ तु संशयादिकम् ॥
राजगुह्यतयाऽशक्यमतो नात्र विचारणा ॥३॥

### ( वक्तृश्लोकसंख्याप्रतिपाद्यम् )

चतुर्विंशतिभिः श्लोकैः राजविद्येयमादितः ॥
अन्तं यावत् कृष्णगीता स्वमुखात्स्वजनाय हि ॥४॥
उपक्रमस्त्रिभिः पद्यैः विद्यागुणनिरूपणम् ॥
तृतीयेऽश्रद्दधानस्य गतिः संसारवर्त्मनि ॥५॥
ततं भगवताव्यक्तमूर्तिना स्वात्मकं जगत् ॥
व्यक्तमूर्तेस्तु सर्वत्र तिरोहितया स्थितिः ॥६॥
कर्तृत्वं व्यक्तमूर्तेस्तूपादानत्वन्तु चाक्षरे ॥
श्लोकैकादशं यावत् जगतो हि भवाप्ययौ ॥७॥
मानुषीं तनुमाश्रित्य लीलया प्रकटस्य हि ॥
महेश्वरत्वाज्ञानात्तु मूढानां मतिभिन्नता ॥८॥
दैवजीवाः महात्मानोऽनन्येन मनसा सदा ॥
सततं कीर्तयन्तस्तं प्रणताः भक्तिभावतः ॥९॥
सा चतुर्विंशतिं यावदेवं भक्तेर्हि स्तुत्यता ॥
ततोहि श्लोकयुग्मेन ज्ञानयज्ञेन याजकाः ॥१०॥



एकत्वेन पृथक्त्वेन बहुधा विश्वतोमुखम् ॥
क्रतुस्वधौषधाज्याग्निमन्त्राहुत्यादिकं तथा ॥११॥
कर्मरूपाणि तस्यैव ज्ञात्वा तानि ह्युपासते ॥
श्लोके सप्तदशे भगवान् मातृपितृपितामहः ॥१२॥
प्रणवः ऋग्यजुस्सामप्रभवप्रलयादिकम् ॥
अमृतं मृत्यु सदसत् च सर्वं वै भगवानिह ॥१३॥
त्रयीधर्मानुप्रपन्नाः चेत्थं स्वर्गतिकामिनः ॥
भक्त्यभावात्तु ज्ञात्वापि गतागतगतिंलभाः ॥१४॥
द्वाविंशतितमे पद्ये येऽनन्याः भगवत्पराः ॥
तेषां योगक्षेमयोस्तु भगवानेव वाहकः ॥१५॥
उक्त्वैवं भगवानाह चाग्रिमेषु त्रिषु पुनः ॥
अन्यान्योपासकानान्तु गतीः क्षुद्राः पृथक् पृथक् ॥१६॥
पद्येषु षड्विंशत्यादौ स्वभक्तेः कीर्तिर्वर्णनम् ॥
अध्यायान्तिमे पद्ये उपसंहृतिद्योतनम् ॥१७॥
**''मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु ॥**
**मामेवैष्यसि युक्त्वैवमात्मानं मत्परायणः''** [१] ॥१८॥
एवं हि भक्तियोगस्य सारोऽयं समुदाहृतः ॥

### ( उपसंहारः )

सर्वविद्येश्वरी भक्तिः भक्तेः श्रीकृष्ण ईश्वरः ॥१९॥
तस्मिन् मतिगतिरतिः भवेदेकाश्रिता सदा ॥

इति श्रीमद्भगवद्गीतानवमाध्यायप्रतिपाद्यसंक्षेपः
गोस्वामिश्रीदीक्षितात्मजेन श्याममनोहरेण कृतः
सम्पूर्णः

१.भग.गीता ९।३४

॥ श्रीकृष्णाय नमः ॥

॥ श्रीमदाचार्यचरणकमलेभ्यो नमः ॥

## ॥ दशमाध्यायप्रतिपाद्यसंक्षेपः ॥

### ( मंगलाचरणेनोपक्रमः )

सर्वोपादानरूपो यः सर्वरूप उदाहृतः ॥
सर्वकर्ता च सर्वान्तर्यामी सर्वैस्तु साधनैः ॥१॥
लभ्यो गम्यः स्वकृपया सर्वातीतस्तथापि च ॥
विभूतिभिस्तु स्वीयस्य सर्वोपास्यत्वमावहन् ॥२॥
ज्ञानभक्त्यसमर्थानां ज्ञातुं सेवितुमंशतः ॥
स्वविभूतिस्वरूपेषु सर्वमूलं तमाश्रये ॥३॥

### ( वक्तृश्लोकसंख्याविमर्शः )

अध्यायोपक्रमश्चात्र भगवद्वचसैव हि ॥
प्रीयमाणाय पार्थाय हितकामेन बोधनम् ॥४॥
स सर्वादि सर्वभवः सर्वलोकमहेश्वरः ॥
असम्मूढतया तं वै ज्ञात्वा पापैः प्रमुच्यते ॥५॥
सर्वभूतपृथग्भावप्रवर्तनपरं हि तम् ॥
ज्ञात्वा चास्य विभूतिञ्च योगञ्च न विकम्पते ॥६॥
सप्तमश्लोकपर्यन्तं चैवं तु प्रतिपादिते ॥
अग्रे चतुर्भिः श्लोकैस्तु स्वस्य भक्तेः प्रधानता ॥७॥
अनन्यप्रीत्या भजने बुद्धियोगप्रदायिता ॥
अनन्यवरणीयत्वज्ञानात्माबुद्धियोगिता ॥८॥
तस्मिन्नेव तदंशस्य सर्वभावेन रुद्धता ॥
दशमस्कन्धविषयो यथा भागवते मतः ॥९॥
सर्वाधिक्येन तज्ज्ञानं माहात्म्यं तस्य कीर्तितम् ॥
तेन भक्तिप्रतिष्ठायामितरेषां विभूतिता ॥१०॥



ताश्चोपेक्ष्यानन्यभजने युक्तता बुद्धियोगिता ॥
पार्थस्य द्वादशादूर्ध्वं पद्यैरष्टभिरर्थना ॥११॥
विभूतियोगयोः तावद् उपदेशाय श्रीमुखात् ॥
लोकेऽस्मिन्स्वभूतीनां तदूर्ध्वं वर्णनं मतम् ॥१२॥
अष्टसप्ततिसंख्याकानां प्रधानतया पुनः ॥
असंख्येयत्वमेतासां नाम्ना रूपेण सर्वथा ॥१३॥
उपसंहरता चोक्ता स्वमुखात् तदगण्यता ॥
न स्वस्य तत्राऽसामर्थ्यात् किन्त्वानन्त्यादिति स्थितिः ॥१४॥
उद्देशोऽत्र त्रयोविंशपद्यैरेवं निरूपितः ॥
**"नान्तोऽस्ति मम दिव्यानां विभूतिनां परन्तप! ॥१५॥**
**एष तूद्देशतः प्रोक्तो विभूतेर्विस्तरो मया ॥**
**यद्यद् विभूतिमत् सत्त्वं श्रीमदूर्जितमेव वा ॥१६॥**
**तत्तदेवावगच्छ त्वं मम तेजोंऽशसम्भवम् ॥**
**अथवा बहुनैतेन किं ज्ञातेन तवार्जुन! ॥१७॥**
**विष्टभ्याहमिदं कृत्स्नमैकांशेन स्थितो जगत्"**[१] ॥
मूलरूपेण कृष्णेन स्वबोध्यत्वप्रधानता ॥१८॥
स्वसंन्निधौ विभूतिनामप्रधानत्वद्योतनम् ॥
वक्तुर्माहात्म्यज्ञानेऽस्य पर्यवसानमेव हि ॥१९॥
अनन्यभक्तिसिद्ध्यर्थं भक्तिमूलानुधावनम् ॥
इत्येवं वक्तृश्लोकानां विमर्शोऽत्र निरूपितः ॥२०॥

### ( अत्र शंकासमाधाने )

आशंका जायते चात्र वक्तुर्वै ब्रह्मताथवा ॥
विभूतिनां यतो वक्ता **"वृष्णिषु वासुदेव हि"**[२] ॥२१॥

---

१.भग.गीता १०।४०-४२
२.द्रष्ट.भग.गीता १०।३७

वक्ति तस्मात्समाधानं ज्ञातव्यमिह सर्वथा ॥
वार्ष्णेयबुद्धिः श्रीकृष्णे ब्रह्मबुद्धिविवर्जिता ॥२२॥
विभूतित्वं तु तस्यापि विभावितस्वरूपतः ॥
आपादयति यस्मात्तु "**ये यथा मां प्रपद्यते ॥२३॥**
**भजामि तान् तथैवाहमि**"[3]ति सिद्धान्ततः स्फुटा ॥
शंकापरापि पार्थस्तु ब्रह्मबुद्ध्या हि भक्तिमान् ॥२४॥
कुतो विभूतिज्ञानायोत्सुक्यात् प्रार्थनापरः ? ॥
इति चेत् तदयुक्तं हि पार्थो भक्तः सखा तथा ॥२५॥
भजनीयसख्युर्माहात्म्यज्ञानश्रवणप्रेमवान् ॥
भक्तिर्हि नवधा भिन्ना त्रिकं तन्नामसेवनम् ॥२६॥
द्वितीयन्तु त्रिकं रूपसेवनात्मकमेव हि ॥
तृतीयन्तु त्रिकं भक्तेर्भक्तभावात्मकं मतम् ॥२७॥
आद्यं माहात्म्यज्ञानोपयोगि स्यात् तेन सेव्यता ॥
सेवातः स्नेहसिद्धिस्तु तद्दार्ढ्याय पुनस्ततः ॥२८॥
भजनीये हृद्भावास्तु दास्यसख्यात्मनोऽर्पणम् ॥
विभूतीनां च माहात्म्यज्ञानायांगत्ववर्णना ॥२९॥
मूलरूपेण सेव्यत्वसिद्धये पादसेवना ॥
अर्चनं वन्दनं भक्तावपेक्ष्यन्ते यतः पुनः ॥३०॥
सेवनादेव सञ्जातप्रेम्णो दार्ढ्याय भावना: ॥
दास्यादिरूपा सम्प्रोक्ताः लीलावैशिष्ट्यद्योतकाः ॥३१॥
अन्यथा तु स्वरूपैकनिष्ठायां लयशक्यता ॥
तथा केवललीलातो यथा संसृतिशक्यता ॥३२॥
लीलाविशिष्टब्रह्मणो भक्तिः सर्वातिशायिनी ॥
स्वरूपलीलयोस्तस्मान्मते सेवाकथे यतः ॥३३॥
विभूतिज्ञानयोगेन भगवत्प्राप्तिरप्यतः ॥

---

३.द्रष्ट.भग.गीता ४।११



भव्याय भक्तिभावाय भवितेति वर्णनम् ॥३४॥

**( उपसंहारः )**

स्वमाहात्म्यविभूतीनां बुद्धियोगाय दर्शकः ॥
प्रियः श्रीकृष्णः संसेव्यः सदा मतिरतिप्रदः ॥३५॥

इति श्रीमद्भगवद्गीतादशमाध्यायप्रतिपाद्यसंक्षेपः
गोस्वामिश्रीदीक्षितात्मजेन श्याममनोहरेण कृतः
सम्पूर्णः

॥ श्रीकृष्णाय नमः ॥

॥ श्रीमदाचार्यचरणकमलेभ्यो नमः ॥

## ॥ एकादशाध्यायप्रतिपाद्यसंक्षेपः ॥

### ( मंगलाचरणेनोपक्रमः )

दिव्यदृष्ट्यानन्यभक्त्या विश्वरूपत्वदर्शकम् ॥
तमेकञ्चानेकतया भातं कृष्णं नमाम्यहम् ॥१॥

### ( प्रतिपाद्यविषयः )

सर्वात्मता त्रिधा सच्चिदानन्दपरमात्मनः ॥
सत्तया भानभावाभ्यां तस्य मार्गप्रभेदतः ॥२॥
"**बहुस्यामहमेको**"[१] हीत्युक्ता श्रौती ह्यनेकता ॥
त्रिधा सम्प्रत्ययं सत्त्वभानभावप्रयोजितः ॥३॥
प्रमेयरूपा त्वाद्या वै द्वितीया मानदृश्यता ॥
मानातीतेऽप्रमेयेऽपि तृतीया भक्तिभावतः ॥४॥
परोक्षब्रह्मज्ञानं तु श्रीकृष्णे भक्तिसाधकम् ॥
कृष्णेऽपरोक्षे ब्रह्मत्वसाक्षात्कारस्तु बाधकः ॥५॥
प्रेष्ठात्मनि परमत्वनिरासकतया पुनः ॥
स्वात्मनि भजनीयत्वप्रतीत्यापि तथैव च ॥६॥
भजनीयस्य भक्तिर्हि न भक्तेच्छा कृता मता ॥
भजनीयकृतवरणेन भक्तेष्वाविर्भवेद् यतः ॥७॥
वृणुते परमात्मैव जीवात्मानं स्वभक्तये ॥
"**यमेव वृणुते तस्य तनुं विवृणुते हि स्वाम्**"[२] ॥८॥
एतत्तनोर्विवरणं द्वेधा साक्षात्परोक्षतः ॥

---

१.छान्दो.उप.६।२।३
२.कठो.उप.१।२।२३



अन्त्यो विभूतियोगेन परमत्वनिदर्शनम् ॥९॥
लीलावैशिष्ट्यज्ञानेन भक्तौ तस्योपकारिता ॥
परमात्मनः स्वरूपे यद् विश्वात्मत्वदर्शनम् ॥१०॥
भक्तौ भीतिकरं तत्तु परमात्मत्ववारकम् ॥
दर्शयित्वापि स्वात्मनं चेद् भावस्यापि रक्षणम् ॥११॥
आचार्योक्तानुसन्धाने तदेतत्तु सुदुर्लभम् ॥
"**ज्ञानी चेद् भजते कृष्णं तस्मान्नास्त्यधिकः परः**"[३] ॥१२॥
सख्युः पार्थस्य कृष्णेन प्रशंसेह प्रकीर्तिता ॥
अध्यायान्ते स्वमुखेन गीतायां च प्रयोजिता ॥१३॥
"**सुदुर्दर्शमिदं रूपं दृष्टवानसि यन्मम ॥**
**देवा अप्यस्य रूपस्य नित्यं दर्शनकांक्षिणः ॥१४॥**
**नाहं वेदैर्न तपसा न दानेन नचेज्यया ॥**
**शक्य एवंविधो द्रष्टुं द्रष्टवानसि मां यथा ॥१५॥**
**भक्त्या त्वनन्यया शक्य अहमेवं विधोऽर्जुन ! ॥**
**ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परन्तप !**"[४] ॥१६॥
विश्वरूपदर्शनात्प्राग यच्चोक्तं भगवतैव हि ॥
"**न तु मां शक्यसे द्रष्टुमनेनैव स्वचक्षुषा ॥१७॥**
**दिव्यं ददामि ते चक्षु**"[५] रित्यनेनैकवाक्यता ॥
आतश्चानन्यभक्तिर्हि दिव्यदृष्ट्यात्मिकैव हि ॥१८॥
तस्यान्तु भीतिजननं "**भयेन व्यथितं मनः**"[६] ॥
अर्जुनोक्तप्रमाणेन विज्ञेयं निश्चिन्तत्विह ॥१९॥
प्रार्थिते दर्शने पश्चाद् दर्शनेन भयं कुतः ॥

---

३.त.दी.नि.१।१४
४.भग.गीता ११।५२ - ५५
५.भग.गीता ११।८
६.भग.गीता ११।४५

इति चेदुच्यते भक्तत्वेन ज्ञातोऽप्यसंशयः ॥२०॥
सख्यभवात्तु सख्यौ वै मनश्चाञ्चल्यहेतुकः ॥
नाविश्वासात्तु भक्तस्य प्रार्थनाभीति पार्थगे ॥२१॥

**( अधिकरणांगविमर्शः )**

पूर्वाध्यायसिद्धेऽर्थे संशयाभावतो पुनः ॥
पूर्वपक्षो न कोऽप्यत्र नोत्तरापेक्षितापि वा ॥२२॥

**( वक्तृश्लोकसंख्याविमर्शः )**

अध्यायोपक्रमः तावत् चतुर्भिरर्जुनस्य वै ॥
निरस्तमोहतोक्तिश्च परत्वांगीकृतिः पुनः ॥२३॥
श्रीकृष्णविषया भक्तिः साक्षाद्दर्शनकामना ॥
प्रार्थना भगवतश्चापि एताः वै स्वीकृतीः तथा ॥२४॥
श्लोकैश्चतुर्भिस्तेनोर्ध्वं संजयेन च वर्णनम् ॥
भगवद्दिव्यरूपस्य षड्भिश्शलोकैर्निरूपणम् ॥२५॥
कृष्णस्तवोऽत्र पुरुषसूक्तसंख्यासमैः कृतः ॥
पार्थेन श्रुतिस्मृत्येकवाक्यतायै न संशयः ॥२६॥
उपसंहाररूपेण पद्यं पार्थोक्तमेव च ॥
ततः त्रिभिः कृष्णवाक्यैः स्वसख्युः प्रेरणं तथा ॥२७॥
स्वलीलानुभावमत्या युद्धे धर्माक्षितिः मता ॥
ततोहि वचनञ्चैकं संजयोक्तमथापि वै ॥२८॥
पार्थदैन्यवर्णनाय कृष्णानुसरणाय च ॥
ततः पञ्चदशैः श्लोकैः भगवत्स्तवनं परम् ॥२९॥
तन्माहात्म्यप्रत्यभिज्ञा क्षमाप्रार्थनमेव च ॥
सख्यस्वभावनिर्वाहप्रार्थना मानुषात् तनोः ॥३०॥
श्लोकैस्त्रिभिस्तु कृष्णोक्तिः पार्थस्याश्वासनात्मिका ॥



तदूर्ध्वं सञ्जस्यैकपद्येन पूर्वरूपता ॥३१॥
सौम्यरूपधारणात्तु पार्थे स्वप्रकृतिस्थता ॥
परत्वोक्तिस्तु पद्येनैकेनात्रापि बोधिता ॥३२॥
अध्यायस्योपसंहारे भगवद्वचनानि हि ॥
श्लोकैश्चतुर्भिरुक्तानि तस्मिंश्च भक्तलक्षणम् ॥३३॥
पञ्चधर्मा द्योतिताऽत्र भगवत्प्रापकाः हि ये ॥
भगवत्कर्मकरणं तत्राद्यं तत्परत्वधीः ॥३४॥
भक्तिश्चाहंममकृतसंगेन रहिता पुनः ॥
भगल्लीलयाविर्भूतेषु वैरवर्जनम् ॥३५॥
विश्वरूपदर्शनस्य फलश्रुतिरुदीरिता ॥
गीतैकादशाध्याये हि भक्तियोगपरेऽत्र हि ॥३६॥

**( उपसंहारः )**

बुद्धिवाण्योः सदा कृष्ण ! विश्वरूपतया स्थिरः ॥
भव हृन्नेत्रयोः नैवं सेव्यरूपरुचेर्मम ॥३७॥

इति श्रीमद्भगवद्गीताएकादशाध्यायप्रतिपाद्यसंक्षेपः
गोस्वामिश्रीदीक्षितात्मजेन श्याममनोहरेण कृतः
सम्पूर्णः

॥ श्रीकृष्णाय नमः ॥

॥ श्रीमदाचार्यचरणकमलेभ्यो नमः ॥

## ॥ द्वादशाध्यायप्रतिपाद्यसंक्षेपः ॥

### ( मंगलाचरणेनोपक्रमः )

भक्तियोगस्य वक्तारं कृष्णं योगेश्वरेश्वरम् ॥
तत्पुष्ट्या भक्तियोगेन योजकं वल्लभं नुमः ॥१॥

### ( श्लोकवक्तृसंख्यानिरूपणम् )

प्रश्नोपक्रम एकेन व्यक्ताव्यक्तप्रभेदतः ॥
उपासनायां द्वैविद्ध्यं कतरत्तत्रोत्तमं मतम् ॥२॥
व्यक्तस्यैव हरेर्भक्ताः श्रेष्ठाः भगवतो मताः ॥
अग्रिमैकेन, श्लोकैस्तु त्रिभिरव्यक्तनिर्णयः ॥३॥
उपाये क्लेशरूपत्वमुपेयस्यापि क्लिष्टता ॥
षष्ठादारभ्य श्लोकेषु त्रिषु चाक्लेशवर्णनम् ॥४॥
तत्र चित्तासमाधानेऽनुकल्पानां ह्यनेकता ॥
अभ्यासकर्मतत्फलत्यागोक्तिः त्रिषु रूपिता ॥५॥
द्वादशे पुनरेतेषां श्रेयःसम्पादने हि यद् ॥
उत्तरोत्तरश्रैष्ठ्यं हि शान्तिं यावत्प्रकीर्तितम् ॥६॥
त्रयोदशाद् उपान्त्ये हि श्लोके भक्तस्य लक्षणम् ॥
विंशतितमेऽत्र धर्म्यामृतपातुः स्तुतिः वरा ॥७॥
अतीवप्रियतोक्त्या चाध्यायस्येहोपसंहृतिः ॥

### ( अध्यायाधिकरणांगविमर्शः )

विषयो भक्तियोगोऽत्र कतरः श्रेष्ठः संशयः ॥८॥
विभोर्निराकृतेः यद्वा साकृतेस्तत्परस्य वा ? ॥



पूर्वपक्षो विभेदेऽपि धामिधाम्नोरभेदतः ॥९॥
अथवा साकृतेरङ्गप्रसादायोपकारिता ॥
विभोर्निराकृतेर्यस्मान्मायोपाधिविवर्जनात् ॥१०॥
श्रेष्ठस्तज्ज्ञानयोगोऽन्यव्यावहारिक श्रेष्ठता ॥
इतिचेन्नश्रुतेर्वाक्याद् **''ब्रह्मरूपद्वयोक्तितः**
**मूर्तञ्चामूर्तमेवञ्च मर्त्यञ्चामृतं तथा ॥११॥**
**स्थिरञ्चास्थिरमेवञ्च''** [१] विरुद्धद्वयरूपतः ॥
उभयव्यपदेशात्तु सर्पकुण्डलन्यायतः ॥
मतं ततोह्यभेदेऽपि जीवोद्धाराकृतिग्रहः ॥१२॥
यश्चोद्यमः परस्येह स्वभक्तोद्धृतये परः ॥
अक्षरस्य तु कौटस्थ्याद् ज्ञानक्लेशेन चोद्धृतिः ॥१३॥
क्लेशोधिकतरायोक्तः अल्पसामर्थ्यतः सदा ॥
जीवस्येति सिद्धान्तः संगतिस्त्वथ चिन्त्यते ॥१४॥
ब्रह्माण्डमूर्तितत्लीला चाक्षरे दिव्यदृष्टितः ॥
दृष्टा कृष्णे भगवति योऽक्षरे प्रकटः पुमान् ॥१५॥
तत्राक्षरे निलीनस्य प्रकटस्य परस्य वा ॥
भक्तेरेकतरोत्कर्षनिर्धारायोत्तरो मतः ॥१६॥
क्षेत्रक्षेत्रज्ञयोरग्रे ब्रह्मतादात्म्यवर्णने ॥
बीजोपदेशात् पल्लवने त्रयोदशगतं भवेत् ॥१७॥

### ( भक्तिस्तदुपायस्वरूपं च )

अभ्यासज्ञानध्यानानि उत्तरश्लोकगानि वै ॥
अभ्यासो नित्ययोगेन ज्ञानं श्रद्धा दृढा पुनः ॥१८॥
तया तत्र मनोयोगः ध्यानं भक्त्यात्मकं भवेत् ॥
षष्ठे कर्मफलत्यागो ज्ञानं तस्मात्परं मतम् ॥१९॥

---

१.द्रष्ट.बृह.उप.२।३।१

ध्यानं चानन्ययोगेन तदुपासनमीरितम्॥
तादृशो हि समुद्धारो मनोधीचेतसां पुनः॥२०॥
योगतस्तेन तत्रैव निवासो निश्चितो मतः॥
त्रयाणामनिरोधे तु तदुपायोपदेशना॥२१॥
सृष्टौ लीलामतिर्भक्तिः सैकान्तध्यानसम्भवा॥
अत्याज्यकर्मणां तावदनुष्ठाने तदर्थिता॥२२॥
संयमोऽहंममतेः भवेद् दुःखसुखक्षमी॥
तदा लीलामतौ सत्यां तत्कर्तुर्ज्ञानसम्भवः॥२३॥
तदुपायानुकल्पेषु चाद्योऽभ्यासः प्रकीर्तितः॥
ज्ञानध्याने फलत्यागोऽत्याज्यानां कर्मणां पुनः॥२४॥
उत्तरोत्तरकर्तव्यत्वेन तेषां परिग्रहः॥
पूर्वं कर्मफलत्यागस्ततो ध्यानं चिकीर्षितम्॥२५॥
ज्ञानं तेनैव लीलायाः कर्तुश्च श्रवणादिना॥
अभ्यासाद् जायते सम्यक् ततो भक्तिर्हि श्रेयसी॥२६॥
इतिकर्तव्यता चैषामुपदिष्टा त्रयोदशे॥
सर्वभूतेषु ह्यद्वेषो मैत्री च करुणा तथा॥२७॥
संयमोऽहंममतेः सुखदुःखसहिष्णुता॥
अभ्यासोपायरूपस्य चानुष्ठाने चिकीर्षिताः॥२८॥
ज्ञानोपाये तु सन्तोषो योगसातत्यमेव च॥
यतात्मनिश्चये दाढर्च्यं मनोबुद्धिसमर्पणम्॥२९॥
इतिकर्तव्यता ज्ञानोपायांगत्वेन चोदिताः॥
ध्यानकाले त्वनुद्वेगः स्वस्मादपि तथेतरे॥३०॥
हर्षामर्षभयोद्वेगैः मुक्ते हि ध्यानशक्यता॥
तथा कर्मफलत्यागानुष्ठाने यद् अपेक्षितम्॥३१॥
नैरपेक्ष्यं हि शुचिता दाक्ष्यं चापि तथैव हि॥
औदासीन्यं च कृष्णेनेतिकर्तव्यतोदिता॥३२॥



कृतकर्मफलाकांक्षाराहित्ये कर्मतः शुचिः॥
बुद्धिभेदकरं कर्म नैव कार्यं हि दक्षता॥३३॥
औदासीन्ये व्यथाभावः आरब्धस्यान्तयापनम्॥
अनारब्धे त्वप्रयत्नः फलत्यागेतिकार्यता॥३४॥
हर्षद्वेषौ शोककामौ व्यथाभावाय कांक्षितौ॥
शास्त्रीयकर्मसु तावच्छुभाशुभविवर्जनम्॥३५॥
बाह्येतु व्यवहारे हि शत्रुमित्रसमानता॥
मानापमानयोः मनसि क्षोभस्यापि विसर्जनम्॥३६॥
शीतोष्णसुखदुःखेषु साम्यं तद् दैहिकं मतम्॥
निन्दास्तुतिसमत्वेतु शक्यं मौनावलम्बनम्॥३७॥
यदृच्छालाभसन्तुष्ट्याऽस्वामिता सिद्ध्यति गृहे॥
एवं कर्मफलत्यागश्चेत् तदर्थो भवेद् यदा॥३८॥
भक्तौ तस्य मतिस्थैर्यं विवेकादित्रिकोपमम्॥
ऐतैरुपायैः भक्तिर्हि सिध्यति भगवत्प्रिया॥३९॥

**( उपसंहारः )**

कृष्णवल्लभभक्त्या हि भक्तियोगोऽत्र वर्णितः॥
दुष्टं यत् तन्ममाज्ञानान्नतु तद्भक्तिहेतुकम्॥४०॥

इति श्रीमद्भगवद्गीताद्वादशाध्यायप्रतिपाद्यसंक्षेपः
गोस्वामिश्रीदीक्षितात्मजेन श्याममनोहरेण कृतः
सम्पूर्णः

॥ श्रीकृष्णाय नमः ॥

॥ श्रीमदाचार्यचरणकमलेभ्यो नमः ॥

## ॥ त्रयोदशाध्यायप्रतिपाद्यसंक्षेपः ॥

### ( मंगलाचरणेनोपक्रमः )

परं ब्रह्म परं धाम प्रधानपुरुषोत्तमम् ॥
श्रीकृष्णं सच्चिदानन्दं संनमामि सदा मुदा ॥१॥

### ( प्रतिपाद्यविषयविमर्शः )

द्वादशे भजनीयस्य रूपं निर्धारितं पुनः ॥
त्रयोदशेऽत्राध्याये तु पाठभेदो हि दृश्यते ॥२॥
चतुस्त्रिंशत्पञ्चत्रिंशच्छ्लोकाः वा पाठभेदतः ॥
पार्थस्य प्रश्नसहितो रहितो वा ह्युपक्रमः ॥३॥
पार्थप्रच्छा त्रियुग्मेषु त्वाद्यौ प्रकृतिपुरुषौ ॥
ज्ञानज्ञेये तथा क्षेत्रक्षेत्रज्ञाविति ज्ञिप्सितौ ॥४॥
कर्मादिमार्गत्रैविध्यं ब्रह्मत्रैविध्यहेतुकम् ॥
भक्तिस्त्रैविध्यसापेक्षा ह्यन्यथा कर्मज्ञानयोः ॥५॥
तदर्थमत्राध्याये तु ब्रह्मत्रैविध्यवर्णनम् ॥
भक्तेर्हि पूरकांशोऽयं श्वेताश्वतरचोदितः ॥६॥
तथाहि -

**''एतद् ज्ञेयं नित्यमेवात्मसंस्थं**
**नातः परं वेदनीयं हि किञ्चित् ॥**
**भोक्ता भोग्यं प्रेरितारं च मत्वा**
**सर्वं प्रोक्तं त्रिविधं ब्रह्मेतत्''** [१] ॥७॥

**''संयुक्तमेतत्क्षरमक्षरं च**

---

१.श्वेता.उप.१।१२



**व्यक्ताव्यक्तं भरते विश्वमीशः ॥**
**अनीशश्चात्मा बध्यते भोक्तृभावात्**
**ज्ञात्वा देवं मुच्यते सर्वपाशैः''** [२] ॥८॥

कर्ममार्गे तु देशादिषट्कसापेक्षता मता ॥
सात्वाधिभौतिकी प्रोक्ता सा तत्त्रैविध्यमध्यगा ॥९॥
ज्ञानमार्गे न नियता चाधिदैविकमूलता ॥
**''उद्धरेदात्मनात्मानम्''** [३] इति गीताप्रमाणतः ॥१०॥
भक्तिमार्गे ह्यपेक्ष्यन्ते जडजीवेश्वराः सदा ॥
जडे हि ममताबन्धो जीवेऽहन्ताकृतो यथा ॥११॥
उभयोरपि तादर्थ्यात् सेवने भक्तिमार्गिता ॥
भक्तौ विभावो भगवान् भक्तिः सेवानुभावता ॥१२॥
भजनीयेऽनन्यभावो भक्तिरेवेति निश्चयः ॥
यद्यन्यन्न भवेदत्रानन्यभावोप्यसम्भवः ॥१३॥
ब्रह्मणश्चाधिभूतं वै रूपम् अन्यद् मतं त्विह ॥
ब्रह्मणोऽतो तु द्वे रूपे भक्तिमार्गे ह्यपेक्षिते ॥१४॥
भजनीयाभजनीये वै तेन भक्तिः प्रसिद्ध्यति ॥
सर्वस्य जगतश्चास्याभजनीयब्रह्मरूपता ॥१५॥
ब्रह्मात्मकत्वज्ञानं हि मूले कृष्णे च भक्तिकृद् ॥

### ( वक्तृश्लोकसंख्याविमर्शः )

प्रथमाद् वा द्वितीयस्मात् श्लोकाद् भगवदुक्तयः ॥१६॥
उपक्रमस्त्वाद्येनेह श्लोकेनैकेन वर्तते ॥
क्षेत्रस्य वर्णनञ्चात्र सविकारमुदाहृतम् ॥१७॥
मध्ये तु ज्ञानज्ञेयार्थश्लोकैर्द्वादशभिस्त्विह ॥

---

२.श्वेता.उप.१।८
३.भग.गीता ६।५

क्षेत्रक्षेत्रज्ञवर्णनं न पृथग्ब्रह्मवर्णनात् ॥१८।
क्षेत्रं ब्रह्मात्मकं कार्यं स्वोपादानाविभेदतः ॥
ब्रह्मांशत्वेन क्षेत्रज्ञो मतो ब्रह्मात्मकः सदा ॥१९॥
सत्ता वै प्रकृतिः पुरुषश्चैतन्यं ब्रह्मणो ह्युभे ॥
सच्चिदानन्दरूपस्यातोऽनादी उभावपि ॥२०॥
प्रकृतेर्गुणवैषम्यं विकारोऽविकृतेः पुनः ॥
चैतन्यं प्राकृतगुणैर्मिश्रितं 'जीव'संज्ञितम् ॥२१॥
पुरुषः प्रकृतिस्थोऽसौ भुंक्ते प्रकृतिजान्गुणान् ॥
कारणे गुणसंगोऽस्य सदसद्योनिजन्मसु ॥२२॥
गीतायामेतदेवोक्तं ज्ञेया तु प्रकृतिस्ततः ॥
ज्ञानं चैतन्यधर्मिकं तद् ज्ञात्वा मुक्तो भवेत् पुनः ॥२३॥
**''कार्यकारणकर्तृत्वे हेतुः प्रकृतिरुच्यते ॥**
**पुरुषसुखदुःखेषु भोक्तृत्वे हेतुरुच्यते ॥२४॥**
**य एवं वेत्ति पुरुषं प्रकृतिं च गुणैस्सदा ॥**
**सर्वथा वर्तमानोऽपि न स भूयोऽभिजायते ॥२५॥**
**उपद्रष्टानुमन्ता च भर्ता भोक्ता महेश्वरः''[४] ॥**
परमानन्दरूपेण जीवान्तर्यामितां भजन् ॥२६॥
**''समं सर्वेषु भूतेषु तिष्ठन्तं परमेश्वरम् ॥**
**विनश्यत्स्वविनश्यन्तं यः पश्यति स पश्यति ॥२७॥**
**समं पश्यन् हि सर्वत्र समवस्थितमीश्वरम् ॥**
**न हिनस्त्यात्मनात्मानं ततो याति परां गतिम्''[५] ॥२८॥**

## ( अधिकरणांगविमर्शः )

आद्यषट्कं सूत्ररूपं द्वितीये वृत्तिरूपता ॥

४.भग.गीता १३।२०,२३,२२
५.भग.गीता १३।२७-२८



भाष्यरूपे तृतीयेतु पञ्चांगानां न भिन्नता ॥२९॥
वक्तृश्रोत्रोरैकमत्यात् संशयादेरभावतः ॥
विशेषज्ञानवाञ्छातः समाधानं भवेदिह ॥३०॥

## ( उपसंहारः )

भक्तावपेक्षितब्रह्मत्रैविध्यस्योपदेशना ॥
क्षेत्रक्षेत्रज्ञभेदस्याश्रयाभेदेन योगता ॥३१॥
अन्यथा क्षेत्रमिथ्यात्वे क्षेत्रज्ञस्वात्ममुक्तये ॥
त्रैविध्याज्ञानतो ब्रह्माप्राप्तौ मुक्तेरनिष्टता ॥३२॥
मदीयक्षेत्रक्षेत्रज्ञविभागेऽखण्डितं सदा ॥
क्षेत्रक्षेत्रज्ञेश्वरं तं नमामि भक्तिसिद्धये ॥३३॥

इति श्रीमद्भगवद्गीतात्रयोदशाध्यायप्रतिपाद्यसंक्षेपः
गोस्वामिश्रीदीक्षितात्मजेन श्याममनोहरेण कृतः
सम्पूर्णः

॥ श्रीकृष्णाय नमः ॥

॥ श्रीमदाचार्यचरणकमलेभ्यो नमः ॥

## ॥ चतुर्दशाध्यायप्रतिपाद्यसंक्षेपः ॥

### ( मंगलाचरणेनोपक्रमः )

गुणत्रयविभागस्याकर्ता कर्ता च यो विभुः ॥
सांख्यज्ञानोपदेशेन मुक्तिदाता स्वयं प्रभु ॥१॥
स्वरूपप्रथनाच्चापि भक्तिदाता सएव हि ॥
श्रीकृष्णं सांख्यभक्तिभ्यां गम्यमेकं वयं नुमः ॥२॥

### ( प्रतिपाद्यविषयविमर्शः )

गुणत्रयसमाहाररूपा तु प्रकृतिर्मता ॥
प्राकृतं सगुणं सर्वं संकीर्णगुणवद् मतम् ॥३॥
अतो हि संशयभ्रान्ती निश्चयः तैर्हि जायते ॥
रागद्वेषशोकमोहाः चैकस्मिन्विषयेऽपि वै ॥४॥
संकीर्णगुणवद्विषयाद् बन्धनन्तूपजायते ॥
गुणासक्तस्य जीवस्य तद्वैराग्याद् विमुक्तता ॥५॥
चिदात्मा निर्गुणः प्रोक्तः परमात्मापि वै तथा ॥
नैर्गुण्यमेतयोर्भिन्नं भावाभावविभेदतः ॥६॥
चिदात्मनस्तु प्रकृतेस्तादात्म्याध्यासतः सदा ॥
प्राकृतगुणाश्रयाभासो नैर्गुण्यन्तु स्वभावतः ॥७॥
अन्यादृशन्तु नैर्गुण्यं मन्तव्यं परमात्मनः ॥
प्रकृतेस्तु गुणाः सर्वे निरानन्दात्मकाः मताः ॥८॥
सच्चिदानन्दैकरसो धर्मी सो भगवान् यतः ॥
धर्मास्तस्य तथा सच्चिदानन्दैकरसाः पुनः ॥९॥
प्राकृतेषु पदार्थेषु न चैवंविधतेष्यते ॥
तस्मान्प्राकृतद्रव्येषु भेदो गुणगुणिनोर्मतः ॥१०॥



सच्चिदानन्दैकरसाः गुणाः सर्वे तु ब्रह्मणः ॥
चिदानन्दतिरोधानात् प्राकृतत्वमुदीर्यते ॥११॥
न चानन्दैकरसतायां संकीर्णत्वसम्भवः ॥
संकीर्णतेतरपार्थक्यभावापत्तिजा मता ॥१२॥
गुणोद्भूतविकारेषु गुणसंकीर्णता कृता ॥
दोषोऽयमेव प्रकृतेर्गुणानां वर्णितो बुधैः ॥१३॥
नैर्गुण्यं यद् द्विधा चोक्तं भेदाभेदविभेदतः ॥
स्वभिन्नस्वगुणाधारः 'सगुण' व्यपदेशभाक् ॥१४॥
ईदृग्गुणानाश्रयत्वं नैर्गुण्यं कथ्यते पुनः ॥
चिदात्मा प्राकृतगुणानाधारत्वात्तु निर्गुणः ॥१५॥
अखण्डैकरसे तस्मिन् सच्चिदानन्दब्रह्मणि ॥
सत्ताचैतन्यरत्यादिधर्माः प्रादुर्भवन्ति हि ॥१६॥
धर्मेभ्यस्त्रिगुणास्तेषां समाहारात्प्रधानता ॥
अव्यक्ता जडसृष्टेर्हि प्रकृतिर्व्यपदिश्यते ॥१७॥
सतः सात्त्विकं तच्चितो राजसं च
तथानन्दतस्तामसं चापि जातम् ॥
गुणानां हि सैतत्समाहाररूपा ॥
गुणक्षोभवैषम्यतस्तद्विकाराः ॥१८॥
विकारेषु सत्सु चिदंशप्रवेशे
ह्यविद्याख्यशक्तेस्तदध्यासमूलाः ॥
चिदंशेषु देहेन्द्रियप्राणबुद्धि -
मनोऽहंकृतिः स्वस्वरूपभ्रमाद् वै ॥१९॥
गुणेष्वेषु रक्तौ भवेदेषु बद्धो
विरक्तः पुनर्मुक्तिसौख्येन युक्तः ॥
विरक्त्यैव स्वस्मात्पृथग्बुद्धितो वै
प्रसंख्यातुमात्मा विवेकक्षमो हि ॥२०॥

### ( अधिकरणांगविमर्शः )

भाष्यरूपे तु षट्केऽन्तर्गताध्याये न संशयः ॥
सूत्रोपमे हि षट्के वै पूर्वपक्षनिराकृतिः ॥२१॥

### ( वक्तृश्लोकसंख्याविमर्शः )

अध्यायोपक्रमे श्लोकद्वये सांख्यस्तुतिः कृता ॥
भगवतैतस्य ज्ञानात्तु स्वेनैव नित्यमुक्तता ॥२२॥
जन्ममृत्युव्यथाभावात् ततो ज्ञानोपदेशना ॥
सर्गादौ प्राकृते स्वच्छे पुंश्चैतन्योपसंक्रमात् ॥२३॥
योनित्वं महतः स्वस्य बीजरूपा च पितृता ॥
महत्यनुगताः ये वै गुणाः प्रकृतितः पुनः ॥२४॥
तेन तत्र तु संक्रान्तं चैतन्यं बध्यते भृशम् ॥
मुक्तेश्च हेतुस्तत्रैव गुणः सात्त्विक उच्यते ॥२५॥
रजोगुणो रागहेतुः कर्मबद्धं करोत्यमुम् ॥
तामसो मोहजननाद् अज्ञानेनैव बन्धकः ॥२६॥
तृतीयश्लोकतः श्लोकैः षोडशैर्हि निरूपणम् ॥
प्रकृतेस्त्रिगुणानां च कार्याणां च सविस्तरम् ॥२७॥
एकोनविंशविंशयोश्च दृश्याद् द्रष्टृविवेकतः ॥
त्रैगुण्यातिक्रमात्पूर्वसदृशी चेशतुल्यता ॥२८॥
श्लोके तु चैकविंशे हि पार्थप्रच्छा निरूपिता ॥
प्रकृतेर्गुणातिक्रमणे ह्याचारविषये पुनः ॥२९॥
द्वाविंशात्पञ्चविंशं वै यावत्तस्य निरूपणम् ॥
सांख्यसिद्धान्तानुगतं गुणातीतत्वकारणम् ॥३०॥
कृष्णे चाव्यभिचारिण्या भक्त्या चापि तथैव हि ॥
स्वात्मसौख्यं तदेवेह ब्रह्मसौख्येन भूयसा ॥३१॥
जीवो भक्तोऽनुभवतीत्यध्यायोपसंहृतिः ॥



श्रीमदाचार्यचरणेनातो हि बालबोधगे ॥३२॥
उपदेशेऽस्य विषयस्य संकलनं नियोजितम् ॥
“**मोक्षे चत्वारि शास्त्राणि लौकिके परतः स्वतः ॥३३॥**
**द्विधा द्वे द्वे स्वतस्तत्र सांख्ययोगौ प्रकीर्तितौ ॥**
**त्यागात्यागविभागेन सांख्ये त्यागः प्रकीर्तितः ॥३४॥**
**पराश्रयेण मोक्षस्तु द्विधा सोऽपि निरूप्यते ॥**
**अतः शिवश्च विष्णुश्च जगतो हितकारकौ ॥३५॥**
**नियतार्थप्रदानेन तदीयत्वं तदाश्रयः**”[१] ॥
परतो मोक्षलाभार्थं जीवसंसारबाधनात् ॥३६॥
“**समर्पणेनात्मनो हि तदीयत्वं भवेद् ध्रुवम् ॥**
**अतदीयतया चापि केवलश्चेत् समाश्रितः ॥**
**तदाश्रयतदीयत्वबुद्ध्या सर्वं समाचरेत्**”[२] **॥३७॥**
एवं निरूपणेनापि बालबोधादसंशयः ॥
अध्यायार्थः स्फुटो भाति संवादश्चेतयोर्द्वयोः ॥३८॥

### ( उपसंहारः )

सांख्ययोगोपदेष्टा हि साम्यं येभ्यस्तु रोचते
भवन्तु स्वात्मसौख्याय तत्परास्तस्य लीलया ॥३९॥
कृपालोस्तस्य या लीला भक्तियोगप्रदा हि या ॥
तया तत्सौख्यलाभाय मनो मेऽतिसमुत्सुकः ॥४०॥

इति श्रीमद्भगवद्गीताचतुर्दशाध्यायप्रतिपाद्यसंक्षेपः
गोस्वामिश्रीदीक्षितात्मजेन श्याममनोहरेण कृतः
सम्पूर्णः

---

१.बा.बो.५ - १५
२.बा.बो.१८ - १९

॥ श्रीकृष्णाय नमः ॥

॥ श्रीमदाचार्यचरणकमलेभ्यो नमः ॥

## ॥ पञ्चदशाध्यायप्रतिपाद्यसंक्षेपः ॥

### ( मंगलाचरणेनोपक्रमः )

स्वयोगानुग्रहप्राप्य-पुरुषोत्तमरूपिणे ॥
भक्तभावानुरूपाय श्रीकृष्णाय नमोनमः ॥१॥

### ( प्रतिपाद्यविषयोपन्यासः )

**''आत्मरत्यात्ममिथुनात्मानन्दःस्वराट्''** [१] प्रभुः ॥
श्रीकृष्णः सच्चिदानन्दः पुरुषोत्तम उच्यते ॥२॥
स्वसत्ताचेतनानन्त्यधर्मधाम्न्यक्षरे स्वयम् ॥
कालकर्मस्वभावैर्हि प्रधानपुरुषात्मके ॥३॥
नामरूपकर्मभेदैः स्वीयैः स्वस्मिन्समुद्धृतैः ॥
रममाणो जीवजडान्तर्यामिरूपभेदतः ॥४॥
वाङ्मनोऽगोचरश्चान्यैः कृपाभक्तिविवर्जितैः ॥
अध्याये संशयः पूर्वपक्षो वा नहि शक्यते ॥५॥
अतोऽन्योक्तिः समग्रेऽत्राप्यध्याये नास्ति कस्यचित् ॥
भगवद्वचनान्येव तेनैवं योजितानि हि ॥६॥
**''नैनमूर्ध्वं न तिर्यञ्चं न मध्ये परिजग्रभत्''** [२] ॥
श्रुत्युक्तब्रह्मणोऽद्वैते नोर्ध्वमूलत्वसंगतिः ॥७॥
इति चेन्नहि तद्युक्तं भेदाद् लीलास्वरूपयोः ॥
स्वरूपतो ब्रह्मैतादृग् लीलया ह्यतथापि च ॥८॥

---

१.छान्दो.उप.७।२५।२

२.महाना.उप.१०



### ( ऊर्ध्वमूलतायाः श्रुतिवाक्येनोपद्बलनम् )

**''ब्रह्म वा इदमग्र आसीत् तद् देवान् असृजत. तद् देवान् सृष्ट्वा एषु लोकेषु व्यारोहयद् अस्मिन्नेव लोके अग्निं, वायुम् अन्तरिक्षे, दिव्येव सूर्यम्. अथ ये अत ऊर्ध्वा लोका तद् या अत ऊर्ध्वा देवताः तेषु ता देवता व्यारोहत्. स यथा ह वा इम आविर्लोकाः इमाश्च देवता, एवं हैव त आविर्लोकाः, ताश्च देवता येषु ता देवता व्यारोहयत्. अथ ब्रह्मैव परार्धम् अगच्छत्. तत् परार्धं गत्वा ऐक्षत 'कथंनु इमान् लोकान् प्रत्येवेयायम्' इति तद् द्वाभ्यामेव प्रत्यवैद् रूपेण चैव नाम्ना च. स यस्य नामास्ति तन्नाम. यस्यो अपि नाम नास्ति यद् वेद रूपेण 'इदं रूपम्' इति तद्रूपम्. एतावद् वा इदं यावद् रूपञ्चेव नाम च. ते हैतो ब्रह्मणो महती अभ्वे''** [३].

अतोहि लीलयैवोर्ध्वाधोभावो न विरुध्यते ॥
अतोहि नामरूपाख्या सृष्टिर्वै पुरुषोत्तमात् ॥९॥
अश्वत्थताव्ययस्यापि तथैव परिणामिता ॥
विरुद्धधर्माधारता या सा श्रुत्येकगोचरा ॥१०॥
**''द्वे वाव ब्रह्मणो रूपे मूर्तामूर्ते तथैव च ॥**
**मर्त्यामृते स्थितं यच्च सच्च त्यं चे''** [४] त्यनेकधा ॥११॥
ननु पार्थायोपदिष्टं तेनैतत्तु विरुद्ध्यते ॥

---

३.शतप.ब्रा.२।३।१-५

४.बृह.उप.२।३।१.

**"त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भवार्जुनः"**[५] ॥१२॥
**"गुणेभ्यश्च परं वेत्ति मद्भावं सोऽधिगच्छति"**[६] ॥
सागुण्यं वेदवेद्यस्य नैर्गुण्यं स्वस्य चात्रहि ॥१३॥
अत्र वेदविदां साकं स्वविदोरैक्यमुक्ति सा ॥
ह्यसंगतैव चाभाति तदिदं नहि साम्प्रतम् ॥१४॥
गुणातीतस्य तस्यैव गुणात्मत्वाच्च लीलया ॥
उक्तं भागवते तस्माद् **"निर्गुणस्य गुणात्मनः"**[७] ॥१५॥
स्वयञ्ज्योतिरिदं ब्रह्म तत्कथं शब्दगोचरम् ? ॥
इति चेत् तत् परं ब्रह्म स्वयं शब्दतयाऽभवत् ॥१६॥

तथाहि
**"ते देवा इन्द्रम् अब्रुवन् 'इमं नः तावद् यज्ञं गोपाय... स ऋग्वेदो भूत्वा... यजुर्वेदो भूत्वा... सामवेद भूत्वा उत्तरतः परीत्य उपातिष्ठत्"**[८]

वाङ्मनोऽगोचरस्यापि स्वप्रकाशस्य ब्रह्मणः ॥१७॥
स्वतो वेदात्मभावेन जातस्य स्वप्रकाश्यता ॥
वृक्षस्य सम्परिज्ञानं यथा पर्णैर्हि जायते ॥१८॥
वेदपर्णैः परिज्ञानम् अज्ञेयावाच्यब्रह्मणः ॥

### (अव्ययाश्वत्थयोस्तादात्म्यविमर्शः)

शाखाश्चास्य वृक्षस्य त्रिगुणात्मप्रधानतः ॥१९॥
प्रसृताः अधस्तथोर्ध्वं च प्रवालाः विषयात्मकाः ॥
प्राकृतैरिन्द्रियैर्ग्राह्याः छादकाः सच्चिदात्मनः ॥२०॥

---

५.भग.गीता २।४५
६.भग.गीता १४।१९
७.भाग.पुरा.१०।२९।१४
८.ऐत.ब्राह्म.२।१९



ततो मूलस्वरूपं हि प्रवालेषु न लभ्यते ॥
अव्ययाश्रयणैव ह्यश्वत्थच्छेदप्रेरणम् ॥२१॥
तदुक्तमस्मदाचार्यैः सुबोधिन्यां विशेषतः ॥
**"ब्रह्मरूपं जगज्ज्ञेयं जगतो व्यतिरिच्यते ॥२२॥
आसक्तिस्तु ततः कार्या मूले ब्रह्मणि सर्वथा"**[९] ॥
तदर्थं मूलरूपस्य माहात्म्यज्ञानमिष्यते ॥२३॥
वेदादिशास्त्रतः तस्य कर्तव्यो निर्णयः सदा ॥
**"रूपप्रपञ्चकरणाद् आसक्तस्वांशवारणे ॥२४॥
श्रुतिम् आत्मप्रसादाय चकारात्मानमेव स"**[१०] ॥

### (पुरुषोत्तमविदोः फलस्य विमर्शः)

प्रपञ्चविषयासक्तिराहित्येन तदर्थिता ॥२५॥
सिद्धा चेत् तत्पदं कीदृक् सालोक्यमथवा लयः ॥
सृष्टिरेषाखिला तत्र चाक्षरे धाम्नि तत्स्थितिः ॥२६॥
सालोक्यं सिद्धमेवात्र बन्धे मुक्तौ च नित्यशः ॥
लये तु ज्ञानमार्गात् को विशेषो वक्तुमिष्यते ? ॥२७॥
एतच्छंकासमाधानं तुर्यपञ्चमषष्ठसु ॥
कृतं सालोक्यरूपेण द्वेधा तद्ध्यक्षरं मतम् ॥२८॥
**"द्विरूपं तद्धि सर्वं स्यादेकं तस्माद् विलक्षणम्"**[११] ॥
सृष्टिकृष्णावुभौ चास्मिन्नक्षरे समवस्थितौ ॥२९॥
**"पादोस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि"**[१२] ॥
इति श्रुत्या तदेकस्मिन्पादे सृष्टिरिष्यते ॥३०॥

---

९.सुबो.२।९।३५
१०.त.दी.नि.२।१८
११.सि.मु.३
१२.ऋक्संहि.१०।९०।३

शिष्टे सृष्टवैलक्षण्यात् परस्य हि धामता॥
वैकुण्ठादिषु लोकेषु ब्राह्मेण तनुना पर: ॥३१॥
पुरुषोत्तमस्वरूपस्य लीलायाश्चापि सर्वथा॥
परमानन्दसम्प्राप्ति: 'पदमव्यय'संज्ञिता॥३२॥

### ( पुरुषोत्तमान्तर्याम्यक्षरस्वरूपविमर्श: )

सप्तमात्तु तदंशानाम् आचैकादशं पुन: ॥
बाह्याभ्यन्तरकरणैर्बाहिर्मुख्ये तु मूढता॥३३॥
आत्मानन्दाभिमुख्येन पुरुषोत्तमयोगिता॥
सिद्धान्तमुक्तावल्यास्तु संगतिरियमीरिता॥३४॥
ततस्त्रिभिस्तु पद्यैस्तु जडसृष्टिनिरूपणम्॥
मध्ये चैकेन पद्येनोभयान्तर्यामिवर्णनम्॥३५॥
**''अन्तर्याम्यक्षरं कृष्णो ब्रह्मभेदा''** [13] विधानत: ॥
पुरुषक्षरश्चेकपादेऽपरेष्वक्षरोक्तित: ॥३६॥
तत्रोत्तमो हि पुरुष: परमात्मान्तर्यामी वै॥
क्षरातीतोऽक्षरात् श्रेष्ठ: 'पुरुषोत्तम' उच्यते॥३७॥

### ( पुरुषोत्तमयोगो तत्कृतवरणसाध्य: इति विमर्श: )

पद्योपान्त्ये हरे: शक्ती विद्याविद्ये निरूपिते॥
पुरुषोऽविद्यया बद्धो मुक्तो भवति विद्यया॥३८॥
पुरुषोत्तम उभाभ्यान्तूद्धृतौ सर्वथा क्षम: ॥
ईशावास्योपनिषदि चोक्तो ह्येतद्विनिर्णय: ॥३९॥
**''अन्धन्तम: प्रविशन्ति येऽविद्यां समुपासते॥**
**ततो भूयइव तमो य उ विद्यायां रता: ॥४०॥**
**अन्यदेवाहुर्विद्ययाऽन्यदाहुरविद्यया॥**
**इति शुश्रुम धीराणां ये न: तद् विचचक्षिरे॥४१॥**

१३.त.दी.नि.२।१२१



**विद्यां चाविद्यां च यस्तद् वेदोभयं सह॥**
**अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुते''** [14] ॥४२॥
नाविद्यया विद्यया वा वरणेनैव लभ्यता॥
अत: चैकतरयापि लब्धिस्तत्कृपया पुन: ॥४३॥
यतो 'भूयइवतम:' 'संमोह'पदबोधित: ॥
असंमोहस्तु तस्यैककृपानैर्भयमेव हि॥४४॥
इति गुह्यतमो योगो कृष्णेनैवोदित: स्वत: ॥
बुद्ध्वैतद् बुद्धिमत्ता वै तथाच कृतकृत्यता॥४५॥
कृपालब्धा तु या मुक्तिर्मर्यादामार्गवर्त्मनी॥
कृपालब्धा च या भक्ति: पुष्टिमार्गानुसारिणी॥४६॥
वामेतरकृपादृष्टी तस्य मुक्तिप्रदस्य ये॥
कृपावान्तरव्यापाररूपा भक्ति: फलात्मिका॥४७॥
साधनत्वं कृपायास्तु यतोहि पुरुषोत्तम: ॥
अत: सिद्धान्तमुक्तानां मालायां वल्लभेन वै॥४८॥
उक्तञ्च **''ब्रह्मवादेन कृष्णे बुद्धिर्विधीयताम्''** [15] ॥
पुरुषोत्तमयोगस्य समासोक्त्या निरूपणम्॥४९॥

### ( उपसंहार: )

पुरुषोत्तमो भक्तिगम्यो तद्गम्या भक्तिरत्र वै॥
गीतापञ्चदशाध्यायगम्यावेतावुभौ मतौ॥५०॥
इति श्रीमद्भगवद्गीतापञ्चादशाध्यायप्रतिपाद्यसंक्षेप:
गोस्वामिश्रीदीक्षितात्मजेन श्याममनोहरेण कृत:
सम्पूर्ण:

१४. ईशा. उप. ९-११
१५. सि.मु.१२

॥ श्रीकृष्णाय नमः ॥

॥ श्रीमदाचार्यचरणकमलेभ्यो नमः ॥

## ॥ षोडशाध्यायप्रतिपाद्यसंक्षेपः ॥

### ( मंगलाचरणेनोपक्रमः )

स्वात्मप्रापकयोगेन दैवासुरविभागतः ॥
योगेश्वरं पार्थशोकवियोजकमहं श्रये ॥१॥
स्वशक्त्याऽविद्यया स्वांशसुराणां यो लयप्रदः ॥
स्वशक्त्या विद्यया स्वांशदेवानां मुक्तिदोऽपि सः ॥२॥
पुष्ट्या स्वशक्त्या दैवेष्वितरेषां सैव भक्तिदः ॥
पुरुषोत्तमं तमेकं श्रीकृष्णं भक्त्यै नमाम्यहम् ॥३॥
गीतोक्तदैवासुरयोः तृतीयोत्प्रेक्षकान् मुदा ॥
पुष्टिप्रवाहमर्यादाग्रन्थकर्तॄन् नमाम्यहम् ॥४॥

### ( प्रतिपाद्यविषयविमर्शः )

सर्वं वै सृष्ट्यभिव्यक्तम् इन्द्रियादेर्हिगोचरम् ॥
सृष्ट्यव्यक्तमथान्यद् यत् शास्त्रैकाधिगमं तु तत् ॥५॥
शास्त्रोक्तज्ञानकर्मभिः ज्ञाता कर्ता हि यो भवेत् ॥
दैवसम्पत्तया ज्ञेयो ह्यन्यथा त्वासुरी मता ॥६॥
असूनेवेह यो राति प्राणपोषणतत्परः ॥
उद्वेजकः परेषान्तु सचासावासुरो मतः ॥७॥
शास्त्रोक्तकर्मज्ञानाभ्याम् असूनां संयमोत्सुकः ॥
कर्ता ज्ञाता सएवात्र दैवो जीवः प्रकीर्तितः ॥८॥
तस्य भोक्तृत्वमप्यैहिकामुष्मिकफलस्य च ॥
यथाशास्त्रं भवेदत्र दैवासुरविभेदतः ॥९॥
उभाभ्यां समतीतस्योभयप्राकट्यकारिणः ॥



सर्वथा कर्मस्वातन्त्र्यं कर्तुञ्चाकर्तुमन्यथा ॥१०॥
कर्तुं कर्तुः परेशस्य पारमैश्वर्यभावतः ॥
न लोके कर्मफलयोः सम्बन्धो यादृशो मतः ॥११॥
लोककर्मफलेभ्यो हि भिन्नं तत् शास्त्रगोचरम् ॥
शास्त्रोक्तकर्मफलयोरकर्तुं क्षम ईश्वरः ॥१२॥
मूलरूपेण कर्तुं यत् क्षमश्चांशेन न क्षमः ॥
निरंकुशैश्वर्यव्यक्तिः सृष्टिलीलासु तस्य वै ॥१३॥
ततश्च त्रिविधा सृष्टिराचार्यैः प्रतिपादिता ॥
पुष्टिप्रवाहमर्यादाभेदे षोडशग्रन्थगे ॥१४॥
अत्रोक्तदैवजीवस्य द्वेधा रूपो विबोधितः ॥
**''पुष्टिप्रवाहमर्यादा विशेषेण पृथक्पृथक् ॥१५॥**
**जीवदेहक्रियाभेदैः प्रवाहेण फलेन च ॥**
**''द्वौ भूतसर्गौ''**[१] **वित्युक्ते प्रवाहोऽपि व्यवस्थितः ॥१६॥**
**कश्चिदेव हि भक्तो हि - ''यो मद् भक्तः''**[२] **इतीरणात्''**[३] ॥
नन्वासुरजीवानां प्राकट्यं भगवता कथम् ? ॥१७॥
सैषा शंका न वै युक्ता श्रुतौ हि प्रतिपादनात् ॥
**''प्राजापत्या द्वया दैवाश्चासुराश्च''**[४] प्रजापतिः ॥१८॥
तथात्मानं भावयित्वा रूपद्वयविभेदतः ॥
**''स आत्मानमेव द्वेधाऽपातयद्''**[५] न्यायतः स्वयम् ॥१९॥
सदंशैकप्रधाना ये तएवासुरसृष्टिगाः ॥
चिदंशजीवनाम्नोर्हि मर्यादायाः प्रधानता ॥२०॥

---

१.भग.गीता १६।६
२.भग.गीता १२।१३ - २०
३.पु.प्र.म.१ - ४
४.द्रष्ट.बृह.उप.१।३।१
५.द्रष्ट.बृह.उप.१।४।३

आनन्दांशप्रधानाः ये पुष्टिसृष्टौ हि वाञ्छिताः॥
पुष्टिविद्ये तथाऽविद्या शक्तयस्तस्य नोदिता॥२१॥
सृष्टित्रयनियमनाय सामर्थ्यात्तु निरंकुशात्॥
सृष्टेष्वपीह कर्तुं चाकर्तुमन्यथा पुनः॥२२॥
स्वातन्त्र्यं सर्वथा तस्य ज्ञेयं पुष्ट्यादिसृष्टिषु॥
अतएवोक्तमाचार्यैः सर्गभेदनिरूपणे॥२३॥
**"इच्छामात्रेण मनसा प्रवाहं सृष्टवान् हरिः॥**
**वचसा वेदमार्गं हि पुष्टिं कायेन निश्चयः॥२४॥**
**मूलेच्छातः फलं लोके वेदोक्तं वैदिकेऽपि च॥**
**कायेन तु फलं पुष्टौ भिन्नेच्छातोऽपि नैकधा॥२५॥**
**"तानहं द्विषतो"**[६] **वाक्याद् भिन्ना जीवाः प्रवाहिणः॥**
**अतएवेतरौ भिन्नौ सान्तौ मोक्षप्रवेशतः॥२६॥**
**तस्माज्जीवा पुष्टिमार्गे भिन्नाएव न संशयः॥**
**भगवद्रूपसेवार्थं तत्सृष्टिर्नान्यथा भवेत्"**[७] **॥२७॥**
कृष्णरूपेण प्रकटो भगवान् द्वापरे स्वयम्॥
**"सृजाम्यहं तदात्मानं परित्राणाय साधूनाम्॥२८॥**
**विनाशाय दुष्कृताञ्च"**[८] निजकंठोक्तिसिद्धता॥
पुष्टिमार्गेऽगीकृताय स्वसख्ये बहुधात्र वै॥२९॥
सेवातयैव युद्धाज्ञां दत्तवान् इति निश्चितम्॥
**"मयैवैते हता पूर्वं निमित्तो भव"**[९] वाक्यतः॥३०॥
दैवासुरविभागे च पुनराश्वासनं हि यत्॥

---

६.भग.गीता १६।१९
७.पु.प्र.म.९ - १२
८.भग.गीता ४।७ - ८
९.भग.गीता ११।३३



**"मा शुच सम्पदं दैवीमभिजातोऽसि पाण्डव"**[१०] **॥३१॥**
पुष्पिकोक्ताध्यायसंज्ञा सर्वथैवोपपद्यते॥
दैवासुरविभागोऽयं योगो जीवेशयोजकः॥३२॥

## ( वक्तृश्लोकसंख्याविमर्शः )

अध्यायेऽस्मिन् समग्रेऽपि वक्ता वै केवलो हरिः॥
आद्येषु त्रिषु श्लोकेषु लक्षणं दैवसम्पदः॥३३॥
लक्षणं चासुरसृष्टेः श्लोकेनैकेन वर्ण्यते॥
लक्षणोत्थां हि चिन्तां च भ्रूभंगेनाभिव्यञ्जिताम्॥३४॥
पार्थस्य हृद्गतां दूरीकर्तुं स्वीयमुखोक्तिना॥
**"मा शुच सम्पदं दैवीमभिजातोऽसि पाण्डव"**[११] **॥३५॥**
लोकत्रयविवक्षात्र न भूरेका विवक्षिता॥
**"द्वौ भूतसर्गौ लोकेस्मिन्"**[१२] वाक्यांशे 'लोक'शब्दतः॥३६॥
श्लोकैः पञ्चदशैरत्र सप्तमादूर्ध्ववर्तिभिः॥
कामो वै मोहजनकः मदः क्रोधात्तु जायते॥३७॥
यस्मिन् यस्य भवेल्लोभ तद्वत्स्वन्येषु मत्सरी॥
शास्त्रोक्ता रिपवः षड् ये तेषु त्रिषु च हेतुता॥३८॥
कामक्रोधौ च लोभश्च नरकद्वारवन्मताः॥
धर्मबोधकशास्त्राज्ञापालने बाधकास्त्विमे॥३९॥
एतेषामतएवात्र दैवजीवोपदेश्यता॥
इत्येवं पञ्चभिः श्लोकैरध्यायस्योपसंहृतिः॥४०॥
प्रसक्तानुप्रसक्तेयं चिन्ता काचिद् इहोच्यते॥
प्रमेयबलरूपां हि कृपां मत्वा स्वतो हि ये॥४१॥

---

१०.भग.गीता १६।५
११.भग.गीता १६।५
१२.भग.गीता १६।६

दैवम्मन्यास्तु दैवा वासुरा वेत्यनिर्णयात्॥
भक्तिं सकामां निर्दुष्टां पुष्टिमार्गे हि मन्वते॥४२॥
कामश्चेन्नरके हेतु भक्तिः कामात्मिका कुतः॥
न भवेन्नरकायैव? तैरियं न विचिन्त्यते॥४३॥
**"न लौकिकः प्रभु कृष्णो मनुते नैव लौकिकम्"**[१३]॥
**"लोकार्थी चेद् भजेत् कृष्णं क्लिष्टो भवति सर्वथा"**[१४]॥४४॥
**"विषयाक्रान्तदेहानां नावेशः सर्वथा हरेः"**[१५]॥
इत्येवमादिवाक्यानां सधैर्ये ह्यवलोकने॥४५॥
कामदोषस्यानुगमः सकामायां कुतो नहि?॥
यावद् देहाभिमानन्तु यावच्छक्त्या सदैव हि॥४६॥
शास्त्राचार्ययोराज्ञोत्थापने नैव भक्तता॥
भक्त्यभावे पुष्टिजीवो भवेन्नो वेत्यनिर्णयः॥४७॥

### (उपसंहारः)

प्रमेयरूपो देवो हि कृष्णस्त्वेको मतः सदा॥
प्रमाणरूपा तद्गीता शास्त्रमेकं मतं सदा॥४८॥
कृष्णसेवा द्विधा प्रोक्ता रूपनामविभेदतः॥
तस्यां कामादि दोषाः मां माभुवन् घातुका क्वचित्॥४९॥

इति श्रीमद्भगवद्गीताषोडशाध्यायप्रतिपाद्यसंक्षेपः
गोस्वामिश्रीदीक्षितात्मजेन श्याममनोहरेण कृतः
सम्पूर्णः

---

१३.शिक्षाश्लो.२
१४.सि.मु.१६
१५.सं.नि.६

॥ श्रीकृष्णाय नमः ॥

॥ श्रीमदाचार्यचरणकमलेभ्यो नमः ॥

## ॥ सप्तदशाध्यायप्रतिपाद्यसंक्षेपः ॥

### ( मंगलाचरणेनोपक्रमः )

अहन्ताममताविद्धं सर्वं हि त्रिगुणात्मकम् ॥
वस्तुगत्या गुणातीते ब्रह्मण्येवार्पितं सदा ॥१॥
अर्पितं चेत् मतिरतिकृतिभिस्तद्विशोधनात् ॥
ब्रह्मपरमात्मश्रीकृष्णे भक्त्यै सेवोचितं भवेत् ॥२॥
अहंममाभिमानस्य शोधनाज्जीवयत्नतः ॥
स्वोपादानगुणातीतभावकाय नमोनमः ॥३॥

### ( प्रतिपाद्यविषयविमर्शः )

देहस्वभावानुरूपा श्रद्धापि त्रिगुणात्मिका ॥
श्रद्धामयोऽयं पुरुषः यो यच्छ्रद्ध स एव सः ॥४॥
यज्ञदानतपांस्यत्र श्रद्धयानुष्ठितानि वै ॥
सात्त्विकादिप्रभेदैस्तु त्रिविधानि भवन्ति वै ॥५॥
ब्रह्म तु त्रिगुणातीतं ब्रह्मनिष्ठैरनुष्ठित - ॥
यज्ञदानतपांसीह गुणातीतानि स्युः पुनः ॥६॥

### ( अध्यायप्रतिपाद्यपूर्वोत्तरसंगतिविमर्शः )

श्रद्धानुकारिनिष्ठैका तथा शास्त्रानुकारिणी ॥
गरीया कतरा मान्या श्रेयसे हि नृणां पुनः ॥७॥
श्रद्धाभावः शास्त्रविधिः कतरश्चोत्तमो मतः ॥
श्रेयोभिलाषिणां लोके पार्थजिज्ञासितन्त्विह ॥८॥
**''यो यो यां यां तनुं भक्तः श्रद्धयार्चितुमिच्छति ॥**



**तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहम् ॥९॥**
**स तया श्रद्धया युक्तस्तस्याराधनमीहते ॥**
**लभते च ततः कामान् मयैव विहितान् हि तान्''** [१] ॥१०॥
एवं निरूपणात् पूर्वं यत् कृष्णेनोदितं पुनः ॥
**''कामैस्तैस्तैर्हृतज्ञानाः प्रपद्यन्तेऽन्यदेवताः ॥११॥**
**तं - तं नियममास्थाय प्रकृत्या नियताः स्वया''** [२] ॥
ततः कामानुचारिण्याः श्रद्धायाः पालको सवै ॥१२॥
भगवानेव भवति षोडशे तत्तु निन्द्यते ॥
**''यः शास्त्रविधिमुत्सृज्य वर्तते कामकारतः ॥१३॥**
**न स सिद्धिमवाप्नोती''** [३] त्युभयोः संगति कथम् ? ॥
अध्यायेऽस्मिन् ततः पार्थजिज्ञासा संगतौ हि या ॥१४॥
दर्शिता निष्ठाविषये अध्यायोपक्रमेण वै ॥
पूर्वोत्तरभावरूपाध्यायस्येयं हि संगतिः ॥१५॥

### ( वक्तृश्लोकसंख्याविमर्शः )

जिज्ञासा त्वाद्यश्लोकेन पार्थस्यात्र निरूपिता ॥
शिष्टैः सर्वैः समाधानं सप्तविंशतिभिस्ततः ॥१६॥
देवतोद्देश्यको द्रव्यदानात्मा 'यज्ञ'उच्यते ॥
देवानां चापि द्रव्याणां दानानां त्रिगुणात्मता ॥१७॥
सा चतुर्थात्तु दशभिः श्लोकैरेतन्निरूपितम् ॥
चतुर्थात्पञ्चभिस्तु तपस्त्रैविध्यमुच्यते ॥१८॥
ततो द्वाभ्यां तु श्लोकाभ्यां दानत्रैविध्यवर्णनम् ॥

---

१.भग.गीता ७।२१
२.भग.गीता ७।२०
३.भग.गीता १६।२३

त्रयोविंशतिश्लोकात्तु षड्भिर्ब्राह्मिकवर्णनम्॥१९॥
प्राकृतैर्हि गुणैः सृष्टिः गुणातीतात्तु ब्रह्मणः॥
लोकनिष्ठैः कृतं सर्वं यत् तत्तु त्रिगुणात्मकम्॥२०॥
ब्रह्मनिष्ठैः कृतं चेत् तत् नैर्गुण्यायोपपद्यते॥
अतोऽत्त्यत्राग्रिमैः षड्भिरेतस्यैव निरूपणम्॥२१॥
'ॐ'इत्येकाक्षरं ब्रह्मवाचकत्वेन वर्णितम्॥
अकारादित्रिभिश्चांशैरुत्पत्त्यादित्रिबोधकम्॥२२॥
ब्रह्मनिष्ठैः कृतानान्तु यज्ञदानादिकर्मणाम्॥
निष्कामता 'तत्'पदेन द्योतितेति विनिर्णयः॥२३॥
ब्रह्मार्थकं कृतं सर्वं 'सत्'च साधुतया मतम्॥
'तद्'इति लोकदृष्टस्य फलस्याभावतः स्फुटम्॥२४॥
'सद्'इति प्रकटं कर्म चेद् ब्रह्मार्थकमत्र हि॥
तदा तु यज्ञदानादिकर्मणां ब्रह्मता मता॥२५॥
सिद्धान्तस्य रहस्ये हि निजाचार्येण कीर्तिता॥
ब्रह्मसम्बन्धकरणात् सर्वेषां देहजीवयोः॥२६॥
पञ्चानामपि दोषाणां निवृत्तिस्तस्य सेवने॥
तस्मादादौ सर्वकार्ये सर्ववस्तुसमर्पणात्॥२७॥
सर्वेषां ब्रह्मतागुणकृद् दोषराहित्यपूर्विका॥
कृतौ मतौ रतौ तत्राहम्ममास्पदयोरपि॥२८॥

### ( उपसंहारः )

शुकवन्मम चैतन्यं बद्धं यत्पञ्जरेऽहमः॥
बहिराकाशवत्सर्वं ममताभासितं पुनः॥२९॥
न लभे न लभे शान्तिं तस्मै चातः समर्पिते॥
स्वभोगायोपलब्धं यत् तेषां तस्मै समर्पणे॥३०॥
तत्प्रसादतयाभोगाग्रहे न ममताग्रहः॥



तत्कृपादृष्टिना सृष्टिरेषा स्यान्मुक्तिवद् ध्रुवा॥३१॥

इति श्रीमद्भगवद्गीतासप्तदशाध्यायप्रतिपाद्यसंक्षेपः
गोस्वामिश्रीदीक्षितात्मजेन श्याममनोहरेण कृतः
सम्पूर्णः

॥ श्रीकृष्णाय नमः॥

॥ श्रीमदाचार्यचरणकमलेभ्यो नमः॥

## ॥ अष्टादशाध्यायप्रतिपाद्यसंक्षेपः॥

### ( मंगलाचरणेनोपक्रमः )

अखण्डितैक्यं त्रैविध्ये योऽसौ निर्वहते सदा॥
श्रीकृष्णो ब्रह्म परमात्मा भगवानिति शब्द्यते॥१॥
ब्रह्मतोपनिषद्वेद्या परमात्मात्मनो रतौ॥
सर्गादिदशलीलानां कर्ता भागवतोदितः॥२॥
स नरस्य सखा भूत्वा नारायणसनातनः॥
यदुद्गीता हि गीतेयं संवादस्तूभयोर्मतः॥३॥
शास्त्रे गुह्याद् गुह्यतरस्वप्रपत्त्युपदेशकः॥
सर्वदेहिशरण्योऽसौ हृदयान्मापसर्पतात्॥४॥

### ( अध्यायप्रतिपाद्यविमर्शः )

अध्यायेऽष्टादशे चास्मिन् पूर्वोक्तनिखिलस्य वै॥
उपसंहाररूपेणाप्युक्तानुक्तयोरिव॥५॥
उपदेशोऽर्जुनाय श्रीकृष्णः प्राह सर्वशः॥
दुरुक्तं नहि स्वोक्ते वै भगवत्त्वातु सम्भवेत्॥६॥
वार्तिकत्वमतो वक्तुं नास्याध्यायस्य शक्यते॥
तथापि स्वोपदिष्टस्य सर्वस्यापि विकल्पतः॥७॥
त्यागात्यागविभागेनांशतः त्याज्य निरूपणात्॥
अंशतोऽस्ति दुरुक्तत्वमतो वार्तिकरूपता॥८॥
भाष्यान्ते वार्तिकत्वं च नातीवानुपपद्यते॥
अत आश्रित्य तां रीतिमुक्तानुक्तदुरुक्तितः॥९॥
पूर्वोक्तानां हि विषयाणामिह सिंहावलोकनम्॥



कर्म सांख्यं च ज्ञानञ्च भक्तिं भगवदाश्रयम्॥१०॥
अध्यायेऽष्टादशे चात्र पुनः प्रोवाच केशवः॥
अर्जुनप्रार्थितं **"शाधि त्वां प्रपन्ने"**[1] ति वाक्यतः॥११॥
स्वतः प्रपन्नपार्थाय न प्राप्तप्रापको विधिः॥
प्रपत्तेर्हि विधिश्चान्ते आशिष्यामन्त्रणेऽथवा॥१२॥
**"सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज"**[2]॥
भगवता 'व्रज'इत्युक्ते विधौ तत्कल्पना वृथा॥१३॥

### ( श्लोकवक्तृसंख्याविमर्शः )

उपक्रमस्तु पार्थस्य चाद्यपद्येन वर्णितः॥
संन्यासत्यागयोस्तत्त्वजिज्ञासेह कारिता॥१४॥
तत्समाधानरूपेण भगवद्वचनानि वै॥
एकसप्ततिभिः श्लोकैः पार्थसन्देहच्छेदनात्॥१५॥
त्रिसप्ततितमे श्लोके श्रुत्वा पार्थस्य स्वीकृतिः॥
स्वमोहनाशाद् बोधाप्त्या कृष्णोक्तानुकृतेस्ततः॥१६॥
अन्ते चतुर्भिः श्लोकैस्तु गीताशास्त्रस्य संस्मृतिः॥
व्यासप्रसादतः श्रुत्वा कृष्णोक्तौ हर्षविस्मयौ॥१७॥
पार्थश्रीकृष्णयोरस्य संवादस्योपसंहृतौ॥
नीतिभूतिजयश्रीणां ध्रौव्यं वै कृष्णपार्थयोः॥१८॥

### ( भगवदुक्तप्रतिपाद्यविमर्शः )

श्लोकेनैकेन संन्याससत्यागयोस्तत्त्ववर्णनम्॥
यज्ञदानतपःकर्मात्याज्यं त्याज्यं तु दोषवत्॥१९॥
सात्त्विकादिप्रभेदेन त्यागत्रैविध्यवर्णनम्॥

---

१.द्रष्ट.भग.गीता २।७

२.भग.गीता १८।६६

श्लोकैरेकादशैरुक्त्वा सांख्यसिद्धान्तसंग्रहौ ॥२०॥
पञ्चानामिह हेतूनां हेतुत्वं सर्वकर्मसु ॥
संनिरूप्य त्रिभिः श्लोकैः प्रतीत्योत्पादहेतुवत् ॥२१॥
स्वमात्रकर्तृताहन्ता दुर्मतिरेव केवला ॥
मध्ये सप्तदशे श्लोके युद्धेऽहंकारवर्णनात् ॥२२॥
स्वधर्मबुद्ध्यानुष्ठाने न हिंसादोषस्पर्शिता ॥
अतः सांख्यविचारेणाहंभावरहिता मतिः ॥२३॥
भवेद् यस्य न तस्य स्याद् बन्धनं युद्धकर्मणः ॥
एतादृशे तु पुंस्येवं युद्धादेशानियोज्यता ॥२४॥
एवं कर्मचोदनायां ज्ञानेन ज्ञेयज्ञातृता ॥
ज्ञातुं शक्नोति किं केन कः कुर्यात् कदा क्व च ॥२५॥
ज्ञानकर्मकर्तृणां च सत्त्वादित्रयभेदतः ॥
एकोनविंशतिश्लोकात् त्रित्रिश्लोकैर्निरूपणम् ॥२६॥
धृतेश्चापि सुखस्यापि सप्तश्लोकैर्निरूपणम् ॥
सत्त्वादित्रयभेदानां सर्वप्राकृतवस्तुषु ॥२७॥
प्रोतता चोदिता तेन चातुर्वर्ण्येऽपि तादृशम् ॥
श्लोकैश्चतुर्भिरुक्त्वैवं स्वकर्मणि रतस्य हि ॥२८॥
नरस्य कर्मसंसिद्धिस्तस्य चार्चनधीकृता ॥
सप्तचत्वारिंशततमेऽत्याज्यता स्वस्यकर्मणः ॥२९॥
तत्सर्वकर्मानुष्ठाने रागद्वेषविवर्जिते ॥
नैष्कर्म्यसिद्धिमाप्नोति कर्मसंन्यासतः पुनः ॥३०॥
तादृक्कर्मानुष्ठानाद्वै ब्रह्मप्राप्तिरसंशया ॥
अथ पञ्चाशततमाद् ज्ञाननिष्ठानिरूपणम् ॥३१॥
चतुश्लोकैः कथञ्चात्र तत्फलत्वेन लभ्यते ॥
भक्तिनिष्ठा तया तस्य तत्त्वज्ञानप्रवेशने ॥३२॥
भक्तेः पर्यवसानं तु भजनीयादेशपालने ॥



अन्यथाहंकृतेः नाशः कर्मबद्धस्य निश्चितः ॥३३॥
ईशोहि सर्वजीवान् वै कर्म कारयितुं क्षमः ॥
अप्यनिच्छतामपि नृणां लोके चाधीन्यभावतः ।३४॥
स्वकर्मणां हि निर्वाहो भक्त्या धर्मधर्मिणोः ॥
प्रपत्तिरेषा संप्रोक्ता मर्कटन्यायतः क्वचित् ॥३५॥
मार्जारीन्यायतश्चेषा पार्थायोपदेशिता ॥

**( उपसंहारः )**

इत्यष्टादशाध्यायप्रतिपाद्यविषयस्य वै ॥३६॥
संक्षेपो वर्णितो नूनं प्रसादात् श्रीहरेर्मया ॥
जीवबुद्ध्येह यो दोषो वर्णने चेत्तु मामके ॥३७॥
सर्वं श्रीकृष्णचरणेऽर्पिते निर्दोषब्रह्मता ॥
निर्दोषं हि समं ब्रह्मगीतोक्ते श्रद्धया मम ॥३८॥
षट्सप्ततितमे वर्षे आयोः स्वाचार्यसंश्रयात् ॥
गीताध्यायप्रतिपाद्यसंक्षेपः पूर्णतामगात् ॥३९॥

एकं शास्त्रं देवकीपुत्रगीतम्
एको देवो देवकीपुत्रएव ॥
यः शास्त्रार्थं स्वीयमित्थं जगाद्
तं कृष्णास्यं वल्लभं सन्नमामि ॥४०॥

इति श्रीमद्भगवद्गीताष्टादशाध्यायप्रतिपाद्यसंक्षेपः
गोस्वामिश्रीदीक्षितात्मजेन श्याममनोहरेण कृतः
सम्पूर्णः

# ।। परिशिष्टम् ।।

॥ श्रीकृष्णाय नमः ॥
॥ श्रीमदाचार्यचरणकमलेभ्यो नमः ॥

## उपनिषदुक्तरसस्य नाट्यशास्त्रोक्तरसेन ऐक्यमनैक्यम् वेति रसमीमांसा

[ "शश्वत् स्वरूपमहसैव निपीतभेदमोहाय
बोधधिषणाय नमः परस्मै।
विश्वोद्भवस्थितिलयेषु निमित्तलीला -
रासाय ते नम इदं चकृमेश्वराय॥
त्वं भावयोगपरिभावितहृत्सरोज -
आस्से श्रुतेक्षितपथो ननु नाथपुंसां।
यद्यद्धिया त उरुगाय विभावयन्ति
तत्तद्वपुः प्रणयसे सदनुग्रहाय"[१]॥ ]

### ( मंगलाचरणम् )

सर्वान्ततरतमानन्दः श्रुतिप्रोक्तो रसात्मकः॥
सदानन्दः कृष्णरूपो भगवान् तं भजामहे॥१॥

### ( उपक्रमः )

"**एकस्यैवाद्वितीयस्य ब्रह्मणो रसरूपता॥
कृष्णस्य नटवरत्वोक्तिः**"[२] श्रीभागवते यथा॥२॥
नटराजशिवश्चापि शैवशास्त्रे विवर्णितः॥
नाट्यशास्त्रे रसश्चोक्तो नचाद्वैतात्मकस्तु सः॥३॥
उभयोरैक्यमथवा प्रभेदो वेति चिन्त्यते॥

### ( तत्र शंकासमाधाने )

विभावानुभावभेदात् तथा सञ्चारिभेदतः॥४॥
निष्पद्यमानो जन्यो वा रसो ब्रह्म कथं भवेत्?॥
देशकालस्वरूपैर्हि यस्यास्त्यपरिच्छिन्नता॥५॥
तादृशो ब्रह्मणस्तावद् रसत्वं सम्भवेत् कथम्?॥
शैवशास्त्रे शिवो ब्रह्म वैष्णवे विष्णुरेव हि॥६॥
"**त्वामेवान्ये शिवोक्तेन मार्गेण शिवरूपिणम्**"[३]॥
इति कृष्णात्मकौ चोभौ श्रीमद्भागवतोदितौ॥७॥
"**नहि सर्वस्य कामाय सर्वं भवति वै प्रियम्॥
कामाय चात्मनः सर्वं प्रियं**"[४] श्रुतिषु वर्णितः॥८॥
"**अहमात्मात्मनां धातः प्रेष्ठः सन् प्रेयसामपि॥
अतो मयि रतिं कुर्याद् देहादिर्यत्कृते प्रियः**"[५]॥९॥
तदत्र नात्मा जीवात्मा परमात्मा विवक्षितः॥
कृष्णो भागवते ब्रह्मपरमात्माभगवानपि॥१०॥
वर्णिता सकला सृष्टिः रासलीलास्वरूपिणी॥
'शश्वत्स्वरूप'वचने आदावुक्ते इहापि वै॥११॥
सत्येवं द्विविधा ज्ञेया तस्यैवं रसरूपता॥
स्वलीलानैक्यसंकल्पोद्भूता सृष्टिस्वरूपिणी॥१२॥
भक्तबुद्धिविभावोत्थान्या सृष्टिः भक्तगोचरी॥
तस्माच्छ्रुतौ सृष्टिबाह्या परैका रसरूपता॥१३॥
सृष्टावाभ्यान्तरी चान्या भक्तभावानुसारिणी॥
आद्यात्मरतिविस्तारतया संकल्पिता स्वतः॥१४॥
द्वितीया भक्तवरणाद् तद्भावात्मतनोरपि॥
विवरणाद् रसरूपत्वं श्रुत्युक्तं नचान्यथा॥१५॥
स्वभावसिद्धस्यैकस्य सामर्थ्याद् यात्वनेकता॥
द्वितीये चैच्छिके द्वैते तदद्वैतस्य सम्भवात्॥१६॥

---

१. भाग. पुरा. ३।९।१४,११
२. भाग. पुरा. १०।१८।५
३. भाग. पुरा. १०।४०।८
४. बृह. उप. ४।५।६
५. भाग. पुरा. ३।९।४२

अद्वैतरूपे तत्त्वे हि श्रुत्येकाधिगते सदा॥
नाट्यशास्त्रोक्तभेदोपि रसानामुपपद्यते॥१७॥
ऐच्छिकं तच्च द्वैतं हि बहुधा श्रुतिभिरुच्यते॥
आत्मद्वैधापातनं च स्त्रीपुंभेदोपलक्षितम्[६]॥१८॥
"**द्वे वाव ब्रह्मणो रूपं**"[७] वचनेपि तथापरम्॥
सच्चत्यच्चात्मकं बोधदृष्ट्या वाण्या तथा परम्॥१९॥
निरुक्तंञ्चानिरुक्तञ्च तत्त्वदृष्ट्या परं तथा॥
सर्वत्र विद्यमानत्वात्सर्वातीततयापि च॥२०॥
निलयनञ्चानिलयनञ्चेत्येवं श्रुतिषु वर्णितम्॥
तत्त्वकर्तव्यबुद्धिभ्यां विश्वं सत्यानृतात्मकम्॥२१॥
तच्चापि तस्य लीलेति वक्तुं श्रुत्या विबोधितम्॥
"**सत्यञ्चानृतञ्चापि ह्यभवत् सत्यमेव तत्**॥२२॥
**तदैक्षत प्रजायेय बहुस्या**"[८] मिति वर्णने॥
"**विचित्य सर्वरूपाणि नामान्यभिवदन् पुनः**"[९]॥२३॥
कर्माण्यनेकरूपाणि त्रित्वेऽपि ह्यैक्यरूपता॥
ब्राह्मिकी च तदैक्यैऽपि नामादिभिः त्रिधा भिदा॥२४॥
नच वाच्यमनित्यत्वात् त्रयाणामसदात्मता॥
कादाचित्कं हि यत् सत् स्यात् तदनित्यमिहोच्यते॥२५॥
अन्यदा हि सतोऽसत्त्व श्रुत्यापि प्रतिषिध्यते॥
"**कथमसतः सज्जायेत**"[१०] इत्यत्र श्रुताविह॥२६॥
सत्त्वेनेदं प्रतीतं च प्रागपि स्यात् सदेव हि॥
"**चतुष्पदः ब्रह्मपादारनित्यास्तु दिगादयः**"[११]॥२७॥

६.द्रष्ट.बृह.उप.१।४।३
७.बृह.उप.२।३।१
८.तैत्ति.उप.२।६
९.तैत्ति.आर.३।१३।२ / चिद्.उप.१२।७
१०.छान्दो.उप.६।२।२
११.बृह.उप.४।५ - ८



"**पादोऽस्य विश्वाभूतानि त्रिपादस्यामृतं दिवि**॥
**भूतभव्यात्मकं सर्वं विश्वं पुरुषएव सः**"[१२]॥२८॥
ततश्च रसता तस्य न मृषा भवितुमर्हति॥
तस्याः चात्मरतेरेव द्वेधापातनपूर्विका॥२९॥
लीलेयं सृष्टिरूपेति सर्वथैव तदात्मिका॥
सच्चिदानन्दता तस्य मूलरूपतयोदिता॥३०॥
सृष्ट्युपादानकर्तृत्वधर्मदृष्ट्यान्यथापि च॥
सत्यं ज्ञानमनन्तं हि ब्रह्म तद्धि निरूपितम्॥३१॥
वियदादि - सृष्टजगत्सापेक्षं रूपमेव तत्॥
सत्यस्य 'सच्चत्यच्चापि' व्युत्पत्तिः श्रौतीरेव हि॥३२॥
अविज्ञानञ्चविज्ञानमुभे ज्ञानात्मके मते॥
आनन्दात्मकतानन्त्यं रूपनाम्नोश्च कर्मणाम्॥३३॥
सृष्टौ विभाजनात् तेषां स्यादानन्दतिरोहतिः॥
आकाशादिषु तत्त्वेषु ह्युत्तरोत्तरजन्मसु॥३४॥
पार्थिवेष्वन्नप्राणादिकोशेषु पञ्चमेऽन्यथा॥
"**आनन्द आत्मा**"[१३] चेत्युक्त्या सर्वात्मत्वं हि द्योतितम्॥३५॥
सर्वगूढस्वरूपं यत् तत् लक्ष्यीकृत्य वर्णितम्॥
"**रसो वै सः**"[१४] इति श्रुत्या रसलाभे हि निर्भयम्॥३६॥
रमणं बृहदारण्योदितं तेनैकवाक्यता॥
सृष्टी रसात्मिका लीलाचैका भक्तेषुचापरा॥३७॥
सृष्टौ हि भक्तभावानामनुसरणाद् रसालता॥
विभावाद्युद्भवाः भावाः रसशास्त्रोक्तरीतिकाः॥३८॥
हृद्भावस्य रसत्वं वै विभावादिसुभावितम्॥
जायमानोप्यतो भावो रसिकेषु रसो मतः॥३९॥

१२.ऋक्.संहि.१०।९०।१७
१३.तैत्ति.उप.२।५
१४.तैत्ति.उप.२।७

ब्रह्मणो भावयोगेन विभावितवपुष्टवधीः ॥
प्रमाणं रसशास्त्रीयं रसतायां हि कथ्यते ॥४०॥
सौन्दर्यमद्भुतं लोके रसस्तस्मिन्नियामकः ॥
प्रेम्णः प्रेमाकर्षणाय तेन नाविन्यमश्नुते ॥४२॥
पुरातनेषु सिद्धेषु देशकालादिवस्तुषु ॥
अपरिच्छिन्नं परिच्छिन्नेष्वेवं हि तदुच्यते ॥४३॥
अस्तिभातिप्रियत्वं च तद्धर्माणां हि चान्वयः ॥
रूपादिषु परिच्छिन्नमात्राभिरभिव्यज्यते ॥४४॥
तेषु धर्मिब्रह्मणो वै ज्ञानाभावाद्धि मुग्धता ॥
जीवानां सा ह्यविद्यातो विद्यातो तन्निराकृतिः ॥४५॥
चतुष्पर्वैरात्मसौख्यं भक्त्या तु भजनीयगम् ॥
सौख्यं भवेद् यदा मोक्षे तत्सालोक्यादिनामभाक् ॥४६॥
भगवत्कृपाजातभक्त्या स्याच्च तस्मिन् निरुद्धता ॥
सा चैषा भक्तिरूपा वै जीवन्मुक्तिवदास्थिता ॥४७॥
तस्माद् भक्तिरसो येन ब्रह्मात्मा भगवानपि ॥
भावात्मरूपप्राकट्याद् रसात्मकतयोदितः ॥४८॥
एतन्निरूपणं तत्र श्रीमद्भागवते कृतम् ॥
''**मल्लानामशनि**''[१५] रित्यादि वचनेषु न संशयः ॥४९॥
''**कामं क्रोधं भयं स्नेहमैक्यं सौहृदमेव वा ॥**
**नित्यं हरौ विदधतो यान्ति तन्मयतां हि ते**''[१६] ॥५०॥
मयडत्रापि प्राचुर्ये यथानन्दमये श्रुतौ ॥
प्रियमोदप्रमोदानन्दात्मवैविध्यद्योतनात् ॥५१॥
प्रियादीनां त्रयाणां वै धर्माणाम् उद्गमात् खलु ॥
सृष्टौ सैषा हि लीला या तस्याः भक्तेः समुद्भवः ॥५२॥
भक्तेश्चाप्युद्भवो भूमौ लीलाप्राकट्यहेतुकः ॥
बीजप्रोहवदुभयोः स्यादन्योन्यहेतुता ॥५३॥
पुष्टिभक्तिरियं तस्मात् श्रीमदाचार्यवर्णिता ॥


---

१५.भाग.पुरा.१०।४०।१७
१६.भाग.पुरा.१०।२६।१५



**( पाश्चात्यसौन्दर्यमीमांसयैकवाक्यता )**

सौन्दर्यमष्टभिश्चांगैरुपेतं वर्णितं परैः ॥५४॥
सौन्दर्यशास्त्रे पाश्चात्ये तत्समन्वयचिन्तने ॥
प्रतिनिधिश्चाभिव्यक्तिः नूतनत्वं परंपरा ॥५५॥
रसालता च लीलानुभावकत्वं तथा पुनः ॥
युक्तांगैरंगिनो व्यक्तिरनुभूतौ चमत्कृतिः ॥५६॥
अनिरुक्तानुभूतेश्च सौन्दर्यमभिव्यज्यते ॥
तदेतद् भक्तिभावेन भजनीयानुभवेन वै ॥५७॥
भक्तानां भगवत्सौन्दर्यानुभूतौ न किं भवेत ॥



### ( उपसंहारः )

तस्माद् अनाद्यनन्तस्य ब्रह्मणोऽपि रसात्मता॥५८॥
अतश्चोपनिषत्सूक्तरसस्यैक्यमथेतरत्॥
नाट्यशास्त्रोदितरसेनेति मिमांसिते सति॥५९॥
ऐक्यं नैक्यविरोधेन किन्त्वन्योन्यसहिष्णु यत्॥
तादात्म्यमेव विज्ञेयमित्येको निर्णयो ध्रुवः॥६०॥
निरूपितो मयाचार्यलब्धबुद्ध्या नचान्यथा॥
दीक्षितात्मजश्यामेन स्वीयसन्तोषहेतवे॥६१॥

इति गोस्वामिश्रीदीक्षितात्मजेन श्याममनोहरेण
उपनिषदुक्तरसस्य नाट्यशास्त्रोक्तरसेन
ऐक्यमनैक्यं वेति रसमीमांसा
सम्पूर्णा



### उद्धृतवाक्यसन्दर्भः

१. विभावानुभावसंचारिभावनिष्पन्नस्थायिभावगोचरता.
२. नवारे सर्वस्य...सर्वं प्रियं भवति आत्मनस्तु कामाय सर्वं प्रियं भवति. ( बृह.उप.२।४।५ )
३. सच्चत्यच्चाभवत् निरुक्तंचानिरुक्तं निलयनंचानिलयनं च सत्यंचानृतं च सत्यम् अभवत्. ( तैत्ति.उप.२।६ )
४. तदैक्षत बहुस्यां प्रजायेय, सर्वाणि रूपाणि विचित्य धीरो नामानि कृत्वाभिवदन यदास्ते, ब्रह्मैतद्धि सर्वाणि रूपाणि... नामानि...कर्माणि बिभर्ति. ( तैत्ति.आर.३।१३।२ / चिद्.उप.१२।७ )
५. कथमसतः सज्जायेत सत्त्वैव सौम्य इदमग्र आसीद् एकमेवाद्वितीयं तदैक्षत बहुस्यां प्रजायेय, सवै नैव रेमे, स द्वितीयमैच्छत्. ( छान्दो.उप.६।२।२ )
६. नाभ्या आसीद् अन्तरिक्षं शीष्णौ द्यौ समवर्तत पद्भ्यां भूमिं दिशः श्रौत्रात् तथा लोका अकल्पयन्, पुरुषएवेदं सर्वं यद् भूतं यच्च भव्यम् उतामृतत्वस्येशान यदन्नेन अतिरोहतिः, पादोस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि त्रिपाद् उर्ध्व उदैत् पुरुष. ( ऋक्.संहि.१०।९०।१७ )
७. सत्यं ज्ञानमनन्तं ब्रह्म. ( तैत्ति.उप.२।१ )
८. ब्रह्म ते ब्रवाणि, कस्तं मदामदं देवं मदन्यो ज्ञातुमर्हति? ( कठोप.१।२।२०-२१ )
९. आनन्दो ब्रह्मेति व्यजानात्, तस्य प्रियमेव शिरः... आनन्द आत्मा, यो वै भूमा तत् सुखं. ( तैत्ति.उप.३।६ )

१. सौन्दर्य ⟷ प्रेम / प्रिय ⟷ सुन्दर
- द्वैतघटितविषयविषयिभावः.

२. परस्परजन्यजनकता / धर्म-धर्मिता

३. ब्रह्म = (क) एकस्यानेकीभवनं तत्त्वोपदेशगम्यं (ख) अनेकेषु एकत्वनिदिध्यासनम् साधनोपदेशगम्यम्.
(क) तस्माद् (अपरिच्छिन्नसत्यज्ञानाभ्यां) वा एतस्माद् आत्मनः आकाशः-वायुरग्निजलपृथिवीऔषधि-अन्न-अन्नमय पुरुषः.
(ख) अन्नमय-प्राणमय-मनोमय-विज्ञानमय - आनन्दमय (रस) = (प्रिय-मोद-प्रमोद-आनन्द-ब्रह्म).

४. सच्चत्यच्चाभवत् निरुक्तं चानिरुक्तं निलयनं चानिलयनं च विज्ञानं चाविज्ञानं च सत्यं चानृतं च सत्यमभवत् अतः द्वे वा ब्रह्मणो रूपे मूर्तं चैवामूर्तं च मर्त्यं चामृतं च स्थितं च यच्च सच्च त्यच्च.

५. अतः एकरसे अनेकरसाविर्भावः सौन्दर्यम् अनेकरसात्मके जगति एकस्स्यानुभूतिः सौन्दर्यम्.
अतः सति निरुक्ते निलयने विज्ञाने सत्ये त्यतः अनिरुक्तस्य अनिलयनस्य अविज्ञानस्य अनृतस्य आविर्भावः चमत्कारः.
त्यति अनिलयने अनिरुक्ते अविज्ञाने अमृते सतः निरुक्तस्य निलयनस्य विज्ञानस्य सत्यस्य साक्षात्कारः चमत्कारः.

॥ श्रीकृष्णाय नमः ॥

॥ श्रीमदाचार्यचरणकमलेभ्यो नमः ॥

# ॥ श्रुतिगीतासूक्ष्मटीका ॥

## ( कारिकाविवक्षितश्रुतियोजनोपेता )

### ( मंगलाचरणम् )

एकमेवाद्वितीयं चापरिच्छिन्नं हि सर्वथा ॥
सर्वनामैकनीडं तद् ब्रह्म कृष्णात्मकं श्रये ॥१॥
विधानैरभिधानैश्च विकल्प्यापोहनैरपि ॥
शब्दभेदमुपाश्रित्य भिन्नं चाभिन्नमेव च ॥२॥
कर्मशब्दैः क्रियारूपं ज्ञानं तद् मानशब्दतः ॥
प्रियं स्तुत्यं स्तवैः यत् तत् सच्चिदानन्दविग्रहम् ॥३॥
वेदस्तुत्याः सूक्ष्मटीकायामहं योजनाय वै ॥
श्रुतीनां संग्रहं कुर्वे ध्यात्वाचार्यपदाम्बुजम् ॥४॥

### ( उपक्रमः )

**''अष्टत्रिंशे श्रुतीनां हि यथा वाच्यं बृहद् भवेत् ॥**
**तदर्थं पूर्वपक्षादिसिद्धान्तफलमीर्यते''**[१] ॥५॥
परीक्षिद्वचनं पूर्वपक्षोत्थापकमेव हि ॥
सिद्धान्तस्य समासोक्तिः व्याख्यायां पूर्वसूचिता ॥६॥
**''ब्रह्मन् ब्रह्मण्यनिर्देश्ये निर्गुणे गुणवृत्तयः ॥**
**कथं चरन्ति श्रुतयः साक्षात् सदसतः परे''**[२] ॥७॥
कारिकायाः सुबोधिन्यां समाधानं जगुः स्वयम् ॥
आचार्यचरणाः खण्डाखण्डाद्वैतविवक्षया ॥८॥
**''अनन्तगुणपूर्णो हि हरिर्ब्रह्मश्रुतिस्तथा ॥**

१.सुबो.कारि.१०।८४।८
२.भाग.पुरा.१०।८४।१



**फलप्रमेयमानत्वं सच्चिदानन्दतां गतम्''**[३] ॥९॥
अवाच्यं मूलरूपेण सृष्टबुद्ध्यादिवाच्यता ॥
लोकवेदपदैः शक्या लीलायामैच्छिकी सदा ॥१०॥
पत्रावलम्बनेप्येतद् यथोक्तं तदिहोच्यते ॥
**''ब्रह्मवादे निरुक्तिस्तु न वक्तव्यैव कुत्रचिद् ॥११॥**
**वस्तुतो ब्रह्म सर्वं हि व्यवहारस्तु लोकतः''**[४] ॥
ब्रह्मणोऽव्यवहार्यस्य व्यवहार्यत्वसिद्धये ॥१२॥
धर्मिणि सच्चिदानन्दे प्राक्तु धर्मविभाजनम् ॥
सत्ता चैतन्यमानन्त्यं रूपनाम्नोर्हि कर्मणाम् ॥१३॥
सदंशे रूपप्राकट्यं चिदंशे नामधर्मिता ॥
अन्योन्यसहकारेण स्वस्वकार्येषु कारिता ॥१४॥
एतयो रूपनाम्नोर्वै मूलकर्मप्रसाधिता ॥
अव्यक्तरूपप्रकृतौ रजस्सत्त्वतमांसि च ॥१५॥
अक्षुब्धगुणसाम्यात्तु क्षोभात्तेषु विकारिता ॥
प्रकृतेर्विकारहेतुत्वाद् महदादिक्रमेण हि ॥१६॥
**''बुद्धीन्द्रियमनःप्राणान् जनानामसृजत् प्रभुः ॥**
**मात्रार्थं च भवार्थं च आत्मनेऽकल्पनाय च''**[५] ॥१७॥
औपाधिकावबोधार्थं जीवचैतन्ययोगिनाम् ॥
मात्राणामुपकारित्वं सदंशे भूतहेतुतः ॥१८॥
रूपनाम्नोस्ततस्त्वेवम् इतरेतरयोगिता ॥
चिदंशबुद्धौ कार्यत्वं बाह्यरूपकृतं हि तत् ॥१९॥
ज्ञाप्यत्वञ्चापि रूपाणां नामहेतुकृता मता ॥
तेनेह बोधो जीवेषु क्रियाज्ञानोभयात्मकः ॥२०॥

३.सुबो.कारि.१०।८४।५-६
४.पत्रा.३
५.भाग.पुरा.१०।८४।२

मनसो ह्युभयरूपत्वं सम्बन्धाधायकं मतम्॥
शब्दतन्मात्रश्रवणे बुद्धौ नाम्नां समुद्भवः॥२१॥
ततो वेदादिशब्दानामपि बुद्धौ विधारणा॥
एवं त्रिगुणवृत्त्यापि निर्गुणे श्रुतिचारणम्॥२२॥
विषयस्येह नैर्गुण्यं त्रैगुण्यं विषयिण्यपि॥
अतोऽमेयस्य मानानि श्रुतिरूपाणि सर्वथा॥२३॥
अवाच्यवाचकान्येव नामानि सकलान्यपि॥
प्रक्रियायाश्च प्रामाण्ये जनलोककथोदिता॥२४॥

**''यो ब्रह्मवादः पूर्वेषां जनलोकनिवासिनाम्॥
स्वायम्भुव! ब्रह्मसत्रं जनलोकेऽभवत्पुरा॥२५॥
तत्रस्थानां मानसानां मुनीनामूर्ध्वरेतसाम्॥
ब्रह्मवादः सुसंवृत्तः श्रुतयो यत्र शेरते''**[६]॥२६॥

प्रश्नप्रवचने तत्र प्रक्रियेयं निरूपिता॥॥

तथाहि :

**''स्वसृष्टमिदमापीय शयानं सह शक्तिभिः॥२७॥
तदन्ते बोधयाञ्चक्रुः तल्लिंगैः श्रुतयः परम्॥
यथा शयानं सम्राजं बन्दिनस्तत्पराक्रमैः॥२८॥
प्रत्यूषेऽभेत्य सुश्लोकैः बोधयन्त्यनुजीविनः''**[७]॥

सर्वज्ञसर्वशक्तेर्हि प्रमेयस्य प्रमाणतः॥२९॥
समुद्बोधनमेतद्धि तच्छ्रुतावेव दर्शितम्॥

तथाहि :

**''नैव इह किञ्चन अग्रे आसीद् मृत्युना इदम् आवृतम् आसीद् अशनायया. अशनाया हि मृत्युः. तद् मनो अकुरुत 'आत्मन्वी स्याम्' इति सो अकामयत 'द्वितीयो मे आत्मा जायेत' इति स मनसा वाचं मिथुनं समभवद्. अशनायाः मृत्युः, तद् यद्रेतः आसीत् स संवत्सरो अभवत्. न ह पुरा ततः संवत्सरः आस. तम् एतावन्तं कालम् अबिभः. यावान् संवत्सरः तम् एतावतः कालस्य परस्ताद् असृजत्. तं जातम् अभिव्याददात्. स 'भाण्' अकरोत् सैव वाग् अभवत्. स ऐक्षत् 'यदि इमम् अंस्ये कनीयो अन्नं करिष्ये'इति स तदा वाचा तेन आत्मना इमं सर्वम् असृजत. यदिदं किञ्च ऋचो यजूंषि सामानि छन्दांसि यज्ञान् प्रजाः पशून्''**[८]

बृहदारण्यके चैषा प्रक्रिया समुदाहृता॥३०॥
महाशनाया प्रलयः स्वस्मिन् सृष्टस्य स्वात्मनि॥
द्रष्टरि सर्वदृश्यस्यान्तःस्थितिर्योगनिद्रया॥३१॥
**''अत्ता चराचरग्रहणात्''**[९] सूत्रोक्ता मृत्युरूपता॥
पुनर्जागरणे पूर्वं स्वमनोजागरो मतः॥३२॥
मनो नैकाकि रमते वाण्यातस्तस्य मैथुने॥
आविर्भावो नामसृष्टेः तस्याः रूपप्रबोधनम्॥३३॥
प्रधानरूपादव्यक्ताद् आकाशमहतोः[१०] सृजिः॥
रूपात्मिका ततश्चैवं साधितेऽवाच्यवाच्यते॥३४॥
उद्बोधश्चात्मनश्चैवमात्मना समपद्यत॥
ब्रह्मवादतिरस्कारोऽन्यथाऽन्येन प्रबोधनम्॥३५॥
सिद्धान्तमुक्तावल्यां तत्कण्ठेनोक्तमेव हि॥
**''अपरं तत्र पूर्वस्मिन् वादिनो बहुधा जगुः॥३६॥**

---

६.भाग.पुरा.१०।८४।८ - १०
७.भाग.पुरा.१०।८४।१२ - १३

८.बृह.उप.१।२।१-५
९.ब्रह्म.सू.१।२।३।९
१०.द्रष्ट.तैत्ति.उप.२।१

**मायिकं सगुणं कार्यं स्वतन्त्रं चेति नैकधा॥**
**तदेवैतत्प्रकारेण भवतीति श्रुतेर्मतम्'' [११] ॥३७॥**
ब्रह्मवादप्रक्रियान्ते संक्षिप्योक्ता स्तुतावपि॥
तत्पार्श्वसंस्थिताभिस्तु श्रुतिभिः सृष्ट्युपक्रमे॥३८॥

तथाहि :

**''योऽस्योत्प्रेक्षक [क] आदिमध्यनिधनो [ख]**
**योऽव्यक्तजीवेश्वरो [ग]**
**यः सृष्ट्वेदमनुप्रविश्य [घ] ऋषिणा [ङ]**
**चक्रे पुरः शास्ति ताः॥**
**यं सम्पद्य जहात्यजामनुशयी [च]**
**सुप्तः कुलायं यथा**
**तं कैवल्यनिरस्तयोनिम् [छ] अभयं [ज]**
**ध्यायेद् अजस्रं हरिम्'' [१२] ॥३९॥**

संक्षिप्ते ब्रह्मवादेऽस्मिन् बह्म तद् बहुधोदितम्॥
तस्य प्रागनुसन्धानं नूनं बोधोपकारि वै॥४०॥

तथाहि :

दृश्यमानस्य जगतः आद्यो द्रष्टा सएव हि [क]॥
**''अग्रे आसीद् ब्रह्म वेदमवेदात्मानमेव तत्॥४१॥**
**'ब्रह्मास्मी'त्यभवत् सर्वमतो दृश्याखिलं जगत्'' [१३]॥**
जगतश्चादिमध्यान्तरूपं चापि तदेव हि [ख]॥४२॥
**''सर्वं पुरुषएवेदं भूतं च भाव्यमप्युत॥**
**उतामृतत्वस्येशान यदन्नेनातिरोहति'' [१४]॥४३॥**

---

११.सि.मु.४ - ५
१२.भाग.पुरा.१०।८४।५०
१३.बृह.उप.१।४।१०
१४.ऋक्.संहि.१०।९०।२



जडजीवेशरूपत्वं त्रैविध्यं चैकब्रह्मणः [ग]॥
तस्य श्रुत्येकगम्यत्वात् स्वीकार्यं वेदवादिभिः॥४४॥

तथाहि :

**''क्षरं प्रधानम् अमृताक्षरं हरः क्षरात्मानौ ईशते देवएकः...**
**भोक्ता भोग्यं प्रेरितारं च मत्वा**
**सर्वं प्रोक्तं त्रिविधं ब्रह्मम् एतत्'' [१५]॥४५॥**
प्रविश्यान्तर्नियमनं स्वसृष्टानां तथा मतम् [घ]॥
**''सृष्ट्वा तदेवानुविशज्जातं सर्वमिदं ततः'' [१६]॥४६॥**
बृहदारण्यकोक्तापि पुरःसृष्टिस्तथा मता॥
**''पुरश्चक्रे तु द्विपदः पुरश्चक्रे चतुष्पदः॥४७॥**
**पुरः स पक्षी भूत्वा पुरः पुरुष आविशत्'' [१७]॥**
अन्तर्नियामकत्वं च **''यः पृथिव्यादि''**नोदितम्॥४८॥
**''य आत्मनी''**त्यन्तं यावत् तत्रान्तर्यामिब्राह्मणे॥
बाह्यं नियामकं रूपं शाब्दं वेदादिकं मतम् [ङ]॥४९॥
तत्तु श्वेताश्वतराद्युक्तं पुराणस्मृतिभिस्तथा॥
**''यो ब्रह्माणं विदधाति पूर्वं**
**यो वै वेदांश्च प्रहिणोति तस्मै॥**
**तं ह देवम् आत्मबुद्धिप्रकाशं**
**मुमुक्षुः वै शरणम् अहं प्रपद्ये'' [१८] ॥५०॥**
**''तदेतत् सत्यं मन्त्रेषु कर्माणि कवयो यानि अपश्यन्॥**
**तानि त्रेतायां बहुधा तानि-तानि आचरथ॥५१॥**

---

१५.श्वेता.उप.१।१० - १२
१६.तैत्ति.उप.२।६
१७.बृह.उप.२।५।१८
१८.श्वेता.उप.६।१८

नियत: सत्यकामा एष व: पन्था सुकृतस्य लोके ''[१९]॥
अंशिन्यंशस्थितिस्तत्र निजांशानां द्विधा मता[च]॥५२॥
ज्ञानाज्ञानप्रभेदाभ्यां मोक्षबन्धकरी इमे॥
इहामुत्रान्यदा जाग्रन्नपि सुप्ताविशेषवत्॥५३॥

तदुक्तं :

**''अन्यत्र धर्माद् अन्यत्राधर्माद् अन्यत्रास्मात् कृताकृतात्॥**
**अन्यत्र भूताच्च भव्याच्च यत् तत् पश्यसि तद् वद॥**
**सर्वे वेदा यत्पदम् आमनन्ति**
**तपांसि सर्वाणि च यद् वदन्ति॥**
**यद् इच्छन्तो ब्रह्मचर्यं चरन्ति**
**तत् ते पदं संग्रहेण प्रवक्ष्ये॥**
**एतद्धि एव अक्षरं ब्रह्म एतद्धि एव अक्षरं परम्॥**
**एतद्धि एव अक्षरं ज्ञात्वा यो यद् इच्छति तस्य तत्॥**
**एतद् आलम्बनं श्रेष्ठम् एतद् आलम्बनं परम्॥**
**एतद् आलम्बनं ज्ञात्वा ब्रह्मलोके महीयते''[२०]॥५४॥**

**''अनाद्यनन्तं कलिलस्य मध्ये**
**विश्वस्य स्रष्टारम् अनेकरूपम्॥**
**विश्वस्यैकं परिवेष्टितारं**
**ज्ञात्वा देवं मुच्यते सर्वपाशै: ''[२१]॥५५॥**
उत्पत्तौ पालने चैवं विश्वसंहरणे तथा[छ]॥
न तस्य ईशो हेतुर्वा कैवल्यादेव तस्य हि॥५६॥
**''न तस्य कश्चित् पति: अस्ति लोके**
**नच ईशिता नैव च तस्य लिंगम्॥**

---

१९.मुण्ड.उप.१।२।१
२०.कठो.उप.१।२।१४ - १७
२१.श्वेता.उप.५।१३



**स कारणं कारणाधिपाधिपो**
**नच अस्य कश्चिद् जनिता नच अधिप: ''[२२]॥५७॥**
भयाभावैकहेतुं तं नर्ते तं चाभयं क्वचित्[ज]॥

**''तमेव विदित्वा अतिमृत्युम् एति नान्य: पन्था विद्यते अयनाय...**
**यदा चर्मवदाकाशं वेष्टयिष्यन्ति मानवा: तदा देवम्**
**अविज्ञाय दु:खस्य अन्तो भविष्यति ''[२३]॥५८॥**

श्रुतिगीतोपसंहारे ब्रह्मवादनिरूपणम्॥
संक्षिप्योक्तं तदारम्भेऽप्यवधार्यं बुभुत्सुभि:॥५९॥
गायन्त्येतादृशं ब्रह्मवादं हि श्रुतय: स्तवै:॥
श्रावयन्त्यस्तमात्मानं श्राव्यलीलोद्भवाय हि॥६०॥
इदमाशंक्यते चेह वेदो हि द्विविधो मत:॥
कर्मब्रह्मात्मविषय: तत्राद्ये मन्त्रब्राह्मणे॥६१॥
कर्मप्रतिपादनपरे वेदान्ते ब्रह्मबोधनम्॥
प्रतिपादनन्तु कस्यापि न सदा स्तवनात्मकम्॥६२॥
शौनकोक्तप्रकारेषु मन्त्राणां बहुभेदत:॥॥
न सर्वासां श्रुतीनां वै ब्रह्मस्तुत्यर्थसम्भव:॥६३॥
**''स्तुति: प्रशंसा निन्दा च संशय: परिदेवना॥**
**स्पृहाशी: कत्थना याच्ञा प्रश्न: प्रैष: प्रवल्हिका॥६४॥**
**नियोगश्चानुयोगश्च श्लाघा विलपितं च यत्॥**
**आचिख्यासाथ संलाप: पवित्राख्यानमेव च॥६५॥**
**आहनस्या नमस्कार: प्रतिराधस्तथैव च॥**
**संकल्पश्च प्रलापश्च प्रतिवाक्यं तथैव च॥६६॥**
**प्रतिषेधोपदेशौ च प्रमादापह्नवौ च ह॥**

---

२२.श्वेता.उप.६।९
२३.श्वेता.उप.६।१५ - २०

**उपप्रैषश्च यः प्रोक्तः संज्वरो यश्च विस्मयः ।।६७।।**
**आक्रोशोऽभिष्टवश्चैव क्षेपः शापस्तथैव च ।।**
**उपसर्गो निपातश्च नाम चाख्यातमित्यपि ।।६८।।**
**भूतं भव्यं भविष्यं च पुमान् स्त्री च नपुंसकम् ।।**
**एवं प्रकृतयो मन्त्राः सर्ववेदेषु सर्वशः ''** [24] ।।६९।।
मन्त्रप्रभेदानविलक्ष्य हन्त
सर्वश्रुतीनां स्तुतिरूपताकथा ।।
मन्तुं न योग्या श्रुतिविद्भिरत्र
गौण्योपपत्तौतु प्रमाणहानिः ।।७०।।
प्रत्यक्षदृष्टात्तु विरुद्धवाक्ये
गौणश्च शब्दोऽपि भवेन्नु कल्प्यः ।।
श्रुत्येकगम्येतु तथार्थकल्पने
प्रामाण्यसंन्यास वरः श्रुतीनाम् ।।७१।।

तदेतदाक्षेपसमाधानं :
**''ब्रह्म अयं वाचः परमे व्योम ''** [25]
**''सर्वे वेदाः यत्पदम् आमनन्ति''** [26]
**''सर्वे वेदाः यत्र एकं भवन्ति ''** [27]
इत्येवमादिवचनैः मानमेयस्वरूपयोः ।।
वेदब्रह्मणोरैक्याद् मूलतो न भिदा मता ।।७२।।
लीलयैच्छिकभेदस्तु यः सृष्टौ समजायत ।।
ततोहि द्विविधं रूपमुभयोर्वेद्यं यथायथम् ।।७३।।
वेदस्तुतिः सृष्टिपूर्वरूपब्रह्मस्तुतिः मता ।।

---

२४.बृह.देव.१।३५-४०
२५.ऋ.सं.१।२२।१६४।३५
२६.कठोप.२।१५
२७.तैत्ति.आर.३।११।१



**''सर्वाणि रूपाणि विभज्य धीरो**
**नामानि कृत्वा अभिवदन् यद् आस्ते ''** [28] ।।७४।।
सृष्ट्यूर्ध्वं तत्र मन्त्राणां बाहुविध्यं न दोषभाग् ।।
अन्यथातु **''यतो वाचो निवर्तन्ते ''** [29] इति श्रुतेः।।७५।।
**''तन्त्वौपनिषदं पुरुषं ''** [30] श्रुत्या हि विरुद्धता ।।
एकस्मादेव बीजात्तु पर्णपुष्पाद्यनन्ता ।।७६।।
अव्यक्ता वै नचेत्तस्मिन् व्यक्तीभावः कुतस्ततः ।।
रूपनामकर्मणां चानन्त्यं लीलाप्रदर्शितम् ।।७७।।
स्वरूपेऽव्यक्तसद्भावो न कुतस्तत्र शक्यते ।।
किञ्चेह शौनकोक्तं हि सावधानधिया श्रुणु ।।७८।।
येन संशयसंच्छेदः कुतः शक्यो न सर्वथा ? ।।
**''स्तुवन्तं 'वेद सर्वोऽयम् अर्थयत्येष माम्'इति ।।७९।।**
**स्तौतीत्यर्थं ब्रुवन्तं च सार्थं 'माम् एष पश्यति' ।।**
**स्तुवद्भिर्वा ब्रुवद्भिर्वा ऋषिभिः तत्त्वदर्शिभिः ।।८०।।**
**भवत्युभयमेवोक्तम् उभयं ह्यर्थतः समम् ''** [31] ।।
**''वेदा यथा मूर्तिधरा-स्त्रिपृष्ठ ''** [32] इति न्यायतः ।।८१।।
शब्दरूपश्रुतीनां चाधिदैविकविग्रहः ।।
अंगीकर्तव्यएवेति स्तुतौ नैव विरुद्धता ।।८२।।
अतएवोक्तमाचार्यैः सुबोधिन्यां विचक्षणैः ।।
**''काव्यवद् रूपकोक्तौ हि स्पष्टोऽप्यर्थो भवेद् यदि ।।८३।।**

---

२८.तैत्ति.आर.३।१२।७
२९.तैत्ति.उप.२।४
३०.बृह.उप.३।९।२६
३१.बृह.देव.१।९-१०
३२.भाग.पुरा.१।१९।२३

**कथनं नोचितञ्चैवं श्रीमद्भागवते पुन: ''[३३]॥**

प्रामाण्यं महदेतद्धि सर्वसन्देहवारकम्॥८४॥
इयं सृष्टि: श्रुतौ चापि वागुपन्यासपूर्विका॥
वर्णिता तत्र वाक्कृत्यं स्पष्टं नोपलभामहे॥८५॥
वेदसन्देह गीतातो गीतासन्देह सूत्रत:॥
ब्रह्मसूत्रगत: सोऽपि वार्यो भागवतेन हि॥८६॥

तथाहि :

**''प्रजापति: अकामयत प्रजायेय इति... तस्य चित्ति: स्रुग् आसीत् चित्तम् आज्यम्. तस्य एतावत्येव वाग् आसीत्... सो अताम्यत् स 'भू:' इति व्याहरत् स भूमिम् असृजत्... स 'भुव:' इति व्याहरत् सो अन्तरिक्षम् असृजत्... स 'सुव:' इति व्याहरत् स दिवम् असृजत् ''[३४], ''अन्नाद् भवन्ति भूतानि पर्जन्याद् अन्नसम्भवो यज्ञाद् भवति पर्जन्यो यज्ञ: कर्मसमुद्भव: कर्म ब्रह्मोद्भवं ब्रह्म अक्षरसमुद्भवं तस्मात् सर्वगतं ब्रह्म नित्यं यज्ञे प्रतिष्ठितम् ''[३५] ''शब्दइति चेद् न अत: प्रभवात् प्रत्यक्षानुमानाभ्यां** (अणुभा. अत: शब्दात् प्रभवात् शब्दोक्तपदार्थानाम्. वेदोक्ता: सर्वएव पदार्था आधिदैविकाएव पुरुषावयवभूता:, सर्वानुकारित्वाद् भगवत:) ''[३६], **''यो अविद्यया अनुपहतोऽपि दशार्धवृत्त्या निद्राम् उवाह जठरीकृतलोकयात्रो अन्तर्जले अहिकशिपुस्पर्शानुकूलां भीमोर्मिमालिनि जनस्य सुखं विवृण्वन्, यन्नाभिपद्मभवनाद् अहम् आसम् ईड्य!**

३३.सुबो.१।१।३
३४.तैत्ति.ब्रा.२।२।४।१-३
३५.भग.गीता ३।१४-१५
३६.अणुभा.१।३।२८



**लोकत्रयोपकरणो यदनुग्रहेण तस्मै नमस्ते उदरस्थभवाय योगनिद्रावसानविकसन्-नलिनेक्षणाय ''[३७]**

उत्तरोत्तरमानैस्तु पूर्वपूर्वस्फुटार्थता॥८७॥
सुशक्या ह्यवगन्तुं या तथास्यास्तु स्तुतेरपि॥
आतश्चाध्यात्मिकास्वेवं नामरूपस्वभावत:॥८८॥
सर्वासु स्तुतिरूपत्वं यत्तच्छंक्यं न कर्हिचित्॥
श्रुतीनामाधिदैवीभि: सर्वाभि: कारिता स्तुति:॥८९॥
शंकिता गुणवृत्तीनां निर्गुणे ब्रह्मणि तु या॥
तत्सागुण्यन्तु दैवीषु नामरूपासु वा भवेत्?॥९०॥
इत्येतस्या: हि शंकाया: समाधानं विधीयते॥
ब्रह्मणो यत्तु नैर्गुण्यं गुणातीतया मतम्॥९१॥
रजस्सत्त्वतमोरूपगुणानां तत्र चोद्भवात्॥
ब्रह्मात्मकत्वं तेषां हि न ब्रह्म त्रिगुणात्मकम्॥९२॥

तथोक्तं :

**''पुरुषएवेदं सर्व यद् भूतं यच्च भव्यं... एतावान् अस्य महिमा अतो ज्यायांश्च पुरूष: पादो अस्य विश्वा भूतानि त्रिपादस्य अमृतं दिवि त्रिपाद् ऊर्ध्व उदैत् पुरुष: पादो अस्य इह अभवत् पुन: ''[३८]**

अतो हि गीतायामपि भगवान् आह यत् स्फुटम्॥
**''प्रकृतिं विद्धि मे परां ''[३९] ''मयाध्यक्षेण प्रकृति: ''[४०]**॥९३॥

३७.भाग.पुरा.३।९।२०-२१
३८.पुरु.सू.१-२
३९.भग.गीता ७।५
४०.भग.गीता ९।१०

**"प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि"**[४१] ॥
**"कार्यकारणकर्तृत्वे हेतुः प्रकृतिः"**[४२] इत्यपि ॥९४॥
**"ये चैव सात्त्विका भावाः राजसा तामसाश्च ये ॥**
**मत्तएवेति तान् विद्धि नत्वहं तेषु ते मयि"**[४३] ॥९५॥
न गुणानामभावोऽतो ब्रह्मणि शक्यते क्वचित् ॥
गुणेषु ब्रह्मणश्चातः परिच्छेदो निषिध्यते ॥९६॥
शब्दरूपश्रुतीनां हि व्यक्तिः विषयतापिच ॥
गुणेषु गुणवृत्तित्वं लीलया निर्गुणेऽपि च ॥९७॥
अतो नानुपपत्तिर्हि प्रश्ने वा तत्समाहतौ ॥
श्रुतिगीतासमाख्याता उपपन्नमतोऽखिलम् ॥९८॥
श्रुतीनां तं स्तुवन्तीनां दैवीनां नामशब्दतः ॥
आनुरूप्यं निरूप्यं हि तत्तद्योजनया पुनः ॥९९॥
तत्तत्कारिकायां तत्कृपालब्धैकबुद्धिना ॥
उपक्रमोपसंहारविमर्शादिकवाक्यता ॥१००॥
निरूपिता श्रुतिस्तुत्याः सूक्ष्मटीकाविचिन्तने ॥
क्षमन्तु श्रीमदाचार्याः अन्यथाचिन्तितं मम ॥१०१॥

इति गोस्वामिश्रीदीक्षितात्मजेन श्याममनोहरेण कृतः
श्रुतिगीतासूक्ष्मटीका कारिकाविवक्षितश्रुतियोजनोपेता
सम्पूर्णः

---

४१. भग. गीता १३।१९
४२. भग. गीता १३।२०
४३. भग. गीता ७।१२

॥ श्रीकृष्णाय नमः॥

॥ श्रीमदाचार्यचरणकमलेभ्यो नमः॥

## "कथा इमास्ते" कारिकोपरि विवरणम्

प्रणम्य श्रीमदाचार्यान् प्रभून् स्वीयान् गृहे स्थितान्॥
"**कथा इमास्ते**" श्लोकस्य भक्तौ तात्पर्यमुच्यते॥१॥
सर्गादिमोक्षपर्यन्ताः कथाः भागवते हि याः॥
तदाश्रयार्थाः लीलायां तत्सृष्टानां तदंगता॥२॥
लीलासृष्टमहीयासामपि कथा तादात्म्यविज्ञानतः
स्रष्टुः सृष्टिविरागभावनमुखा तस्मिन्निरोधात्मिका॥
तद्भक्तावपि साधनत्वमतिना ह्यन्याश्रयाद् दुष्टता
तल्लीलामतिना तु तद्रतिरपि लीलात्मिका जायते॥३॥
आत्मारामः स एकाकी द्वेधात्मापादनेन वै॥
स्वात्मनि स्वात्मनात्मानं सृष्ट्वा वै रमते परः॥४॥
"**पुरश्चक्रे द्विपदः पुरश्चक्रे चतुष्पदः पुरः॥
स पक्षी भूत्वा पुरः पुरुष आविशद्**"[1]॥५॥
"**तिर्यङ्मनुष्यविबुधादिषु जीवयोनि-
ष्वात्मेच्छयात्मकृतसेतुपरीप्सया यः॥
रेमे निरस्तरतिरप्यवरुद्धदेहस्
तस्मै नमो भगवते पुरुषोत्तमाय**"[2]॥६॥
तस्यात्मरतिरेवास्ति स्वसृष्टिरमणात्मिका॥
जीवेष्वपि ये तदंशाः श्रीकृष्णे विनियोजिताः॥७॥
कृष्णलीलानुकूल्येन स्युस्तल्लीलात्मकाअपि॥
तत्सृष्टरूपनाम्नोर्वा कर्मणि वा तु योजने॥८॥

१.बृह.उप.२।५।१८
२.भाग.पुरा.३।१९।२३



अहन्ताममताबन्धाद् आलयं ह्यविमुक्तता॥
अतो भक्तेर्हि द्वैविध्यं मुख्या गौणीति भेदतः॥९॥
जीवस्वभावतो जाता गौणी भक्तिरिहोच्यते॥
बीजस्वभावतो जाता मुख्या भक्तिर्ध्रुवा मता॥१०॥
जीवस्वभावदोषात्तु दोषोऽन्याश्रयएव हि॥
"**जीवाः स्वभावतो दुष्टाः**"[3] वचनाद् दोषरूपता॥११॥
बीजं तस्यानुग्रहो यः स्वलीलानुभवाय वै॥
स्वरूपयोग्यतादानं तत्स्वभावात्तु चोत्तमा॥१२॥
तल्लीलानुभवाद् भक्तौ स्वाहंकारविसर्जनम्॥
साधनत्वमतेर्लोपः सम्भवत्यन्यथान्यथा॥१३॥
प्रपञ्चस्मृतिसाहित्ये तदासक्तेरशुद्धता॥
लीलेदृशी वै दशमे स्कन्धे कृष्णस्य वर्णिता॥१४॥
इमे विज्ञानवैराग्ये विवक्षातोऽत्र वर्णिते॥
लीले निरोधाश्रययोः एके च द्विविधे ह्यपि॥१५॥
माहात्म्यज्ञानिनस्तस्मिन् रतिभक्तिर्मता यथा॥
शुद्धिस्तस्याश्चेतरेषां विस्मृत्या तु विशिष्यते॥१६॥
सर्वलीलाश्रयः कृष्णः क्रीडत्युभयथा स्वयं॥
प्रपञ्चे कर्हिचित् स्वस्मिन् कदाचिदिति भेदतः॥१७॥
प्रपञ्चे क्रीडनं तस्य प्रपञ्चासक्तिवारकम्॥
'निरोध' पदवाच्यं तत् स्वस्मिंस्त्वाश्रयभावतः॥१८॥
क्रीडनं चात्मरमणं स्वात्मन्येवात्मनः पुनः॥
रूपाणां कर्मणां नाम्नां सच्चिदानंदरूपता॥१९॥
तत्रानन्दतिरोधानात् चिति पुरुषरूपता॥
चिदंशस्य तिरोधानाद् जड़प्रकृतिरूपता॥२०॥
तिरोहितो यश्चानन्दस्तदंशः ईश्वरोऽभवत्॥

३.बा.बो.१६

जड़जीवेशरूपेण तस्यान्तर्यामिता मता ॥२१॥
सृष्टिरेवं स्वरूपा हि एकस्यानेकभावता ॥
पुनश्च सच्चिदानन्दरूपताश्रयतोच्यते ॥२२॥
तिरोहिता ब्रह्मता या रूपे नाम्नि च कर्मणि ॥
आविर्भावात् पुनस्तस्याः सिद्ध्येद् आश्रयरूपता ॥२३॥
प्रपञ्चे लीलया तस्य भक्तादिषु हि द्रष्टृषु ॥
प्रत्यापत्तिर्निरोधात्मा दृश्यद्रष्ट्रोः विजायते ॥२४॥
दोषदर्शनजन्यं यद् वैराग्यं तद् इतरं मतम् ॥
भक्तेः लीलात्मिकायास्तु ज्ञानांगं तद् उदीरितम् ॥२५॥
दृढानुरागतः कृष्णे मूलरूपे तु भक्तितः ॥
विज्ञानरूपभक्त्यंगं वैराग्यञ्चोपजायते ॥२६॥
गीतायाः नवमेऽध्याये राजविद्यातया पुनः ॥
भक्तिरेव हि 'विज्ञान'-पदवाच्या निरूपिता ॥२७॥
तत्र ज्ञानं च विज्ञानसहितं यत्तु वर्णितम् ॥
ज्ञानं माहात्म्यज्ञानं तद् विज्ञानं भक्तिरेव तत् ॥२८॥
**''समोऽहं सर्वभूतेषु न मे द्वेष्योऽस्ति न प्रियः ॥**
**ये भजन्तितु मां भक्त्या मयि ते तेषु चाप्यहम्''** [४] ॥२९॥
समत्वन्तु समैः साकं नूनं माहात्म्यमेव तत् ॥
समस्यापि हि वैषम्यं स्वलीलाभक्तिहेतुकम् ॥३०॥
एवं माहात्म्यज्ञानाच्च विज्ञानन्तु विशिष्यते ॥
तत्तादात्म्यानुभावोत्था तद्रतिर्निरुपाधिकी ॥३१॥
नन्वत्रैकादशे प्रोक्तं श्रीमद्भागवतेतु यत् ॥
**''ज्ञानवैराग्यविज्ञानश्रद्धाभक्त्युपबृंहितान्''** [५] ॥३२॥
कारिकाविवृतौ चापि 'विज्ञाना'र्थो यथोदितः ॥

४.भग.गीता ९।२९
५.भाग.पुरा.११।१९।१३



पुरुषोत्तमैर्हि विज्ञानं कार्ये कारणान्वयः ॥३३॥
उक्तस्ताभ्यां विरुद्धोऽर्थो कर्तुं नैवोचितो यतः ॥
इति चेत् तत्समाधानं बुद्ध्या बोद्धव्यमेव हि ॥३४॥
न 'विज्ञान'पदस्यार्थतया भक्तिरिहोच्यते ॥
भक्त्या वै भजनीयस्य भानं विज्ञानमुच्यते ॥३५॥
प्रमाणफलयोरेवमैक्यादेकार्थवाचिता ॥
भक्तिः प्रमाणं विज्ञानं फलं तद् भक्तिहेतुकम् ॥३६॥
**''भक्त्यात्वनन्यया शक्यमहमेवंविधोऽर्जुन''** [६] ॥
**''भक्त्या मामभिजानाति यावान् यश्चास्मि तत्त्वतः''** [७] ॥३७॥
पार्थक्यस्य विवक्षायां पृथगुक्तौ नवा क्षतिः ॥
राजविद्याराजगुह्यतया भक्तेर्निरूपणम् ॥३८॥
विसंगतं भवेद् भक्तेः गीतायामन्यथा पुनः ॥
अतो दोषो न मन्तव्यः कश्चनैवं निरूपणे ॥३९॥
ईदृश्यनन्यभक्तिर्या सानन्याश्रयणात्मिका ॥
अनन्याश्रयएवातो निरोधोऽनन्यभक्तिकृद् ॥४०॥
भजनीये स भक्तानां निरोधः प्रलयात्मकः ॥
आत्यन्तिकतयाख्यातोऽपरः प्राकृतिकोऽपि च ॥४१॥
द्वादशस्कन्धवर्ण्यः श्रीकृष्णात्मरमणात्मकः ॥
**''वचोविभूति''** [८] रित्युक्त्या सोऽप्यन्याश्रयवारकः ॥४२॥
स्वात्मकानां स्वतः स्वस्मिन् स्वभिन्नत्वेन द्योतनात् ॥
यथा ह्यन्याश्रयः शक्यस् तद्विरागे निरुद्धता ॥४३॥
तदेव गीतं गीतायाम् अनन्योपासनं वरम् ॥
अन्यस्मिन् श्रद्धया चान्यभजनं ह्यज्ञानहेतुकम् ॥४४॥

६.भग.गीता ११।५४
७.भग.गीता १८।५५
८.भाग.पुरा.१२।३।१४

अतोऽवस्थाद्वयं भक्तेः फलसाधनभेदतः ॥
विज्ञानसहितं ज्ञानं फलं तदितरत् पुनः ॥४५॥
विज्ञानं ज्ञानरहितं विज्ञानरहितञ्च तत् ॥
इत्थमेकतराभावे आसक्त्याश्रययोरपि ॥४६॥
अनन्यतायाः भंगेन साधनावस्थता मता ॥
ज्ञानविज्ञानयोर्योगे फलावस्था प्रकीर्तिता ॥४७॥
ननु भक्तौ च भेदेन भानं भक्तेशयोस्तु यत् ॥
भक्तिभंगाद् आश्रयोऽपि भग्नएव भवेद् नवा ? ॥४८॥
इति चेत् तन्न युक्तं हि भक्तावाधिक्यबोधनात् ॥
**''यो मां पश्यति सर्वत्र सर्वं च मयि पश्यति ॥४९॥**
**तस्याहं न प्रणश्यामि स च मे न प्रणश्यति ॥**
**सर्वभूतस्थितं यो मां भजत्येकत्वमास्थितः ॥५०॥**
**सर्वथा वर्तमानोऽपि स योगी मयि वर्तते''** [९] ॥
इत्यतः श्रीमदाचार्यैः निबन्धेऽपि निरूपितम् ॥५१॥
**''ब्रह्मानन्दे प्रविष्टानामात्मनैव सुखप्रमा ॥**
**संघातस्य विलीनत्वाद् भक्तानान्तु विशेषतः ॥५२॥**
**सर्वेन्द्रियैस्तथाचान्तःकरणैरात्मनापि हि ॥**
**ब्रह्मभावात्तु भक्तानां गृहएव विशिष्यते''** [१०] ॥५३॥
भक्तौ साधनरूपायामेवं सर्वं तदात्मकं ॥
फलानुषंगिकं द्वैतं तत्क्रीडार्थतया पुनः ॥५४॥
सर्वभावेन सर्वस्य स्वस्य चास्मै समर्पणम् ॥
सर्वस्यैव तदर्थैकमत्या तस्मिन् नियोजनम् ॥५५॥
**''यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् ॥**
**यत् तपस्यसि कौन्तेय तत् कुरुष्व मदर्पणम् ॥५६॥**

९. भग.गीता ६।३०-३१
१०.त.दी.नि.१।५०-५१



**शुभाशुभफलैरेवं मोक्ष्यसे कर्मबन्धनैः ॥**
**संन्यासयोगयुक्तात्मा विमुक्तो मामुपेष्यसि''** [११] ॥५७॥
स्वकर्मफलभोगात्मा लोकोऽयं तत्र वैदिकम् ॥
यज्ञदानतपोरूपमात्मिकं तन्निवेदनात् ॥५८॥
सर्वबन्धविनिर्मोको 'विमुक्त'पद बोधितः ॥
जीवन्मुक्तिसमा भक्तिः 'विमुक्ता'वप्रयोगतः ॥५९॥
प्रपञ्चो भगवत्क्रीडा आसर्गादाच मोक्षतः ॥
निरोधस्तु प्रपञ्चे हि क्रीडा संसारमोचिका ॥६०॥
तेनात्र जीवतां मुक्तिर्भक्तिः सिद्ध्यति सर्वथा ॥
क्रीडाकर्तुः परस्यैह प्रपञ्चे क्रीडनात्मके ॥६१॥
स्वस्वाम्यं कुमतेर् लिंगं तत्स्वाम्यं सुमतेस्तथा ॥
ततः स्वस्य स्वकीयानां परस्मै विनियोजने ॥६२॥
तल्लीलारूपता सृष्टावाविर्भवति सर्वथा ॥
अन्याश्रयेण रहितं ज्ञानं विज्ञानसंगतम् ॥६३॥
सैषा विवक्षिता ह्यत्र कथाकथ्यतया पुनः ॥
सृष्टिस्थितिलया लीला जगतो यद्वदेव हि ॥६४॥
बन्धमोक्षौ च भक्तिश्च स्याल्लीला तद्वदेव हि ॥
एवं भक्तौ हि लीलायाः भानात् सिद्ध्यति मुख्यता ॥६५॥
साविर्भवेन्न यावत्तु तावदन्याश्रयो मतः ॥
लोकवेदाश्रयाभ्यां च स्वाहन्ताममताश्रयात् ॥६६॥
भक्तौ सर्वत्र सर्वेषु लीलातादात्म्यबुद्धिजात् ॥
अन्यतोन्मूलनाच्चैव सर्वभावेन भावनम् ॥६७॥
एकस्य मूलरूपस्य तन्माहात्म्यानुभावतः ॥
लीलार्थं निखिलं नामरूपकर्मभिदात्मकम् ॥६८॥

११.भग.गीता ९।२७-२८

रसात्मकं **''रसो वै स यद् वै तत् सुकृतं''** [१२] मतम् ॥
सृष्टिस्रष्ट्रोस्तु तादात्म्यं साम्यवैषम्यहेतुकम् ॥६९॥
ज्ञातव्यं द्विविधं नूनं प्रक्रियाप्रतिपित्सुभिः ॥
तद्दत्तदृष्ट्या भातं तच्चाद्यं प्रत्यक्षमर्जुने ॥७०॥
'ऐतदात्म्यम् इदं सर्वम्' अनिर्भातं श्रुतीरितम् ॥
भातं भक्तौ रसाभासजनकं प्रायशो मतम् ॥७१॥
श्रुतीरितं तन्माहात्म्यपरोक्षज्ञानगोचरम् ॥
सर्वोपादानभावेन तत्तादात्म्यं हि सर्वगम् ॥७२॥
निरुपाधिकभक्तौ तन्माहात्म्यज्ञानवन्मतम् ॥
येन सर्वसमत्वञ्च ब्रह्मणो ह्यधिगम्यते ॥७३॥
**''स भूमिं विश्वतो वृत्त्वा ह्यत्यतिष्ठद् दशांगुलम्''** [१३] ॥
श्रुतावस्यां सर्वसमः सर्वातीतश्च गद्यते ॥७४॥
सर्वातीतस्तु सर्वेभ्यो विषमः समुदीरितः ॥
तस्यानुभावो वरणेन जीवानां भक्तिदायकः ॥७५॥
भक्तेशयोस्तु वैषम्ये **''मयि ते तेषु चाप्यहं''** [१४] ॥
भेदाभेदाद्यतीतं हि तादात्म्यं नटनाट्ययोः ॥७६॥
रसानुभूतिजनकं ब्रह्मतल्लीलयोस्तथा ॥
श्रीमुखोक्तन्तु तादात्म्यं कृपाभक्त्येकगोचरम् ॥७७॥
रसात्मकं मतं तत्तु नटे नाट्यनरौ यथा ॥
तादात्म्यमेतयोः स्पष्टं साम्यवैषम्यमूलकम् ॥७८॥
एवं भक्तसमत्वेऽपि भक्तान्तस्थः कृपावशः ॥
भावपुष्ट्या बहिर्भातो भक्त्यालम्बनरूपधृक् ॥७९॥
लोकेऽभेदोपचारोऽत्र वर्ण्यते विबुधैः परम् ॥

---

१२.तैत्ति.उप.२।७
१३.ऋक्.संहि.१०।९०।२
१४.भग.गीता ९।२९



एकस्मिन्नद्वितीयेतु भेदो लीलाभिकांक्षितः ॥८०॥
भक्तौ हि भगवल्लीलामत्यैवं मुख्यता मता ॥
भक्त्युत्तरापि या मुक्तिः नैवाभक्तिस्वरूपिणी ॥८१॥
याभिः सर्गादिलीलाभिः स्वात्मानमावृणोत्ययम् ॥
ताभिरेवानुग्रहेण स्वात्मानं द्योतयत्यपि ॥८२॥
**''स सर्वधीवृत्त्यनुभूतसर्वः''** [१५] **''स सर्वनामा स च विश्वरूपः''** [१६] ॥
स मानमेयोभयरूपतां भजन् स्वेन स्वमात्मानमनावृणोति ॥८३॥
**''सहैव सन्तं न विजानन्ति देवाः इन्द्रस्यात्मानं शतधा चरन्तम्''** [१७] ॥
**''इन्द्रो मायाभिः पुरुरूप ईयते युक्ताः ह्यस्य हरयः शता दश''** [१८] ॥८४॥
**''नाहं प्रकाशः सर्वस्य योगमायासमावृतः''** [१९] ॥
**''मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते''** [२०] ॥८५॥
इत्यादिवचनान्येव हृदिकृत्य महाप्रभुः ॥
**''रूपप्रपञ्चवैचित्र्यं जीवास्त्वल्पधियः पुनः** ॥८६॥
**द्रष्ट्वा भ्रान्ताः भवन्त्येवमंशत्वाद्''** [२१] अब्रवीत् तथा ॥
**''आविर्भावतिरोभावैर्मोहनं बहुरूपतः''** [२२] ॥८७॥
जातोऽनुग्रहभाक्सु भावितवपुः स्वस्मिन्निरोधप्रदः
भिन्नत्वेन विभावितोऽपि सकले स्वाभेदविज्ञापकः ॥
लीलानां दशकैः सदा विहरणे स्वानन्दपूर्णः परः

---

१५.भाग.पुरा.२।१।३९
१६.भाग.पुरा.६।४।२८
१७.तैत्ति.आर.३।११।५
१८.बृह.उप.२।५।१९
१९.भग.गीता ७।२५
२०.भग.गीता ७।१४
२१.त.दी.नि.प्रका.२।१८
२२.त.दी.नि.१।७२

सोऽयं क्रीडति स्वाश्रयाश्रयरिह स्वस्मिंश्च स्वस्माद् बहि: ॥८८॥
श्रुत्युक्तं सृष्टिजननं प्रमेयत्वपरिग्रह: ॥
स्थिति: प्रमाणकल्पातु स्वप्रकाशस्य वस्तुन: ॥८९॥
प्रयाणं तत्र सृष्टानां नामरूपविलापकम् ॥
यथा श्रुतौ पुराणेऽपि तत्त्रिधाकरणेन हि ॥९०॥
लीलासु नवधोक्तासु सर्गाद्यासु प्रमेयता ॥
पोषणाद्यासु लीलासु प्रमाणत्वञ्च तस्य हि ॥९१॥
प्रयाणं यच्छ्रुतं तत्र तदीशानुकथादिषु ॥
एवं हि नवलीलाभिर्लक्ष्योऽलक्ष्य: सएव हि ॥९२॥
लक्षणैस्तस्य विज्ञानं लक्ष्याश्रयविशोधनम् ॥
लक्षणैस्तस्य चाज्ञानमन्यस्याश्रयणाय हि ॥९३॥
स्वात्मकेषु स्वसृष्टेषु रूपवत्सु जडेष्वपि ॥
नामवत्सु च जीवेषु कर्मसु बन्धकृत्सु च ॥९४॥
रसानन्दतिरोधानाद् बन्धमोहौ हि दु:खिषु ॥
आतश्चाश्रयद्वैविध्यं शास्त्रमृग्यप्रपन्नता ॥९५॥
सायुज्यमथवा तस्मिन् क्रियया पञ्चधा तु तत् ॥
ज्ञानेन चाष्टधा भेदो निजाचार्योपदेशत: ॥९६॥
पञ्चधाश्रयशुद्धिर्हि स्याद् विज्ञानविरागत: ॥
कृष्णाश्रयस्तत्र चाद्यो द्वितीयो जगदाश्रय: ॥९७॥
वेदाश्रयस्तृतीय: स्याद् भक्तिमार्गाश्रयस्तत: ॥
नामात्मकं तत्स्वरूपं श्रीमद्भागवतं मतम् ॥९८॥
तस्याश्रय: पञ्चमोऽत्र तत्राप्येतदिहोच्यते ॥
लोकवेदाश्रयस्यास्मिन् कलिकाले ह्यशक्यता ॥९९॥
कालस्वभावदोषात्तु भक्तेर्दुस्साध्यता मता ॥
शिष्टौ प्रपत्त्यै कृष्णस्य रूपनाम्नो: समाश्रयौ ॥१००॥
श्रीकृष्णरूपे विज्ञेया प्रमेयबलमुख्यता ॥



तथा भागवते शास्त्रे प्रमाणबलमुख्यता ॥१०१॥
कथासारो हि नि:सारो न कृतश्चेद् कथापरै: ॥
तदुक्तं तत्कथाया हि माहात्म्ये कण्ठत: स्वयम् ॥१०२॥
**''विप्रैर्भागवती वार्ता गेहे - गेहे जने - जने ॥**
**कारिता कणलोभेन कथासारस्ततो गत: ''**[२३] ॥१०३॥
भक्तेर्जरठताप्युक्ता ज्ञानवैराग्ययौवने ॥
भक्तेश्च यौवने चैवं ज्ञानवैराग्यवृद्धता ॥१०४॥
विषयानुपलम्भाच्च पुत्रयो: क्षीणतोदिता ॥
एवं भक्त्यनिरोधे स्यात्पाशस्तूभयतो यत: ॥१०५॥
तन्निराकरणं भागवत्या भक्त्यैव नान्यथा ॥
अतो भागवतं नूनं सर्वथा हितकारकम् ॥१०६॥

अतो

श्रीमद्भागवताश्रयाद् यदि भवेद् भक्ति: परस्मिंस्तदा
तत्तारुण्यचमत्कृतिस्तु भविता साकन्तु तत्पुत्रयो: ॥१०७॥
श्रीकृष्णस्य कथात्र या दशविधा भक्तेर्विवक्षावशाद्
प्रोक्ता त्रिष्वपि यौवनोद्भवकरी श्रेयस्करी सर्वथा ॥१०८॥
लाभपूजार्थयत्नेषु विनियोगविवर्जिता ॥
चेत् कृष्णाश्रयस्तोत्रस्य जलभेदेन संगति: ॥१०९॥
**''ब्रह्मरूपं जगज्ज्ञेयं ब्रह्मातो व्यतिरिच्यते ॥**
**आसक्तिस्तु तत: कार्या कृष्णे सर्वात्मके सदा ''**[२४] **॥११०॥**
अतोऽखिलात्मनि तस्मिन् भक्तिरप्यखिला खलु ॥
श्रीमद्भागवताज्जाता सैवेहास्ति विवक्षिता ॥११३॥
नन्वन्यथेहोपक्रमात् तात्पर्यं वर्ण्यते कुत: ? ॥
उपक्रमोपसंहारविरोधान्नैकवाक्यता ॥११२॥

---

२३.श्रीभाग.माहा.१।७१
२४.सुबो.२।९।३५

इति चेद् न

**"भक्तिः परेशानुभवो विरक्तिरन्यत्र चैष त्रिक एककालः॥**
**प्रपद्यमानस्य यथाश्नतस्स्युः पुष्टिस्तुष्टिक्षुदपायोऽनुघासम्"**[२५] **॥११३॥**
उक्तत्वेनाप्यभ्युपेतः आचार्यचरणैरपि॥
भक्तिस्वरूपफलयोः सिद्ध्यै भगवदाश्रयः[२६]॥११४॥
श्रीकृष्णैकज्ञानभक्तिकर्मणां सर्वगुह्यता॥
सुदुर्लभातो तानेतान् त्यक्त्वा तस्याश्रयः शुभः॥११५॥
**"सर्वगुह्यतमं भूयः शृणु मे परमं वचः... ॥**
**मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु...**॥११६॥
**सर्वधर्मान् परित्यज्य माम् एकं शरणं व्रज॥**
**अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुच"**[२७]॥११७॥
स्वप्राप्तिसाधनांगत्वेनाश्रयस्य प्रकीर्तिते॥
विकल्पतानुकल्पतेऽत्र प्रमुखे मौखिके खलु॥११८॥
भक्तेरतोऽपि तल्लीलारूपतासिद्धये पुनः॥
आश्रयेणोपसंहारः सर्वथा हि समञ्जसः॥११९॥
"**कथा इमास्ते**"श्लोकस्य व्याख्या स्वमतिशुद्धये॥
रचिताचार्यचरणानां कृपयैव न संशयः॥१२०॥
द्यौत्यं यत्किमपीह तत्तदखिलं विद्योतितं प्राक्तनैः
श्रीमद्वल्लभवाग्विचिन्तनपरैः व्याख्यातृभिः सर्वथा॥१२१॥
वृन्दाकाननवेणुवादकमुखाद् विद्योतिते वर्त्मनि
राकायामहमात्मभासनपरः खद्योतवद् द्योतकः॥१२२॥
यद्यत्र श्रीमदाचार्याभिप्रायाद् अन्यथोदितम्॥
चेत् ते क्षमन्तु वै स्वीयबालबुद्धिविचेष्टितम्॥१२३॥

---

२५.भाग.पुरा.११।२।४२
२६.द्रष्ट.वि.धै.आ.१०-१३-१७
२७.भग.गीता १८।६४-६६



वैक्रमे वत्सरे सप्तत्युत्तरे द्विसहस्रके॥
त्रयोदश्यां हि शुक्लायां फाल्गुने रचितं मया॥१२४॥

इति गोस्वामिश्रीदीक्षितात्मजेन श्याममनोहरेण विरचितं
"**कथा इमास्ते**"कारिकाविवरणं
सम्पूर्णम्

॥ श्रीकृष्णाय नमः ॥

॥ श्रीमदाचार्यचरणकमलेभ्यो नमः ॥

# ॥ भक्तिसर्गभक्तिमार्गाविरोधनिरूपणम् ॥

## ( मंगलाचरणेनोपक्रमः )

नमामि श्रीमदाचार्यं सर्गमार्गविबोधकम् ॥
मिथस्तयोः वैपरीत्यद्योतकं सर्वदा मुदा ॥१॥

## ( विषयोपन्यासः )

तथाप्यात्मरतेस्तस्य सृष्टिः विस्ताररूपिणी ॥
तद्रत्यंशरूपभक्तिः सर्गमार्गसमैव हि ॥२॥
**"त्वद्भक्तानाम् आत्मवतां सर्वेषाम् ॥**
**आत्मनि आत्मदः आत्मतयैव"[१] ॥**
अतएवोक्तमाचार्यैः फलसर्गनिरूपणे ॥
**"मूलेच्छातः फलं लोके वेदोक्तं वैदिकेऽपि च ॥३॥**
**कायेन तु फलं पुष्टौ... फलं त्वत्र निरूप्यते ॥**
**भगवानेव हि फलं स यथाविर्भवेद् भुवि ॥४॥**
**गुण-स्वरूपभेदेन तथा तेषां फलं भवेद्"[२] ॥**
**"ज्ञानिनामपि वाक्येन न भक्तं मोहयिष्यति ॥५॥**
**आत्मप्रदः प्रियश्चापि किमर्थं मोहयिष्यति"[३] ॥**
**"ब्रह्मानन्दे प्रविष्टानाम् आत्मनैव सुखप्रमा ॥६॥**
**संघातस्य विलिनत्वाद् भक्तानां तु विशेषतः ॥**
**सर्वेन्द्रियैस्तथा चान्तःकरणैरात्मनापि हि ॥७॥**

---

१.भाग.पुरा.५।२४।२१
२.पु.प्र.म.१०-१७
३.स.नि.२०



**ब्रह्मभावात्तु भक्तानां गृहएव विशिष्यते"[४] ॥**

## ( सर्गमार्गवैपरीत्यप्रतिपादनम् )

तथापि तृतीयस्कन्धसुबोधिन्यां निरूपितम् ॥८॥
**"कर्मादिमार्गाः वेदोक्ताः फलतस्ते यदि स्थिराः ॥**
**सर्गोऽत्र नैव जायेत ततस्तन्नाश उच्यते ॥९॥**
**कामेन कर्मनाशः स्यात् क्रोधेन ज्ञाननाशनम् ॥**
**लोभेनापि च भक्तिर्हि धर्मिज्ञानीश्वरैः कृता"[५] ॥१०॥**
एतद् भागवतीये वै सर्गे तूपपादितम् ॥

## ( तदपवादेनावैपरीत्यमपि )

तैत्तिरीयोक्तसर्गेण संवादोऽस्यात्र वर्ण्यते ॥११॥
मार्गात्मा भक्तिसर्गोऽतो यथा भागवतोदितः ॥
**"नारायणपराः सर्वे न कुतश्चन बिभ्यति ॥१२॥**
**स्वर्गापवर्गनरकेष्वपि तुल्यार्थदर्शिनः ॥**
**देहिनां देहसंयोगाद् द्वन्द्वान् ईश्वरलीलया ॥१३॥**
**सुखं दुःखं भृतिर्जन्म शापोऽनुग्रहएव च ॥**
**अविवेककृतो पुंसो ह्यर्थभेदइवात्मनि ॥१४॥**
**गुणदोषविकल्पश्च भिदेव स्रजिवत्कृतः ॥**
**वासुदेवे भगवति भक्तिमुद्वहतां नृणाम् ॥१५॥**
**ज्ञानवैराग्यवीर्याणां नेह कश्चिद् व्यपाश्रयः"[६] ॥**
इति भक्तेर्हि प्राधान्यात् शेषयोरुपलक्षणम् ॥१६॥
भक्तावन्तर्भूतयोर्हि स्वातन्त्र्यमनुकल्पतः ॥

---

४.त.दी.नि.१।५१
५.सुबो.३।१।१
६.भाग.पुरा.६।१७।२८-३१

**( उत्सर्गतः यादृकसर्गमार्गवैपरीत्यं तदुपपादनम् )**

तयोः सर्गविरोधित्वं तदिदं बोधितं यथा॥१७॥
अतो भक्तिर्द्विधा निष्ठाभेदाज्ज्ञेयात्र चादिमा॥
धर्मनिष्ठावती ह्येका धर्मिनिष्ठावती परा॥१८॥
आद्या तु विपरीतैव सर्गतः सैव चोदिता॥

**( तत्र वेदोक्तभक्तिसर्गमार्गयोरपवादत्वम् )**

द्वितीयाऽविपरीता च सर्गमार्गोभयात्मिका॥१९॥
भक्तेरंशत्रयं ज्ञेयं रति-ज्ञान-क्रियात्मकम्॥
रतिस्त्वानन्दतो ज्ञानक्रिये तु सच्चिदंशतः॥२०॥

**( तत्प्रक्रिया )**

एतदानन्दविज्ञानाद् रतिर्भीतिविवर्जिता॥
**''आनन्दं ब्रह्मणो विद्वान न बिभेती''**[७] ति वाक्यतः॥२१॥
न भीतिसहिता तावद् रतिः भक्तौ फलिष्यति॥
विज्ञानं श्रद्धयैतस्मिन् ऋतसत्यप्रबोधतः॥२२॥
योगेन चित्तसंरोधे तन्माहात्म्यं हि ज्ञायते॥
माहात्म्यबोधे ज्ञानं वै विज्ञानायोपकल्पते॥२३॥
तेनैवानन्दसंदोहो जीवेनात्रानुभूयते॥
सर्वकारणभूतस्य सर्वाधारस्य चापि वै॥२४॥
स्वात्मानन्दरतिक्रीडा परस्य ब्रह्मणो जगत्॥
रतिरंशस्यांशिनि या भक्तिरत्रोच्यते शुभा॥२५॥
माहात्म्यज्ञानपूर्वस्तु सुदृढः सर्वतोऽधिकः॥
स्नेहस्तु भक्तिरूपो वै प्रादुर्भवति सर्वथा॥२६॥

७.तैत्ति.उप.२।४



**( तत्र श्रुतौ पञ्चकोशात्मसर्गनिरूपणम् )**

प्रादुर्भावप्रक्रियास्याः तैत्तिरीये निरूपिता॥
तत्र भूतक्रियाशुद्धिरिष्टान्नप्राणयोः सदा॥२७॥
मनसोऽत्रोपयोगः तत्संकल्पपविकल्पयोः॥
ऋग्यजुसामाथर्वाणां धर्मदिशानुसारिणाम्॥२८॥
स्वधर्माचरणाद् ज्ञाने विज्ञानमुपजायते॥
अन्यथातु रतिर्लोभात् क्रोधाज्ज्ञानं तथा पुनः॥२९॥
कामाच्चैव क्रियायास्तु नाशात् भूतो विनश्यति॥
तस्मै प्रपत्त्यर्पणाभ्यां क्रियाभ्यां बोध इष्यते॥३०॥
बोधाद् विज्ञानरूपाद्धि चानन्दो बुध्यते पुनः॥
तेनैव निर्भयत्वं वै रतौ सम्पद्यते यतः॥३१॥
एवमंशत्रयोपेता प्रियमोदप्रमोदतः॥
आनन्दात्मस्वरूपाहि भक्तिर्भवति वै दृढा॥३२॥
ब्रह्मवल्ल्युक्तिसिद्धेयं रति'र्भक्ति'पदाभिधा॥
अतोहि पंचकोशेषु इहचान्नमयादिषु॥३३॥
अन्न-प्राण-मनो-ज्ञाने ब्रह्मबुर्द्धेर्हि देशना॥
अन्यथा कामक्रोधाभ्यां लोभेनाब्रह्मतैव हि॥३४॥
सर्वत्र ब्रह्मतादात्म्यस्फूर्त्या निर्दोषता समा॥

**( तस्य पुष्टिभक्तौ निगमनम् )**

प्रपत्त्याहंम्मतेः शुद्धि ममतायाः समर्पणात्॥३५॥
प्रेम्णा भगवद्रूपसेवा क्रियते निष्ठया सदा॥
श्रीमदाचार्यचरणैः सा 'पुष्टिभक्ति'तयोच्यते॥३६॥
जीवेषु परमात्मैककृताद् वरणबीजतः॥
श्रीमदाचार्यकृपया मया चात्र निरूपिता॥३७॥

**( तत्र आधुनिकानां पुष्टिसर्गजातानां पुष्टिमार्गवैपरीत्यम् )**

लाभपूजार्थसंजाता सेवाकृतिः विनश्यति ॥
तन्निषेधात्तु क्रोधेहि तन्माहात्म्यधीः पुनः ॥३८॥
धनलोभेन भगवतो वै लालने रति नश्यति ॥

**( उपसंहारः )**

ततश्चाचार्यमार्गस्था त्र्यंशभक्तेर्हि रक्षणे ॥३९॥
दक्षाः भवन्तु भावेनैतेन रचितं मया ॥
वाक्पतिदर्शिते मार्गे सर्वे मार्गानुयायिनः ॥४०॥
पुष्टिभक्तिसमाराध्यं कृष्णं शुद्धं भजन्त्विति ॥
ततो वाक्पतिभावात्मा हृद्यारुढो भवेत् पुनः ॥४१॥

इति गोस्वामिश्रीदीक्षितात्मजेन श्याममनोहरेण कृतं
भक्तिसर्गभक्तिमार्गाविरोधनिरूपणं
सम्पूर्णम्

॥ श्रीकृष्णाय नमः ॥

॥ श्रीमदाचार्यचरणकमलेभ्यो नमः ॥

## ॥ पूर्णानन्दपूर्णकामनामनिरूपणम् ॥

प्रणम्य श्रीमदाचार्यं कृष्णास्यानन्दरूपिणम्॥
'पूर्णानन्दपूर्णकाम'नामव्याख्यां समारभे॥१॥

### (शंका)

ब्रह्मण्यानन्दरूपे हि का वेयं पूर्णता मता?॥
व्यावर्त्यं तेन किं ज्ञेयं तस्माद् व्यर्थं विशेषणम्॥२॥

### (समाधानं)

इति चेत् तद्धि पूर्णत्वं लीलाकर्त्रोर्विभेदतः॥
द्विविधं सच्चिदानन्दानन्दप्राचुर्यभेदतः॥३॥

### (सच्चिदानन्दलीला)

**"सत्यं ज्ञानमनन्तं"**[१] तद् 'ब्रह्म' श्रुत्यादिगोचरम्॥
देशकालवस्तुरूप - परिच्छेद - विवर्जितम्॥४॥
सच्चिदंशसमुद्भूत - पञ्चकोशैः सदावृतम्॥
स्वान्तःस्थनामरूपाणां कोशेष्वेषु प्रदर्शकम्॥५॥
जडजीवेशरूपैर्हि लीलाद्भुतरसात्मकम्॥
सच्चिदानन्दरूपांशैः निजानन्दे रतं सदा॥६॥

### (आनन्दमयलीला)

सर्वकर्ता सर्वगूढो य आनन्दोऽत्र वर्णितः॥

१.तैत्ति.उप.२।१



तस्य पूर्णत्वमप्यत्र स्वात्मप्राचुर्यमूलकम्॥७॥
मयटा बोधितं चात्र ह्यानन्दमयशब्दितम्॥
तस्यानुभावरूपं यत् प्रियत्वं सहजं हि तत्॥८॥
सा प्रीतिर्हि चिदंशेषु वरणान्नैकट्यतोऽपि वा॥
तत्र मोदप्रमोदौ च विभावद्वयरूपिणौ॥९॥
मोदः प्रेम्णोद्दीपनं वै प्रमोदोऽस्यावलम्बनम्॥
आलम्बनेनोद्दीपितप्रेम्णो ह्यानन्दधर्मता॥१०॥
पुरुषोत्तमस्यानन्दः स्वमहिम्न्यक्षरात्मके॥
तस्य स्नेहरसात्मत्वं श्रुतौ भागवतेऽपि च॥११॥
**"न वा सर्वस्य कामाय प्रियं सर्वं हि चात्मनः॥
कामायैव प्रियं"**[२] श्रुत्या **"अहमात्मात्मनां तथा॥१२॥
प्रेष्ठः सन् प्रेयसां चापि रतिं कुर्यादतो मयि॥
देहादौ यत्कृता प्रीति"**[३] रित्येवं वचनात्तथा॥१३॥
निरूपाधिकप्रेमैकरूपः सोऽत्र निरूपितः॥
पूर्णानन्दतया चैकोऽनैक्यं लीलाभिकामितम्॥१४॥

### (तत्र विचारणीयं)

इदमत्र विचार्यं स्याद् आनन्दविषये पुनः॥
अनल्पं हि सुखं यद्वा दुःखेनापि विवर्जितम्॥१५॥
'आनन्द'पदवाच्यं वा भिन्नं द्वाभ्यां भवेत्तु किम्?॥

### (तत्रोच्यते)

सुखं वा यदि दुःखं वा नीतिधर्मकृतं मतम्॥१६॥
जीवगं तज्जडे नैव न हि जीवान्तर्यामिणि॥

२.बृह.उप.२।४।५
३.भाग.पुरा.३।९।४२

स्वपरप्रतिभासस्याप्रसक्तेः न घृणोद्भवः ॥१७॥

**( पंचकोशेषूद्गतयोः सुखदुःखयोः निरूपणम् )**

तदभावे न वै नीतिधर्मप्रत्ययसम्भवः ॥
रसात्मके दुःखसुखे ते हि चात्मसमुद्गते ॥१८॥
क्रियोप्राणोत्थिते येहि सुखदुःखे स्वभावतः ॥
मनोबुध्युत्थिते चैव सुखदुःखेऽभिमानतः ॥१९॥
आत्मानन्दोत्थिते ये तु सुखदुःखे रसात्मके ॥
नैव चाल्पसुखस्यातो ह्यानन्दत्वविकल्पना ॥२०॥
तदुत्थदुःखसुखयोश्चातो न रसरूपता ॥

**( आनन्दात्मकसुखदुःखयो रसत्वोपपादनम् )**

मोदप्रमोदौ विज्ञेयौ विभावौ द्विविधावपि ॥२१॥
अनुभावः प्रियत्वं वा प्रीतिर्वा शिर उच्यते ॥
स्थायिभावोऽत्र चानन्दोऽपरिच्छिन्ने हि ब्रह्मणि ॥२२॥
कृत्वा मञ्चं सदंश स्वं चिदंशान् प्रेक्षकान् पुनः ॥
क्रीडत्यात्मनानन्दः स्वात्मनि स्वात्मने पुनः ॥२३॥
सच्चिदानन्दब्रह्मैव सर्वरूपधरं हि तत् ॥
सर्वशक्तिस्वतन्त्रं वै कर्तुञ्चाकर्तुमेव च ॥२४॥
कर्तुं वान्यथा शक्तं सर्वदोषविवर्जितम् ॥
सदंशे रूपप्राकट्यं चिदंशे नामजन्मतः ॥२५॥
आनन्दांशे कर्मणां वै प्राकट्यं स्वीयलीलया ॥
तस्मान्मोदप्रमोदाभ्यां प्रीतेर्हि जनकत्वतः ॥२६॥
सत्यज्ञानान्तरूपे ब्रह्मण्यानन्दपूर्णता ॥
एवं द्वेधा हि पूर्णत्वम् आनन्दे प्रतिपादितम् ॥२७॥
'पूर्णकामं'पदेऽप्येवं समासः को भवेदिह ॥



पूर्णश्चासौ हि कामश्च न नामस्वनन्वयाद् ॥२८॥
पूर्णे पूर्णस्य कामोऽपि नैव तेनैव हेतुना ॥
बहुव्रीहीसमासोऽत्र कामः पूर्णो हि यस्य सः ॥२९॥
पूर्णत्वं कीदृशं तत्र तद्विमर्शोऽत्र क्रियते ॥
निरानन्दस्य कामस्तु दुःखायैव विनिश्चितः ॥३०॥
**"रजोगुणो महापाप्मा विध्येनमिह वैरिणम्"**[४] ॥
गीतायामेवमुक्तत्वान्नेदृशी पूर्णकामता ॥३१॥
निष्कामपुरुषस्येहानन्देन सहितस्य वा ॥
रहितस्य वा विरुद्धत्वान्नैव कामे हि पूर्णता ॥३२॥
सानन्दस्यैव यः कामः सोऽत्र पूर्णः प्रकीर्तितः ॥
**"सोऽकामयद् बहुस्यां"**[५] वै श्रुतिप्रोक्ता सकामता ॥३३॥
काम्याप्तौ स्याद् निरस्ता या यदप्राप्तौ च दुःखिता॥
जीवेष्वेव विरोधोस्ति कामानन्दयोः सदा॥३४॥
परमात्मनि विरोधो न सत्यकामाप्तकामतः ॥
जीवेषु कल्पनातीतो लीलारूपोऽत उच्यते॥३५॥
सत्ये ज्ञाने ह्यनन्तेऽतो ब्रह्मणि लीलया मतः ॥
पूर्णात्पूर्णस्योद्गमस्तु तन्न्यायोऽत्र समाश्रितः ॥३६॥

**( लीलात्मककामकृतभेदाः )**

भवितुं सच्च त्यच्चैवं सत्यांशेन स्वयं पुनः॥
निलयनञ्चानिलयनं चैवं कामस्य पूर्णता ॥३७॥
ज्ञानांशेनानिरुक्तञ्च निरुक्तं भवितुं तथा ॥
विज्ञानञ्चाप्यविज्ञानं कामस्यैवं हि पूर्णता ॥३८॥
सत्यानृताभ्यां वै नामरूपाभ्यां हि निजात्मनः ॥
व्याकरणं सर्वभवनं लीलारसतया मतम् ॥३९॥

---

४.भग.गीता ३।३७
५.तैत्ति.उप.२।६

कामेऽस्मिन् पूर्णता यस्मादानन्दोत्था मता हि सा ॥
तस्माद् "**रसो वै स**"[६] श्रुतावुक्ता चानन्ददायिता ॥४०॥

**( ईदृक्पूर्णानन्दपूर्णकामत्वयोराचार्येऽनुगमः )**

तत्र भेदमतिस्तावत् संभवेद् भीतिवर्धिका ॥
अभेददर्शने नूनं पदं तदभयस्य वै ॥४१॥
इति श्रुतेस्तथा "**ऽऽचार्यदेवो भव**"[७] विधानतः ॥
पूर्णानन्दपूर्णकामनामाचार्येऽतिदिश्यते ॥४२॥
तदास्याग्नेः स्वरूपत्वादपि तद्व्यपदेश्यता ॥
सर्वोत्तमानाम् आचार्यनाम्नां द्वेधा गती मते ॥४३॥
तत्त्वकर्तव्ययोः पुष्टिमार्गस्येह निरूपणम् ॥
नामसु बहुषु ब्रह्मनामसाम्योपदेशना ॥४४॥
पुष्टिमार्गीयजीवानां कर्तव्योद्बोधनं वरम् ॥
नामव्याजेन चाप्यत्र ग्रन्थकृद्भिः कृतं पुनः ॥४५॥
"**तदुक्तमपि दुर्बोधं सुबोधे**"[८] त्यादि वाक्यतः ॥
भोक्तृभावो भक्तिमार्गे भजनानन्ददायकः ॥४६॥
तदाप्तिमार्गस्त्वाचार्यैः चतुश्लोक्यां स्फुटीकृतः ॥
"**यदि श्रीगोकुलाधीश**"[९] पद्ये सर्वात्मना ततः ॥४७॥
सानन्दस्य तु कामोऽत्र लोकवेदातिगो मतः ॥
एवमाचार्यकृपया तदुक्तौ श्रद्धया तथा ॥४८॥
तदंगीकृतशास्त्रेषु निष्ठयैवं नचान्यथा ॥
प्रक्रियायास्तु बोधेन पूर्णतायाः विबोधनम् ॥४९॥

---

६. तैत्ति. उप. २।७
७. तैत्ति. उप. १।११।२
८. सर्वो. स्तो. ४
९. चतु. श्लो. ३



जायते स्फुटमेवात्र तथा चेत्सफला कृतिः ॥
अन्यथा किञ्चिदुक्तं चेत् क्षमन्तु दीनवत्सलाः ॥५०॥

इति गोस्वामिश्रीदीक्षितात्मजेन श्यामामनोहरेण कृतं
पूर्णानन्दपूर्णकामनामनिरूपणं
सम्पूर्णम्

॥श्रीकृष्णाय नमः॥

॥ श्रीमदाचार्यचरणकमलेभ्यो नमः॥

## ॥ वाक्पतिविबुधेश्वरनामनिरूपणम्॥

वाक्पतिर्वल्लभोऽस्माकं वागतिस्तस्य वाक्षु वै॥
वाग्रतिस्तु तदुक्तेऽर्थे श्रीकृष्णे परमात्मनि॥१॥
प्रणम्य वाक्पतिं तं वै वागर्थं नन्दनन्दनम्॥
तन्नामनिहितानन्दं लब्धुं व्याख्यानम् उच्यते॥२॥

### ( उपक्रमः )

सत्यं ज्ञानमनन्तञ्च ब्रह्मेत्थं श्रुतिवर्णितम्॥
वस्तुना देशकालाभ्यां नैव तत् परिच्छिद्यते॥३॥
रूपनाम्नोः कर्मणां च ब्राह्मैक्यं श्रुतिगोचरम्॥
त्रैविध्यं ब्रह्मणो रूपनामकर्मात्मकं तथा॥४॥
अवाच्यत्वादनिर्वाच्यं श्रुतौ च विनिरूपितम्॥
प्राक्सृष्टेः तद्धि पश्चात्तु नामरूपादिधारकम्॥५॥
**''सर्वाणि रूपाणि विचित्य धीरो**
**नामानि कृत्वाभिवदन्''**[1] यदाऽभवत्॥
तदास्य जाता खलु सर्वरूपता
तद्बोधरूपापि च सर्वनामता॥६॥
ज्ञानं नु सार्वज्ञ्यतया प्रवृद्धम्
ऐश्वर्यवीर्यादिगुणैः समृद्धम्॥
ध्रुवैर्गुणैः षड्भिरितोऽस्य नूनं
पौराणिकी भगवत्ता स्फुटाभूत्॥७॥
प्रत्येकयोः रूपनाम्नोः कर्तृताधारते ततः॥

---

१.तैत्ति.आर.३।१२।७



निर्वाच्यतापि सिद्धाऽभूत् कार्यलक्षणसम्भवात्॥८॥
स्वरूपलक्षणं **''सत्यं ज्ञानञ्चानन्तमेव''**[2] तत्॥
**''यतो वा जायते यस्मिन् स्थीयते लीयते''**[3] ऽपि च॥९॥
कार्यलक्षणसिध्यैवं स्ववाच्यत्वं समाश्रितम्॥
ज्ञाता स सर्वरूपाणां वक्ता नाम्नां सएव च॥१०॥
वाक्पतित्वं च तस्यैवं श्रुतावेव समर्थितम्॥
'भू'रिति व्याहरन् भूमिं 'भुवम्' उच्चारयन् पुनः॥११॥
अन्तरिक्षं हि 'स्वं'चोक्त्वा दिवं चासृजदेव सः॥
व्याहृतेर्बीजमोंकारं सृष्टिस्थितिलयार्थकम्॥१२॥
ॐकारवाच्यतापन्नं कार्यलक्षणबोधकम्॥
सृष्टिः स्वभावतो नैषा किन्तु संकल्पतो मता॥१३॥
**''तपस्तप्त्वाऽसृजत् सर्वम् इदं''**[4] श्रुत्या निरूपणात्॥
नामनी ब्रह्मणश्चैते वाक्पतिविबुधेश्वरौ॥१४॥

### ( श्रीमदाचार्ये नामातिदेशः )

निजाचार्येऽतिदिश्येते श्रुत्यादेशानुवर्तनात्॥
शुद्धाद्वैतमते सर्वं तदात्मकतया मतम्॥१५॥
शास्त्राचयनकर्तृत्वाद् आचार्यश्चातिदेशभाक्॥
अंशांशिनोर्हि तादात्म्यात् कृष्णास्यत्वात् तदंशता॥१६॥
आचार्यनामनी चैते प्रभुभिर्विनिरूपिते॥

### ( तयोः संगति )

अवाच्यपूर्णानन्दस्य पूर्णकामस्य कामतः॥१७॥
जाता सृष्टिरियं तेन वाक्पतिर्विबुधेश्वरः॥

---

२.तैत्ति.उप.२।१
३.तैत्ति.उप.३।१
४.तैत्ति.उप.२।६

नाम्नोर्हि पूर्वनामभ्यां संगतिश्चोपपद्यते ॥१८॥
वागात्मकं नाम यद्वद् रूपं बोधात्मकं तथा ॥
रूप्यते मनसा बुद्ध्या व्युत्पत्त्यैवं प्रसिध्यति ॥१९॥
नामरूपे हि संकल्पसामर्थ्याभ्यां कृते मते ॥
'प्रज्ञा'पर्यायरूपो हि 'माया'शब्दो मतो यतः ॥२०॥
श्रुत्युक्तं बहुभवनं तद् ब्राह्मिकं नतु मायिकम् ॥
मायया हि स्वमात्मानं सृष्टवान् स्वात्मकं हि तत् ॥२१॥
**''इन्द्रो मायाभि''**[५] रित्युक्त्या **''बलज्ञानक्रियाश्च ताः ॥**
**स्वाभाविक्यः परास्तस्य शक्तयः**[६] समुदीरिताः ॥२२॥
तथात्वात् तस्य शक्तीनां मृषात्वं नैव सम्भवेत् ॥
सामर्थ्यं भवितुं सर्वं तस्य ज्ञानक्रियावतः ॥२३॥
नैवोपाधिकत्वं स्यात् तादात्म्यस्यैव वर्णनात् ॥
**''ऐतदात्म्यमिदं सर्वं''**[७] श्रुतिसिद्धं नचान्यथा ॥२४॥
स्वात्मनि स्वात्मिका सृष्टिर्वाचामपि मता तथा ॥

## ( तत्रैकाशंका )

नैवं वाच्यं जागरुके शब्दाप्रामाण्यवादिनि ॥२५॥
निर्विकल्पकज्ञानस्य प्रामाण्यं वदतां मते ॥
शाब्दं ज्ञानमप्रमाणम् अर्थेतरजननाद् मतम् ॥२६॥
नामात्मिकानां वाचां वै आविद्यकतया पुनः ॥
मृषात्वाद् ब्रह्मतादात्म्ये मृषात्वं ब्रह्मणो भवेद् ॥२७॥

## ( तत्र समाधानम् )

शब्दाप्रयोक्तॄणां तत्र कानने पशुपक्षिणाम् ॥

५.बृह.उप.२।५।१९
६.द्रष्ट.श्वेता.उप.६।८
७.छान्दो.उप.६।८।७



खाद्याखाद्यविकल्पाभ्यां खाद्यबुद्धिर्हि दृश्यते ॥२८॥
इन्द्रियैः रूपगन्धादिभेदजन्येदृशी मतिः ॥
तत्सामान्याद् मनुष्याणां मतौ शब्दान्वयेऽपि हि ॥२९॥
विकल्पानां भासनेऽपि न वै शब्दैकभास्यता ॥
न बुद्धानुगमात् संघे विहारोऽप्यनृतो मतः ॥३०॥
कुतश्चाक्षुषप्रत्यक्षानुगमाच्छाब्दो भ्रमायते ? ॥

## ( ननु )

वस्तुद्रष्टुस्तु संकल्पविकल्पौ यौ न वस्तुगौ ॥३१॥
शाब्दज्ञाने तदुपयोगाद् वाचां मिथ्यात्वमिष्यते ॥

## ( तत्समाधानम् )

इति चेत् तन्नवै युक्तं प्रतीत्योत्पादवादिनः ॥३२॥
बुद्धेश्चार्थात्तु जन्या या विकल्परहिता प्रमा ॥
शाब्दैन्द्रियैकविज्ञानमपि तद्वत्कुतो नहि ॥३३॥
मृषावेदकता वाचां नियता नहि दृश्यते ॥
विनापि शब्दवेधेन हीन्द्रिये भ्रान्तिहेतुता ॥३४॥
दोषैरनेकैः स्वगतैः विशेषास्फुरणादपि ॥
शब्दाननुगमेपीत्थं न वाचामप्रमाणता ॥३५॥
सदोषत्वे मृषात्वन्तूभयत्रापि सम्भवेद् ॥
निर्दोषत्वे तु सामान्यं बोधकत्वं द्वयोरपि ॥३६॥
शब्दोच्चारणमात्रेण अर्थोत्पत्तावशक्तितः ॥
शब्दानां भ्रान्तिहेतुत्वं स्वीकृतं तन्न चान्यथा ॥३७॥
धम्मबुद्धादिशरणं भवेन्नूनमपार्थकम् ॥
वाचामत्राप्रमाणत्वे शरणेनैव मानता ॥३८॥
वाच्यभागी स विज्ञेयो वाचामाश्रयणं विना ॥

वाचामाश्रयणेनैव वागप्रामाण्यवेदकः ॥३९॥
वागप्रामाण्यन्तु वाण्यैव साधने व्याहतिः स्फुटा ॥
वचोभिस्साधने सिद्धा वाण्यास्तत्र प्रमाणता ॥४०॥
स्वनामकर्तृप्रामाण्यात् सिध्येत् सिद्धार्थता यदि ॥
ईशर्षीणां च प्रामाण्यात् वाचां सिद्धा हि सार्थता ॥४१॥

**( तत्राशंका )**

ननु संवृतिप्रामाण्यं न तत् स्यात् पारमार्थिकम् ॥

**( समाधानम् )**

संवृतेरप्रमाणत्वं यदीष्टं परमार्थतः ॥४२॥
तन्न्यायात्संवृतेश्चापि सिद्धैव परमार्थता ॥
संवृतेरप्रमाणत्वं मतञ्चेदपरमार्थतः ॥४३॥
परमार्थता भवेत्सिद्धा संवृतेर्हि कुतो नहि ? ॥
वाक्पतित्वं ब्रह्मणोऽतो ब्रह्मज्ञे ब्रह्मताकृतम् ॥४४॥
ब्रह्मापरोक्षज्ञानेन रहिते श्रौतबोधजम् ॥
ज्ञानं परोक्षरूपं हि ब्रह्मवादात्मकं मतम् ॥४५॥
तदुद्बोधनेनैव बोद्धॄणां विबुधेश्वरः ॥
तेनात्र वस्तुनिर्देशः कर्तव्यस्योपदशेना ॥४६॥

**( किञ्च )**

बृहत्याः ब्रह्मणश्चापि चतुष्पात्त्वमुदीरितम् ॥
ऋक्संहितायां[८] तच्चान्योन्यानुरूपत्वहेतुकम् ॥४७॥
निर्विकल्पस्य प्रामाण्यमर्थसारूप्यहेतुकम् ॥
बृहत्या ब्रह्मणश्चापि सारूप्यात् परमार्थता ॥४८॥

---

८. ऋक्.संहि. ३।३।२२-१०।९०।३



**( तत्रैकाशंका )**

श्रुतौ सामान्यसारूप्यमुभयोः वर्णितं यथा ॥
वैलक्षण्यं त्वेतयोस्तु निजाचार्यैर्निरूपितम् ॥४९॥

**( तथाहि )**

रूपसर्गः सदंशेषु नामसर्गः चिदात्मनि ॥
'कर्ता - कारयिता' वाक्यात् कर्मसर्गोऽन्तरात्मसु ॥५०॥
स्थूला चान्तवती रूप - सृष्टिस्तु विकृता जडा ॥
नामसृष्टिरनन्ता च सूक्ष्मा चाविकृता तथा ॥५१॥
कूटस्था बोधरूपा हि वैलक्षण्यमतोत्र हि ॥

**( तत्समाधानम् )**

वैलक्षण्यं यथा सिद्धं तथान्यदपि वर्णितम् ॥५२॥
प्रत्यायको नामसर्गः रूपप्रत्यायनञ्च तैः ॥
बुद्धस्यापि हि मूर्त्यादिकृतप्रत्यायनं यथा ॥५३॥
न चान्यमूर्तेस्तच्छक्यं वैरूप्यादेव हेतुतः ॥
पाषाणपञ्चधातूनां वैरूप्यमप्रयोजकम् ॥५४॥
प्रमेयन्तु प्रमाणस्य कारकत्वेन द्योतितम् ॥
प्रमाणञ्च प्रमेयस्य ज्ञापकत्वेन वर्णितम् ॥५५॥
वाक्पतेर्हि यतश्चैवं विबुधेश्वरता मता ॥
अन्यैर्बोद्धुमशक्यत्वात् कृपयैवं निरूपितम् ॥५६॥
यदत्रानुचितं किञ्चित् तद् ममैव गुरोर्नहि ॥
अस्ति यद्युचितं किञ्चित् तद् गुरोरेव मे नहि ॥५७॥

इति गोस्वामिश्रीदीक्षितात्मजेन श्याममनोहरेण कृतं
वाक्पतिविबुधेश्वरनामनिरूपणं
सम्पूर्णम्

॥ श्रीकृष्णाय नमः ॥

॥ श्रीमदाचार्यचरणकमलेभ्यो नमः ॥

## ॥ कृष्णनामसहस्रस्येत्यादिनामत्रयस्य व्याख्या ॥

कृष्णनामसहस्रस्य वक्तारं वल्लभं मुदा ॥
भक्त्याचारोपदेशार्थं नानावाक्यनिरूपकम् ॥१॥
नत्वा तदुक्तगूढार्थं तं वै भक्तपरायणम् ॥
वर्णयामि कृपालब्धबुद्ध्या तन्नामवर्णने ॥२॥
लोकसिद्धस्य चार्थस्य योगोऽलौकिककर्मणि ॥
लोकसिद्धस्य कामस्य लौकिकत्वनिवर्तकः ॥३॥
तेनैव जीवन्मुक्तत्वमर्पिते श्रीहरौ पुनः ॥
चतुर्णां पुरुषार्थानां भक्तेः पञ्चमता तदा ॥४॥
जीवन्मुक्तताश्रद्धावती भक्तिः परात्मनि ॥
सिद्ध्यते चेदुत्तरं हि पूर्वपूर्वफलात्मकम् ॥५॥
एवं भागवती भक्तिः फलानां हि फलात्मिका ॥
तस्मिन्निरुद्धता चापि ब्रह्मणि परमात्मनि ॥६॥
भगवति श्रीकृष्णरूपे सैव सर्वात्मभावता ॥
बाह्याभ्यन्तस्तथा चोर्ध्वं भूतले सहवर्तिता ॥७॥
मुक्तिस्पृहाविरहितायाः भक्तेरेवोपदेशना ॥
नातः परतरो मन्त्रो नातः परतरस्तवः ॥८॥
नातः परतरा विद्या तीर्थं नातः परात्परम् ॥
विद्याविद्ये हरेः शक्ती हरिरत्यंगतां गते ॥९॥
भवेतां वै तदा कृष्णलीलायामनुरूपता ॥
कृष्णस्य ब्रह्मता सर्वनामरूपादिधारिता ॥१०॥
परमात्मताचास्मासु भावालम्बनरूपता ॥
पूर्वस्य दृष्टसंवादोऽनन्तत्वान्नैव शक्यते ॥११॥



उत्तरस्यान्तरस्यात्र संवादापेक्षितापि नो ॥
पूर्णानन्दस्य यावाप्तिः पुष्टिभक्तिर्मता त्विह ॥१२॥
सुखाद्यान्तरानुभूतौ संवादो नैव चैष्यते ॥
तस्मात्तु तस्य लीलायाः कथासेवे हि सिद्ध्यतः ॥१३॥
तादृग् यद् जीवनं तत्तु तत्त्वजिज्ञासुताकृतं [१] ॥
समर्पणे स्वस्वीयानां नैर्गुण्यं ब्रह्मतैव हि ॥१४॥
तदर्थं यमुनास्तोत्रं नैर्गुण्योद्भवनाय वै ॥
तेन दोषनिवृत्तिर्या तया च भगवद्रतिः ॥१५॥
तया सकलसिद्धिश्च सन्तोषश्च परस्तथा ॥
तुष्टे स्वभावविजयो सैषा चोद्धारप्रक्रिया ॥१६॥
उपदिष्टा कलौ सृष्टौ कृष्णलीलानुभाविका ॥
निःसाधनफलात्मत्वं भाते सेव्ये हि सर्वदा ॥१७॥
साधनेषु निजाहंता फलेषु ममता तथा ॥
निवृत्त्या चोभयोः सिद्ध्येद् पुष्टिभक्त्यंगता दृढा ॥१८॥
कृष्णनामसहस्रस्य वक्तुरेवं हि स्तुत्यता ॥
श्रीगोविन्ददासोक्ता विज्ञेयैतत्पदे पुनः ॥१९॥

---

१. धर्मस्य ह्यापवर्ग्यस्य नार्थोऽर्थायोपकल्पते ।
नार्थस्य धर्मैकान्तस्य कामो लाभाय हि स्मृतः ॥
कामस्य नेन्द्रियप्रीतिर्लाभो जीवेत यावता ।
जीवस्य तत्त्वजिज्ञासा नार्थो यश्चेह कर्मभिः ॥
वदन्ति तत्तत्त्वविदस्तत्त्वं यज्ज्ञानमद्वयम् ।
ब्रह्मेति परमात्मेति भगवानिति शब्द्यते ॥
(भाग.पुरा.१।२।९ - ११)
एतावदेव जिज्ञास्यं तत्त्वजिज्ञासुनाऽत्मनः ॥
अन्वयव्यतिरेकाभ्यां यत्स्यात्सर्वत्र सर्वदा ॥
(सुबो.२।९।३५)

जगतोऽस्य तत्कार्यत्वभानाद् भक्तिर्न तादृशी॥
यादृशी तस्य लीलात्वज्ञानाद् भवति जीवगा॥२०॥
तस्मात् कृष्णस्य दशविधलीलावैशिष्ट्यज्ञानत:॥
प्रादुर्भवति या भक्ति: सा स्याद् नाम्नां सहस्रत:॥२१॥
भागवतात् तदुद्धारो भक्त्योद्धारार्थमेवहि॥
उद्धार: सगुणे विश्वे स्वस्य नैर्गुण्यसंस्थिति:॥२२॥
नैर्गुण्यभावसरणी यमुनातो हि मंगलम्॥
सकलानां हि सिद्धीनां हेतुस्तद्रतिवर्धिनी॥२३॥
प्रतिबन्धनिरासेनानुभूतियोग्यकारिणी॥
तद्धर्मधारिणी सैव तत्सम्बन्धप्रदायिनी॥२४॥
स्वसेवनाद् गोपिकावत् तत्प्रियत्वकरी सदा॥
सम्पादिका तनुनवनवतनुत्वभिदा च सा॥२५॥
लीलासामयिकश्रमजलसम्पर्कदायिनी॥
इत्थं भाग्यवतां भूमौ सिद्धि: विभ्वनुग्रहात्॥२६॥
देहलीदीपकन्यायाद् नाम्नोस्त्यन्वयो मत:॥
सहस्रनामवक्तृत्वे हेतुर्भक्तपरायण:॥२७॥
तथैवभक्त्याचारस्योपदेशेपि युज्यते॥
तदेव सुयशो ह्यत्र श्रवणीयं विशेषत:॥२८॥
नाम्नश्चैतस्याष्टयामे कीर्तनीयत्वम् उक्तवान्॥
तुच्छीकृतं कोटिकामं नामश्रीवल्लभस्य वै॥२९॥
गोविन्ददास: पदेऽत्र नामव्याख्यानामन्तरा॥
**''जन्मैश्वर्यश्रुतश्रीभिरेधमानमद: पुमान्॥३०॥**
**नैवार्हत्यभिधातुं त्वामकिञ्चनगोचरम्''** [२]॥
कलिस्त्वघप्रधानोऽपि न भक्ते: बाधको मत:॥३१॥
सर्वोद्धारककृष्णो हि नि:साधनफलात्मक:॥

२.भाग.पुरा.१।८।२६



नि:साधनजनोद्धारकृपाव्यापाररूपता॥३२॥
नि:साधनभावरूपा भक्ति: प्रादुर्भवत्यत:॥
तस्माद् भक्तिविरोधित्वान्मदो भावविनाशक:॥३३॥
अतोहि कृष्णनैर्भर्यं भक्तिरूपोपपादकम्॥
स्ववंशेस्थापिताशेषमाहात्म्यस्मयवारक:॥३४॥
**''तदभावे स्वयं वापि मूर्तिं कृत्वा हरे: क्वचित्॥**
**परिचर्यां सदा कुर्यात् तद्रूपं तत्र स्थितम्''** [३] **॥३५॥**
एवञ्चाग्रिमेष्वेव गुरुत्वस्य निरासनात्॥
कलेर्जातमहाघानां कर्तनं तद्धि सर्वथा॥३६॥
स्ववाग्रूपेण विद्यमानोऽधुनापि स्वोपदेशत:॥
उद्धारकोस्ति सोयं श्रीवल्लभो वाल्लभस्य वै॥३७॥
तदुक्तं श्रीद्वारकेशै: यमुना विवृतौ स्वयम्॥
**''अवतारदशायान्तूद्धृती रूपदर्शनात्॥३८॥**
**इह नामात्मकैर्ग्रन्थै: स्वदासानां सदोद्धृति:''** [४]॥
तत्रानुग्रहभाजानां कृपावैविध्यतस्तथा॥३९॥
प्रपत्तिपूजनासक्तिसेवातीर्थाटनात्मकम्॥
कृपावान्तरव्यापारवैविध्यं चानुलक्ष्य हि॥४०॥
नानोपायोपदेशार्थं नानावाक्यनिरूपणम्॥
तेन स्वमार्गे जीवानां बीजभावाविनाशनम्॥४१॥
मृतसञ्जीवनार्थं हि बार्हिमुख्यान्मृतिर्यत:॥
शिक्षाश्लोक्यां तथा चोक्तं न कृष्णे लोकवत् मति:॥४२॥
कृष्णार्थं कृष्णसेवा या सैव पुष्टिस्वरूपिणी॥
कृष्णार्थं तत्प्रपत्ति: या सैव पुष्टिस्वरूपिणी॥४३॥
कृष्णार्थं तत्कथा वापि सैव पुष्टिस्वरूपिणी॥

३.त.दी.नि.२।२२८
४.यमुना.अन्वयबोधिनि.२२

कृष्णैकानुभवार्था या तीर्थसेवापि तादृशी ॥४४॥
कृष्णार्था यत्र कुत्रापि पूजादेशेषु संस्थितिः ॥
कृष्णार्थे वापि भक्तानां संगतिश्च मता सदा ॥४५॥
कलेर्मृतस्य भगवद्भावस्योज्जीवनं पुनः ॥
स्वस्थितौ स्वमुखाद् स्वस्य वाण्याप्यन्यदा मता ॥४६॥
भक्त्याचारः कुतश्चोक्तो भक्ताचारः कुतो नहि ? ॥
ब्रूमोऽन्तरंगकर्तव्ये बहिरंगमसिद्धवत् ॥४७॥
भक्ताचारो हि देहादिष्वहंकृतिकृतो मतः ॥
यावद् देहाभिमानस्तावद् वर्णाचारनित्यता ॥४८॥
नियता सापि भक्त्यर्था तन्नानुष्ठेयता स्वतः ॥
देहाभिमानशैथिल्ये तस्मिन्नंशित्वबुद्धिजः ॥४९॥
भक्त्याचारोह्यनुष्ठेयो नानाभावेन देशितः ॥
अंशाशिभावस्फूर्त्यात्तु तदात्मरतिनिर्गुणा ॥५०॥
सगुणेषु चित्ताहंकारमनोबुद्धिषु व्यज्यते ॥
चेतस्तत्प्रवणतारूपा सेवा सा च मानसी ॥५१॥
आत्मप्रपन्नता दास्ये युज्येतेऽहंधिय ततः ॥
तत्सौख्यस्य तु संकल्पाः स्वस्वीयानां हि योजने ॥५२॥
लीलानामगुणादीनां विकल्पे बहुधा मतिः ॥
स्वतनुवित्तयोगेन स्वगृहे व्रजभावतः ॥५३॥
भक्त्याचारोऽन्तरंगोयं बहिरंगस्तथापरः ॥
भोगशृंगाररागादि शौचाचारपालनम् ॥५४॥
तत्तद्भक्तस्य देहादावभिमानपुरस्सरः ॥
भक्त्याचारोपदेशार्थनानावाक्यैः प्रबोधनम् ॥५५॥
युक्तमाचार्यवर्याणां सर्वथा चोपपादितम् ॥
श्रीभागवतगूढार्थप्रकाशकमतं यया ॥५६॥
दीक्षितस्य सुतेनैवं श्यामेन वाल्लभेन वै ॥



वल्लभोक्तभागवततात्पर्यं सुप्रकाशितम् ॥५७॥

इति गोस्वामिश्रीदीक्षितात्मजेन श्याममनोहरेण
विरचिता
कृष्णनामसहस्रस्येत्यादिनामत्रयस्य व्याख्या
सम्पूर्णा

॥ श्रीकृष्णाय नमः ॥

॥ श्रीमदाचार्यचरणकमलेभ्यो नमः ॥

## ॥ श्रीगोपीनाथप्रभुचरणसप्तविंशतिनामानि ॥

नमामि श्रीमदाचार्यं गोपीनाथं च तत्सुतम् ॥
सप्तविंशतिनामानि प्रवक्ष्यामि मुदान्वहम् ॥१॥

१. श्रीगोपीनाथाय नमः
२. श्रीमद्वल्लभज्येष्ठात्मजाय नमः
३. श्रीमतीमहालक्ष्मीगर्भोदधिचन्द्राय नमः
४. आश्विनकृष्णाद्वादश्यां गृहीतजन्माय नमः
५. स्वमातृचरणअक्कास्तनपायिने नमः
६. वाक्पत्युच्चारित ''अंगादंगात्संभवसि हृदयादधिजायसे आत्मा वै पुत्रनामासि''[१] मंत्रश्रवणपराय नमः
७. श्रीमद्विट्ठलाग्रजाय नमः
८. पायम्माभर्त्रे नमः
९. पुरुषोत्तमजनकाय नमः
१०. लक्ष्मीजनकाय नमः
११. सत्यभामाजनकाय नमः
१२. साधनदीपिकाकर्त्रे नमः
१३. श्रीगोपालमनुजापकाय नमः
१४. श्रीपुरुषोत्तमक्षेत्रयात्रापरायणाय नमः

---

१.बृह.उप.६।४।९



१५. कुंकुमगोपीचन्दनतिलकमुद्राधारणकर्त्रे नमः
१६. अडेलग्रामवासिने नमः
१७. सेवाभावनाश्लोककर्त्रे नमः
१८. प्रत्यहं श्रीभागवतपारायणपराय नमः
१९. स्वपितृरचितपुरुषोत्तमसहस्रनामजपपरायणाय नमः
२०. स्वपितुः 'सौन्दर्य'पद्येन स्तुतिकर्त्रे नमः
२१. निजानुजकृत 'यदनुग्रहतो'स्तुतिपद्यसंस्तुताय नमः
२२. श्रीगोवर्धनोद्धरणाय गोपीवल्लभभोगप्रवर्तकाय नमः
२३. जगन्नाथपुरीक्षेत्रयात्राकर्त्रे नमः
२४. तत्र फलाहारिमठनिवासकर्त्रे नमः
२५. स्वविभूतिदर्शकाय नमः
२६. तत्रत्य पुरोहितमुखेन 'एकं शास्त्रं देवकीपुत्रगीतं'पद्याख्या - श्रवणपराय नमः
२७. जगन्नाथक्षेत्रे नित्यलीलाप्रविष्टाय नमः

सप्तविंशतिनामानि श्रीगोपीनाथप्रभोः मुदा ॥
पठनीयान्यस्मदीयैः सदा स्वाचार्यनिष्ठया ॥२॥

इति श्रीगोपीनाथप्रभुचरणसप्तविंशतिनामानि
गोस्वामिश्रीदीक्षितात्मजेन श्याममनोहरेण कृतः
सम्पूर्णः

॥ श्रीकृष्णाय नमः ॥

॥ श्रीमदाचार्यचरणकमलेभ्यो नमः ॥

## ॥ पुरुषोत्तमजोशीवार्तास्थ वचनामृतव्याख्या ॥

### ( मंगलाचरणम् )

प्रणम्य श्रीमदाचार्यान् प्रभून् स्वीयान् मुदा हृदि ॥
कर्मज्ञानभक्तिमार्गतारतम्यं निरूप्यते ॥१॥

### ( ग्रन्थोपक्रमः )

चतुरशीतिवार्तायां जोशीश्रीपुरुषोत्तमः ॥
पृष्टवान् **''कतरो मार्गः श्रेष्ठो वै ज्ञानकर्मयोः''**[१] ॥२॥
आचार्यचरणैरुक्तं **''विश्वासो मनसि दृढः ॥**
**यस्य यत्र स वै मार्गः स्यात् श्रेष्ठस्तत्कृते तु वै ॥३॥**
**तथापि भक्तिमार्गस्य महत्ता निश्चिता मता ॥**
**सर्वाधिकारकत्वात् चाक्लिष्टत्वादि - हेतुतः ॥४॥**
**अन्ययोः क्लेशसाध्यत्वाद् निष्ठादौर्लभ्यमेव हि ॥**
**सत्यां तु हृदि निष्ठायां न क्लेशः साधने क्वचित् ॥५॥**
**निष्ठाभावेऽसहिष्णुत्वात् क्लेशो दुःखाय नान्यथा''**[२] ॥
इत्युक्तवचनव्याख्यां कर्तुमत्र मनो मम ॥६॥
वाणीर्वै वाक्पतेरेतन्मनोरथनियामिका ॥
भवतु कृपया तेन ध्रुवा स्यात् कृतकृत्यता ॥७॥

### ( विषयप्रवेशः )

कर्मप्राधान्यवादेषु सृष्टिस्तावत् क्रियात्मिका ॥
ज्ञानप्राधान्यवादेषु सृष्टिर्ज्ञानात्मिका यथा ॥८॥
भक्तिप्राधान्यवादे तु श्रौते पौराणिकेऽपि च ॥

---

१,२.द्रष्ट.८४ वै.वा.३०



सर्वज्ञानक्रियाशक्तेः हरेर्लीलात्मिकैव सा ॥९॥

### ( कर्मयोगे काठिन्यम् )

जडजीवेशसृष्टौ हि सच्चिदानन्दब्रह्मणः ॥
लीलेच्छयाऽविद्याबन्धो विद्यातो मुक्तिभागिता ॥१०॥
पञ्चपर्वात्मिकाविद्या जीवानां संसृतिर्मता ॥
श्रेयोरूपमुक्त्यै तु योगाः भगवतोदिताः ॥११॥
कर्मज्ञानभक्तिरूपाः श्रीकृष्णेनोद्धवाय वै ॥
तेषां स्वरूपोपायादेस्तत्त्वं ज्ञेयं हि साधकैः ॥१२॥
बहुस्यामहमेको हि येच्छा तस्याः ह्यनेकता ॥
तदानंदतिरोभावो यद् भवेत् सच्चिदंशयोः ॥१३॥
सदंशेऽथ चिदंशेषु जाता ज्ञानतिरोहतिः ॥
सति क्रियैकाविर्भूता ततो भवितुमर्हति ॥१४॥
न ज्ञानं नो रतिर्वापि सच्चिदानन्दगे हि ये ॥
समष्टिव्यष्टिभेदेन सा क्रियांशांशगा द्विधा ॥१५॥
जीवेषु स्यात् क्रियाव्यष्टिः प्रकृतौ तत्समष्टिता ॥
व्यष्टिक्रिया सा जीवेषु मनोबुद्ध्याद्युपाधिजा ॥१६॥
ज्ञानेच्छायत्नसञ्जाता कर्तुः कर्मवन्मता ॥
शास्त्रोक्तक्रिययेशेन जीवयोगो यदा भवेत् ॥१७॥
कर्मयोगः स विज्ञेयः काठिन्यं तत्र चोदितम् ॥
अल्पज्ञानाल्पकामाल्पयत्नैः कर्म च यत्कृतम् ॥१८॥
भवेत् तत्राल्पता तस्याः निष्ठारुक्तहेतुभिः ॥
कर्मानुष्ठानसाफल्यं न भवेत् श्रद्धयैकया ॥१९॥
**''निष्ठाभावे फलं तस्मान्नास्त्यैवेति विनिश्चयः ॥**
**निष्ठा च साधनैरेव न मनोरथवार्तया''**[३] ॥२०॥

---

३.त.दी.नि.१।१८

इत्याचार्योक्तिरेवात्र प्रमाणं नात्र संशयः ॥
आस्तिक्यबुद्धिरज्ञाते तत्त्वे श्रद्धा मता सदा ॥२१॥
ज्ञाते तु विषयेऽभ्यासाद् विश्वासस्तत्र जायते ॥
श्रद्धाविश्वाससम्पत्तौ निष्ठा सम्पद्यते पुनः ॥२२॥
निष्ठा साधनसंक्लेशसहिष्णुत्वमिहोच्यते ॥
निष्ठा तस्मात् सदा कार्यसिद्धिहेतुतया मता ॥२३॥
अल्पनिष्ठा ततश्चात्र कर्मक्लेशासहिष्णुता ॥
चित्तप्रसादाशक्यत्वम् अल्पनिष्ठाकृतं हि चेत् ॥२४॥
कर्मनिष्ठा तदा पूर्णा यदा चित्तं प्रसीदति ॥
इत्युक्तत्वात् कर्मयोगकाठिन्यं समुदीरितम् ॥२५॥
काठिन्यं कर्मयोगे यत् तज्ज्ञानेऽपि निरूप्यते ॥

**( ज्ञानयोगे काठिन्यम् )**

द्वैविध्यं तत्र विज्ञेयं विधेयोद्देश्यभेदतः ॥२६॥
तत्राद्यमात्मनि ज्ञप्तिः ब्रह्मत्वाकारिका तथा ॥
ब्रह्मण्यात्मत्वविज्ञानमिति द्वैविध्यमत्र वै ॥२७॥
चिदंशेऽथ तिरोभावादानन्दस्य च चेतना ॥
केवला ज्ञानरूपा नो चेदुपाधिविनिर्मिता ॥२८॥
मनोबुद्ध्याद्युपाधिभिर् जातं ज्ञानन्तु कृत्रिमम् ॥
ततश्चात्मसुखं नापि सुखं ब्राह्मं भवेत् क्वचित् ॥२९॥
आत्मरत्यात्मको ब्रह्मानन्दो यस्तदभावतः ॥
धर्मरूपाश्च ह्यानन्दाद् रतिर्नैवात्मगामिनी ॥३०॥
कर्मज्ञानेन्द्रियैर्बाह्यविषयान् अवलम्बते ॥
तद्भोगस्यातिरेकाच्च विरतिर्या नियतातु सा ॥३१॥
अतो वैषयिकं ज्ञानं ब्रह्मानन्दाद्यभावतः ॥
ज्ञानेन कृत्रिमेणैव ब्रह्मात्मानवगाहिता ॥३२॥



कृतेऽपि ज्ञानयोगे वै साधनोपाधितः पुनः ॥
विरागो ज्ञानयोगेऽपि नासावानन्दधर्मिकः ॥३३॥
ऐश्वर्यादिगुणाभावात् काठिन्यं ज्ञानयोगगम् ॥
निष्ठाह्रासाय भविता तेनैवं विफलो भवेत् ॥३४॥
सार्वज्ञं ज्ञाननिष्ठायां फलमत्रोपपादितम् ॥
ज्ञानिभ्यो रोचते बहुधाऽहं 'ब्रह्मेति' प्रत्ययः ॥३५॥
मनोबुद्ध्याद्युपेतानामहन्ता ज्ञानिनां भुवि ॥
कियती प्राकृतैः बन्धैः ब्रह्मालौकिकबोधने ॥३६॥
अस्मत्प्रत्ययगोचरान्ये वैराग्याद् आर्तबुद्धितः ॥
सर्वस्य ब्रह्मताबोधो दुर्लभो ज्ञानिनामपि ॥३७॥
सर्वं ब्रह्मेति विज्ञानोपायः क्लेशप्रदोह्यतः ॥
स्वेतरं निखिलं मिथ्या वदतोऽपि पलायनम् ॥३८॥
न मिथ्याधीर्गजे किन्तु मिथ्याधीः स्वपलायने ॥
तेनैतेनैव क्लेशेन निष्ठाह्रासात् भृशं पुनः ॥३९॥
क्लेशोधिकतरो ज्ञानमार्गे भगवतोदितः ॥

**( भक्तियोगे क्लेशाशंकासमाधाने )**

नन्वेवं भक्तियोगेऽपि कुतो नेत्थं हि सम्भवेत् ॥४०॥
इति चेत् तन्न वै युक्तं भक्तेः रूपविचारणात् ॥
सर्वत्रात्र ब्रह्मबुद्धिः परोक्षैव मता यतः ॥४१॥
ब्रह्मापरोक्षबुद्धिर्हि स्वाराध्यैकावसायिनी ॥
भक्तेः फलदशायान्तु अन्यदा भावनात्मिका ॥४२॥
स्वाराध्यलीलेच्छातोहि स्वाराध्यस्य तिरोहितिः ॥
अन्यत्रातोहि सर्वत्र नाराध्यस्यापरोक्षधीः ॥४३॥
सुखेन साधनावस्थानिर्वाहः शक्यते यतः ॥
आराध्यो भगवद्रूपो ब्रह्मैवाराधकोऽपि हि ॥४४॥

भक्तिरूपाराधनाऽपि ब्रह्मैवेति ध्रुवा मतिः॥
ब्रह्मार्चनं ब्रह्मपूजोपस्करं ब्रह्मचार्चकः॥४५॥
ब्रह्मार्च्यं तत्फलं ब्रह्म लीलाभेदोपपत्तितः॥
अतोऽर्च्ये ह्यपरोक्षैव मतिर्ब्रह्मावगाहिनी॥४६॥
अन्यत्र तु परोक्षैव मतिर्लीलाप्रभेदतः॥
ब्रह्मानन्दस्त्वात्मरतिस् तद्विस्तारो जगन्मतम्॥४७॥
वैविध्यमात्मरत्यां यत् तेन सर्वं समञ्जसम्॥
रतिः सैव पुनर्जीवेष्वंशेषु विद्यतेंऽशतः॥४८॥
अतः सिद्धा रतिः स्वस्मिन् अज्ञानादन्यगा परम्॥
विषये शिथिलां कृत्वाराध्ये योज्या शनैरियम्॥४९॥
**''प्रियाः सर्वेऽत्रात्मनोहि प्रियत्वात्''**[४] श्रुतिराह यत्॥
**''अहमात्मात्मनां धातः प्रेष्ठः सन् प्रेयसामपि॥५०॥**
**अतो मयि रतिं कुर्याद् देहादिर्यत् कृते प्रियः''**[५]॥
उक्तं भागवते चैवमतः सिद्धा रतिर्मता॥५१॥
आनन्दस्य तिरोधानाद् षड्गुणानां तिरोहतिः॥
अकृत्रिमाणां तेषान्तु कृत्रिमाणां समुद्भवः॥५२॥
भक्तिमार्गे ततश्चैवं साधने क्लेशवारणम्॥
भगवत्प्रसादाद् निष्ठेयं निष्ठातो वा प्रसन्नता॥५३॥
बीजांकुरप्ररोहस्य सापेक्षत्वं मिथो यथा॥
**''सर्वं करोति भगवान् भजनेन विना नहि''**[६]॥५४॥
अत उक्तं निजाचार्यैः सृष्टेस्त्रैविध्यमत्रतु॥
पुष्ट्यादिरूपाः भगवत्कायवाङ्मनसा पुनः॥५५॥
तत्प्राप्तिर्हि यथा लीला लीलयाऽप्राप्तिरप्युत॥

४.बृह.उप.२।४।५
५.भाग.पुरा.३।९।४२
६.सुबो.३।३२।२२



नहि साधनक्लेशाय किन्तु तद्विरहाय वै॥५६॥
भक्तेस्तु रतिरूपत्वाद् द्विदलात्मकता यतः॥
संयोगविप्रयोगौ चोभयोः भक्तिस्वरूपता॥५७॥
अतः सिद्धावसिद्धौ वा फलसाधनयोः पुनः॥
सर्वत्र भगवल्लीलानुभावात् कष्टनिष्कृतिः॥५८॥
अतो भक्तौ हि सर्वाधिकारकता प्रकीर्तिता॥
भगवत्प्रियता चापि गीतायामुपवर्णिता॥५९॥
**''समोहं सर्वभूतेषु न मे द्वेष्योऽस्ति न प्रियः॥**
**ये भजन्ति तु मां भक्त्या मयि ते तेषु चाप्यहम्''**[७]॥६०॥
भक्तिरेवं कृपालभ्या दैन्यं तदनुभावना॥
तच्चिदंशस्य जीवस्य यो यदंशः स तं भजेत्॥६१॥
भजनं स्वाभाविकं तेन न क्लेशः साधने क्वचित्॥
निष्ठाभंगस्य नो भीतिः जीवः प्रावाहिको न चेत्॥६२॥
**''प्रवाहेऽपि समागत्य पुष्टिस्थतैर्न युज्यते॥**
**सोऽपि तैस्तत्कुले जातः कर्मणा जायते यतः''**[८]॥६३॥
उक्तत्वेनैवमाचार्यैः निष्ठाभंगे न पुष्टिता॥
पुष्टिमार्गेऽङ्गीकृतस्य निष्ठाभंगो न वै क्वचित्॥६४॥
**''हरिरत्र न शक्नोति कर्तुं बाधा कुतोऽपरे॥**
**अन्यथा मातरो बालान् न स्तन्यैः पुपुषुः क्वचित्''**[९]॥६५॥
इत्येवमुक्तमाचार्यैरतो शंका न काचन्॥
यतश्चात्मरतिः साक्षाद् अंशगा भक्तिरुच्यते॥६६॥
माहात्म्यज्ञानपूर्वा चेत् पाञ्चरात्रोक्तलक्षणा॥
भक्तौ माहात्म्यज्ञानं तत् शास्त्रशब्दप्रमात्मकम्॥६७॥
तदापरोक्ष्यं नात्रेष्टं भजनप्रतिबन्धकम्॥

७.भग.गीता ९।२९
८.पु.प्र.म.२५ - २६
९.सं.नि.१९

भक्तेर्व्यसनभावे तु विरहोत्कण्ठतावशात्॥६८॥
सर्वात्मभावसंसिद्धिः आसक्तिभ्रमन्यायतः॥
सर्वत्र भगवत्स्फूर्तिरापरोक्ष्येण या भवेत्॥६९॥
सञ्चारिभावरूपा सा कदाचिन्नतु सर्वदा॥
भक्तिभावे चमत्काराधानेन रसपोषणात्॥७०॥
भक्तेः स्वरूपवैशिष्ट्यात् फलसाधनकक्षयोः॥
न क्लेशो मार्गतो वापि जीवानां वा स्वभावतो॥७१॥
हर्रेहृदि यत्प्राकट्यं भक्तिभावात्मकं हि तत्॥
बर्हियद् भजनीयस्य रूपं भक्त्यात्मकन्तु तत्॥७२॥
आत्मारामात्मरत्योर्हि तादात्म्याद् एकवद् द्विधा॥
प्रकाशाश्रयन्यायेन ब्रह्मसूत्रोपपादिता॥७३॥
स्वरूपसौख्यं खलु भक्तिमार्गे
मुक्तेः सुखं ज्ञानवतां च वर्त्मनि॥
स्वर्गादिलोकेऽपि सुखप्रदाता
गर्ह्यो सुखाभासपथि स एव॥७४॥
**''न यस्य कश्चातितितर्ति मायां**
**यया जनो मुह्यति वेद नार्थम्॥**
**तं निर्जितात्मात्मगुणं परेशं**
**नमामि भूतेषु समं चरन्तम्''** [१०] ॥७५॥

### (उपसंहारः)

आचार्यकृपयैवं हि वार्तास्थं वचनामृतम्॥
व्याख्यातं हि कृपालब्धमतिनेह न संशयः॥७६॥
तथापि स्वमतेर्दोषादयुक्तं लिखितं मया॥

१०.द्रष्ट.भाग.पुरा.८।५।३०



क्षमन्तु श्रीमदाचार्याः ज्ञात्वा तद् बालचेष्टितम्॥७७॥
कार्तिके चासिते पक्षे द्वादश्यां वै किशनगढे॥
द्वासप्तत्युत्तरसहस्रे द्वे वैक्रमाब्दे विनिर्मिता॥७८॥

इति गोस्वामिश्रीदीक्षितात्मजेन श्याममनोहरेण
विरचिता
पुरुषोत्तमजोशीवार्तास्थवचनामृतव्याख्या सम्पूर्णा